सर्वज्ञात्मकृत

।।सङ्क्षेप शारीरकम् ।।

श्री गुरुभ्यो नमः

।।सङ्क्षेप शारीरकम् ।।

प्रथमोऽध्यायः - मङ्गलाचरणम्

अनृतजडविरोधि रूपमन्तत्रयमलबन्धनदुःखताविरुद्धम्।
अतिनिकटमविक्रियं मुरारेः परमपदं प्रणयादभिष्टवीमि॥ १॥

स्वाज्ञानकल्पितजगत्परमेश्वरत्वजीवत्वभेदकलुषीकृतभूमभावा।
स्वाभाविकस्वमहिमस्थितिरस्तमोहा प्रत्यक्तितिर्विजयते भुवनैकयोनिः॥ २॥

प्रत्यक्प्रमाणकमसत्यपराक्प्रभेदं प्रक्षीणकारणविकारविभागमेकम्।
चैतन्यमात्रपरमार्थनिजस्वभावं प्रत्यञ्चमच्युतमहं प्रणतोऽस्मि नित्यम्॥ ३॥

औपत्तिकी शक्तिरशेषवस्तुप्रकाशने कार्यवशेन यस्याः।
विज्ञायते विश्वविवर्तहेतोर्नमामि तां वाचमचिन्त्यशक्तिम्॥ ४॥

प्रारम्भाः (आरम्भाः) फलिनः प्रसन्नहृदयो यश्चेत्तिरश्चामपि
नो चेद्विश्वसृजोऽप्यलं विफलतामायान्त्युपायोद्यमाः।
विश्वैश्वर्यमतो निरङ्कुशमभूद्यस्यैव विश्वप्रभोः
सोऽयं विश्वहिते रतो विजयते विघ्नेश्वरो विश्वकृत्॥ ५॥

वाग्विस्तरा यस्य बृहत्तरङ्गा वेलातटं वस्तुनि तत्त्वबोधः।
रत्नानि तर्कप्रसरप्रकाराः पुनात्वसौ व्यासपयोनिधिर्नः॥ ६॥

वक्तारमासाद्य यमेव नित्या सरस्वती स्वार्थसमन्वितासीत् (समन्विता स्यात्)।
निरस्तदुस्तर्ककलङ्कपङ्का नमामि तं शङ्करमर्चिताङ्घ्रिम्॥ ७॥

यदीयसम्पर्कमवाप्य केवलं वयं कृतार्था निरवद्यकीर्तयः।
जगत्सु ते तारितशिष्यपङ्क्तयो जयन्ति देवेश्वरपादरेणवः॥ ८॥

गुरुचरणसरोजसन्निधानादपि वयमस्य गुणैकलेशभाजः।
अपि महति जलार्णवे निमग्नाः सलिलमुपाददते मितं हि मीनाः॥ ९॥

शक्तो गुरोश्चरणयोर्निकटे निवासान्नारायणस्मरणतश्च निरन्तरायः।
शारीरकार्थविषयावगतिप्रधानं सङ्क्षेपतः प्रकरणं करवाणि हृष्यन्॥ १०॥

पदवाक्यमाननिपुणा निपुणं विमृशन्त्विदं प्रकरणं मनसा।
गुणदोषनिर्णयनिमित्ततया प्रथिता हि पण्डितजना जगति॥ ११॥

विद्वांसो यदि मम दोषमुद्गिरेयुर्यद्वा ते गुणगणमेव कीर्तयेयुः।
तुल्यं तद्वहु मनुते मनो मदीयं कष्टं तद्वत (तद्वहु) मनुते यदाह मन्दः॥ १२॥

महामहिम्नामपि यश्चिकीर्षति स्वभावसंशुद्धतरं तिरो यशः।
स नूनमाच्छादयितुं प्रवर्तते विवस्वतो हस्ततलेन मण्डलम्॥ १३॥

पुरुषापराधमलिना धिषणा निरवद्यचक्षुरुदयापि यथा।
न फलाय भर्च्छुविषया (भर्त्सुविषया) भवति श्रुतिसम्भवापि तु तथात्मनि धीः॥ १४॥

पुरुषापराधविगमे तु पुनः प्रतिबन्धकव्युदसनात् सफला।
मणिमन्त्रयोरपगमे तु यथा सति पावकाद्भवति धूमलता॥ १५॥

पुरुषापराधविनिवृत्तिफलः सकलो विचार इति वेदविदः।
अनपेक्षतामनुपरुध्य गिरः फलवद्भवेत् प्रकरणं तदतः॥ १६॥

पुरुषापराधशतसङ्कुलता विनिवर्तते प्रकरणेन गिरः।
स्वयमेव वेदशिरसो वचनादथ बुद्धिरुद्भवति मुक्तिफला॥ १७॥

स्वाध्यायवन्न करणं घटे विचारो नाप्यङ्गमस्य परमात्मधियः प्रसूतौ।
सापेक्षतापतति वेदगिरस्तथात्वे ब्रह्मात्मनः प्रमितिजन्मनि तन्न युक्तम्॥ १८॥

व्युत्पन्नस्य हि बुद्धिजन्म सहसा वाक्यश्रुतौ दृश्यते
वाक्यार्थे न ततोऽस्ति बुद्धिजनने मीमांसनव्यापृतिः।
तेनार्थात् करणादिभावभजने मीमांसनस्याश्रिते
वेदार्थप्रमितौ तु वेदवचसः सापेक्षता यास्यति॥ १९॥

अविद्या

आच्छाद्य विक्षिपति संस्फुरदात्मरूपं जीवेश्वरत्वजगदाकृतिभिर्मृषैव।
अज्ञानमावरणविभ्रमशक्तियोगादात्मत्वमात्रविषयाश्रयताबलेन॥ २०॥

प्रत्यत्तत्वमात्रविषयाश्रयताबलेन प्रत्यक्स्वरूपमपिधाय पराग्विवर्तैः।
प्रत्यञ्चमद्वयमशेषविशेष(शून्यं)हीनं विक्षिप्य तिष्ठति तदग्रहणं मृषैव॥ २१॥

आत्मस्वरूपम्

प्रत्यक्षलिङ्गवचनानि हि दर्शयन्ति निर्दुःखनित्यसुखविग्रहतां प्रतीचः।
निर्दुःखनित्यसुखविग्रहभूम्नि नास्मिन् सम्भाव्यते दृशि पुरोदितमल्परूपम्॥ २२॥

प्राज्ञे सुखं समनुभूय समुत्थितः सन् सर्वप्रकारविषयप्रतिपत्तिशून्ये।
सुप्तोऽहमत्र सुखमित्यनुसन्दधानः सर्वोऽपि जन्तुरवगच्छति तस्य सौख्यम्॥ २३॥

सर्वं यदर्थमिह वस्तु यदस्ति किञ्चित् पारार्थ्यमुज्झति च यन्निजसत्तयैव।
तद्वर्णयन्ति हि सुखं सुखलक्षणज्ञास्तत्प्रत्यगात्मनि समं सुखतास्य तस्मात्॥ २४॥

प्रेमानुपाधिरसुखात्मनि नोपलब्धः स प्रत्यगात्मनि कृमेरपि नित्यसिद्धः।
प्रेयःश्रुतेरपि ततः सुखतानुमानं नैयायिकोऽपि न दृगात्मनि निह्नुवीत॥ २५॥

आनन्दविग्रहमपास्तसमस्तदुःखं वस्तुस्वभावपरिकल्पितसर्वभेदम्।
आत्मानमध्ययनविध्यनुसारिणस्तं प्रत्यक्षतः श्रुतिशिरःसु समामनन्ति॥ २६॥

अध्यासः

अध्यस्तमल्पवपुरस्य न वास्तवं तत्प्रत्यक्परागद्वयमिदं हि परस्परस्मिन्।
अध्यस्ततां प्रति समर्थमबोधमात्रमन्योऽन्यरूपमिथुनीकरणे निमित्तम्॥ २७॥

सादृश्यधीप्रभृति न त्रितयं निमित्तमध्यासभूमिषु जगत्यनुगच्छतीदम्।
ब्राह्मण्यजातिपरिकल्पनमात्मनीष्टं जात्या न साम्यमुपलब्धमिहास्ति किञ्चित्॥ २८॥

भूयस्त्व(वत्तनुगुणा)वन्ननु गुणावयवक्रियाणां सामान्यपूगवपुरुक्तमिहाभियुक्तैः।
सादृश्यवस्तु न चिदात्मनि किञ्चिदत्र जात्यादिभिः सह निरीक्षितमस्ति तादृक्॥ २९॥

विषयकरणदोषान्न भ्रमः संविदि स्यादपि तु भवति मोहात् केवलादेवमेव।
भगवति परमात्मन्यद्वितीये विचित्रा द्वयमतिरियमस्तु भ्रान्तिरज्ञानहेतुः॥ ३०॥

संसिद्धा सविलासमोहविषये वस्तुन्यधिष्ठानगीर्नाधारेऽध्यसनस्य वस्तुनि ततोऽस्थाने महान् सम्भ्रमः।
केषाञ्चिन्महतामनूनतमसां (पाण्डित्यगर्वाश्रया) निर्बन्धमात्राश्रयादन्योऽन्याध्यसने निरास्पदमिदं शून्यं
जगत् स्यादिति॥ ३१॥

अधिष्ठानमाधारमात्रं यदि स्यात् प्रसज्येत सत्यं तदा चोद्यमेतत्।
न चैतत्सकार्यस्य मोहस्य वस्तुन्यधिष्ठानगीर्गोचरे लोकसिद्धा॥ ३२॥

किं चानृतद्वयमिहाध्यसितव्यमिष्टं स्याच्चेत्तदा भवति चोद्यमिदं त्वदीयम्।
सत्यानृतात्मकमिदं मिथुनं मिथश्चेदध्यस्यते किमिति शून्यकथाप्रसङ्गः॥ ३३॥

इदमर्थवस्त्वपि भवेद्रजते परिकल्पितं रजतवस्त्विदमि।
रजतभ्रमेऽस्य च परिस्फुरणान्न यदि स्फुरेन्न खलु शुक्तिरिव॥ ३४॥

रजतप्रतीतिरिदमि प्रथते ननु यद्वदेवमिदमित्यपि धीः।
रजते तथा सति कथं न भवेदितरेतराध्यसननिर्णयधीः॥ ३५॥

अध्यस्तमेव हि परिस्फुरति भ्रमेषु नान्यत्कथञ्चन परिस्फुरति भ्रमेषु।
रज्जुत्वशुक्तिशकलत्वमरुक्षितित्वचन्द्रैकताप्रभृतिकानुपलम्भनेन॥ ३६॥

इतरेतराध्यसनमेव ततश्चितिचेत्ययोरपि भवेदुचितम्।
रजतभ्रमादिषु तथावगमान्न हि कल्पना गुरुतरा घटते॥ ३७॥

अनुभूतियुक्त्यनुमितित्रितयादितरेतराध्यसनसिद्धिरतः।
चितिचेत्यवस्तुयुगलस्य न चेत् त्रितयस्य बाधनमिहापतति॥ ३८॥

सदृशसांशपराग्विषयेषु चेद्भवति दोषवशाज्जगति भ्रमः।
भवतु तत्सकलं वदितुं वयं तदुपचारवशाद् दृशि शक्नुमः॥ ३९॥

अपि च भाष्यकृदेव तदब्रवीद्विषयताद्युपचारसमाश्रयात्।
स्ववचसैव न तावदिति ब्रुवन् सकलमात्मनि विभ्रमसिद्धये॥ ४०॥

अपरोक्षरूपविषयभ्रमधीरपरोक्षमास्पदमपेक्ष्य भवेत्।
मनसः स्वतो नयनतो यदि वा स्वपनभ्रमादिषु तथा प्रथितेः॥ ४१॥

स्वतोऽपरोक्षा चितिरत्र विभ्रमस्तथापि रूपाकृतिरेव जायते।
मनोनिमित्तं स्वपने मुहुर्मुहुर्विनापि चक्षुर्विषयं स्वमास्पदम्॥ ४२॥

मनोवगम्येऽप्यपरोक्षताबलात्तथाम्बरे रूपमुपोल्लिखन् भ्रमः।
सितादिभेदैर्बहुधा समीक्ष्यते यथाक्षिगम्ये रजतादिविभ्रमः॥ ४३॥

ज्ञातेऽपि तावति ततोऽनतिरिक्तरूपेऽप्यज्ञानतः स्फुरणमस्फुरणं च दृष्टम्।
दूरस्थयोर्ननु वनस्पतिवस्तुनोस्तद्भेदो न दृष्टिविषयोऽवगते च ते नः॥ ४४॥

यत्रापि दैवगतितोऽस्त्यतिरिक्तभावो रूपात्प्रतीतिविषयादितरत्र रूपे।
तत्राप्यबोधघटनां प्रति नाङ्गभावस्तस्यातिरिक्तवपुषो(षोऽनतिरिक्तरूपात्)ऽपुनरुक्तरूपात्॥ ४५॥

शुक्ती(दमङ्गात्पृ)दमंशात्पृथगप्रतीता त्रिकोणता स्या(न्न तु)न्ननु वस्तुवृत्त्या।
तथापि तस्थं न पृथक्त्वमिष्टं तदप्रबुद्धत्वनिमित्तभूतम्॥ ४६॥

यतः प्रपश्यन्नपि भेदिनः स्वं वनस्पते रूपमभिन्नमस्मात्।
न भेदमस्य प्रतिपद्यतेऽक्ष्णा वनस्पतेः पार्श्वगतात्परस्मात्॥ ४७॥

सप्रत्यभिज्ञनयनोत्थधियो घटादेः स्वाभाविकात्स्ववपुषोऽनतिरिक्तरूपः।
(स्थेमाप्रतितिवि)स्थेमाप्रबोधविषयो विषयत्वमेतीत्यङ्गीकृतं ननु मितेऽपि घटादिकेऽर्थे॥ ४८॥

एवं स्फुरत्यपि दृगात्मनि तत्स्वरूपेणास्फूर्तिभाजि परिकल्पिततोपपन्ना।
स्वाज्ञानतो जगदिदं परमेश्वरोऽसौ जीवोऽहमित्यपि विभागवतोऽल्पकस्य॥ ४९॥

अल्पं रूपं बन्धनं प्रत्यगात्मा बद्धोऽनेन स्वच्छचैतन्यमूर्तिः।
स्वात्माज्ञानं कारणं बन्धनेऽस्य स्वात्मज्ञानात्तन्निवृत्तिश्च युक्ता॥ ५०॥

अज्ञानमप्यविदुषोऽस्य न तु स्वतोऽस्ति चैतन्यनिर्विकृतिताद्वयताविरोधात्।
अज्ञाततापि स्वनवबोधनिबन्धनैव नात्माश्रयत्वमपि चोदयितव्यमत्र॥ ५१॥

द्वारं तमोऽन्वयमपेक्ष्य दृशा हि दृश्यं सङ्गच्छते सकलमत्र न नो (वो) विवादः।
मोहोऽपि दृश्यवपुरत्र च संवदध्वे तस्मात्तदन्वयनिमित्तमपीह मोहः॥ ५२॥

संविद्धुरं वहति तद्विषयो(परक्तां)पयुक्तां स्वात्मन्यपि स्वरसतः स्वकरूपसिद्धेः।
कार्यप्रपञ्चपरिकल्पनमात्ममोहान्मोहप्रकल्पनमपीति तथोपपन्नम्॥ ५३॥

आत्मा प्रसाधयति वेद्यपदार्थजातं स्वात्मानमप्यवगतिक्षमशक्तियोगात्।
अज्ञानमेवमिदमात्मपरप्रकृप्तौ शक्तं भवेदिति न किञ्चन दौस्थ्यमस्ति॥ ५४॥

भेदं च भेद्यं च भिनत्ति भेदो यथैव भेदान्तरमन्तरेण।
मोहं च कार्यं च बिभर्ति मोहस्तथैव मोहान्तरमन्तरेण॥ ५५॥

ब्रह्मज्ञानं सूचयन् सूत्रकारो बन्धोत्पत्तेर्हेतुविध्वंसनाय।
एतत्सर्वं सूचयामास तस्मादेतत्सर्वं भाषते भाष्यकारः॥५६॥

तस्मादध्यस्तमेतत्सकलमपि (दृशः) दृशौ भूमरूपातिरिक्तं
रूपं स्वाज्ञानमात्रादिति भवति परब्रह्मधीबाध्यमेतत्।
ईशित्रादिप्रभेदप्रतिहतिफलकज्ञानदौस्थ्यापनुत्त्यै
श्रीमच्छारिरकार्थप्रकटनपटुताशालि शास्त्रं विदध्मः॥५७॥

ब्रह्मन् - मीमांसा विषयः

मीमांसितव्यमनयैव सदद्वितीयं मीमांस्यमेव च सदात्मतयानयैतत्।
ज्ञातं प्रयोजनमनेन पथेदमस्यास्तन्नान्तरीयकतया च तमोनिवृत्तिः॥५८॥

न च गतार्थमिदं प्रतिभाति नो न हि विधेः पदमात्मसमीक्षणम्।
न खलु यागदद्दातिजुहोतिवत् पुरुषतन्त्रमिहात्मनि दर्शनम्॥५९॥

अपि च रूपितगोचरता विधेर्न परमात्मधियोऽस्ति (स्ति निरूपणम्) च रूपणम्।
अविदिते परमात्मनि च तद्धियो न खलु रूपितता घटनान्विता॥६०॥

विदितता परमात्मन इष्यते यदि वृथा विधिरस्य धियो भवेत्।
निखिलभेदनिदाननिवृत्तितो भवति तद्विषयादि च दुर्लभम्॥६१॥

इति न धर्मविशेषसमर्पणं श्रुतिशिरोवचनैः क्रियते ततः।
भवति धर्मविचारगतार्थतानवसरः परमात्मविचारणे॥६२॥

अर्हार्थे च कृत्यस्मरणमभिमतं पाणिनेः प्रार्थनादौ
लिङ्लोडादेश्च (वृत्तिस्मरणमभिमतम्) वृत्तिः प्रचुरमभिमता पाणिनेर्जैमिनेश्च।
तस्माद्वेदान्तवाक्ये पठितमपि लिङाद्यन्यथा योजनीयं
विध्यर्थासम्भवेन स्फुटमुदितनयादेतदन्यागतार्थम्॥६३॥

मुमुक्षोः अधिकारित्वम्

एकाहाहीनसत्रद्वयविधिविहितानेककर्मानुभावध्वस्तस्वान्तोपरोधाः कथमपि पुरुषाश्चिद्दिदृक्षां लभन्ते।
यज्ञेनेत्यादिवाक्यं शतपथविहितं कर्मबृन्दं गृहीत्वा स्वोत्पत्त्याम्नानसिद्धं पुरुषविविदिषामात्रसाध्ये
युनक्ति॥६४॥

उपससाद चतुष्टयसाधनो निशितबुद्धिरशुद्धिपरिक्षयात्।
विविदिषुर्विहितैर्विधाध्वरैर्विदितवेद्यतमं विधिवद्गुरुम्॥६५॥

इह जगति सर्व एव जन्तुर्निरतिशयं सुखमुत्तमं ममास्तु।
(व्युपरमतु) उपरमतु तथोपघातरूपं विषयजदुःखमिति स्पृहां करोति॥६६॥

निरतिशयसुखं च दुःखजातव्युपरमणं च वदन्ति मोक्षतत्त्वम्।
उभयमपि जनोऽभिवाञ्छतीति स्फुटतरमस्य सदास्ति मोक्षवाञ्छा॥६७॥

उभयमपि परात्मनः स्वरूपं विमलचिदेकरसं स्वयम्प्रकाशम्।
इति भवति विना प्रमाणमस्मिन्नुदितनयादभिवाञ्छनोपपत्तिः॥६८॥

कर्मकाण्डकृतबुद्धिशुद्धितस्तर्किते च खलु मोक्ष(वर्त्मनि)वस्तुनि।
अर्थितास्य घटते प्रयोजकज्ञाननुन्नमनसो महात्मनः॥६९॥

धर्मनिर्णयनिमित्तमिष्यते वेदवित्परिषदेव मानवे।
तद्वदत्र गुरुणास्य सङ्गतिस्तेन चास्य घटतेऽर्थिता गुरौ॥७०॥

यः कर्मकाण्डविषयेऽभिहितोऽधिकारी सोऽयं प्रवृत्तिषु निवृत्तिषु तुल्यरूपः।
अत्राभिधित्सितविशेषणपूगयुक्तोऽसाधारणस्त्वभिमतः पुरुषो निवृत्तौ॥७१॥

शास्त्रं प्रवृत्तिषु तुल्यरूपं साधारनस्य पुरुषस्य पुराभ्यधायि।
अत्रोच्यते सकलकर्मनिवृत्तिभाजः सर्वं निवृत्तिविषयं श्रवणादिशास्त्रम्॥७२॥

शास्त्रद्वैविध्यदृष्टेर्द्वैविधमधिकृतेर्भेदमप्याश्रयन्ते तद्वैविध्योपलब्धेः पुरुषमधिकृतं शास्त्रयोर्भिन्नमाहुः।
शास्त्रार्थद्वित्वहेतोः पुरुषमधिकृतं तद्गतं चाधिकारं नो चेद्भिन्नं प्रतीयुर्द्विविध(मिति)मिह वृथा शास्त्रमापद्यते हि॥७३॥

यमनियमविधानैर्वाङ्मनःकायचेष्टाव्युपरमणमशेषैः कथ्यते न प्रवृत्तिः।
यदि भवति कदाचित्काचिदस्य प्रवृत्तिः श्रुतिविहितनिवृत्तेः कर्मणां कत्थनं स्यात्॥७४॥

औदासीन्यविशेषमेव हि परब्रह्मात्मधीजन्मने शास्तीदं श्रवणादिशास्त्रममुना त्वाक्षिप्यते व्यापृतिः।
तां तां व्यापृतिमन्तरेण घटते सा सा न शास्त्रार्थधीरित्यर्थाल्लशुनादिभक्षणगतौदासीन्यबोधादिव॥७५॥

औदासीन्ये बोधिते शास्त्रबृन्दैरर्थादस्मात्प्रच्युतस्यास्त्यनर्थः।
इत्यालोच्य प्रच्युतेः प्रापकस्य प्राबल्येऽर्थे प्रातिलोम्यं विधत्ते॥७६॥

औदासीन्यं बोधयच्छास्त्रमेतन्नित्यं पथ्यं बोधयत्यस्य पुंसः।
पथ्यादस्मात्प्रच्युतस्यास्त्यपथ्यं (बुध्वा पथ्यं)बुध्वापथ्यप्रातिलोम्ये यतेत॥७७॥

वृत्ता प्रवर्तकनिवर्तकशास्त्रसिद्धै षष्ठे प्रवृत्तिनिवृत्त्यधि(कारचि)कारिचिन्ता।
अत्रैकमेव तु निवृत्त्यधिकारमार्गमाश्रित्य सूत्रकृदथात इति प्रवृत्तः॥७८॥

औदासीन्यप्रच्युतेः प्रापकौ च रागद्वेषौ नापरो हेतुरस्ति।
रागद्वेषप्रातिलोम्ये प्रवृत्तिरौदासीन्यप्रापणाच्छास्त्रतोऽर्थात्॥७९॥

अशुचेः प्रतिषेधशास्त्रतो न भवत्येव हि वेदचिन्तनम्।
श्रवणादिनिवृत्तिशास्त्रतः स्वयमर्थादथ शौचमापतेत्॥८०॥

अचतुर्गुणशौचवारणात् स्वयमेवास्य चतुर्गुणं भवेत्।
अचतुर्ष्वशनस्य वारणात् स्वयमेवास्य चतुर्षु भोजनम्॥८१॥

इति योजय सर्वमीदृशं कथितन्यायवशेन सादरम्।
विधिहीननिवृत्तिशास्त्रतः कथितेऽस्मिन्नधिकारवर्त्मनि॥८२॥

इति केचन वर्णयन्ति तद्विपरीतं प्रवदन्ति केचन।
प्रविभज्य तदप्युदीर्यते निपुणचार्यपरम्परागतम्॥८३॥

उत्सर्गतः सकलकर्मनिवृत्तिनिष्ठा सन्न्यासशास्त्रशतकोटिभिरर्पितास्य।
अस्ति प्रतिप्रसवशास्त्रमुखात्प्रतीता चेष्टात्मबुद्धिपरिपाकफलापि काचित्॥८४॥

यमस्वरूपा सकला निवृत्तिस्तथा प्रवृत्तिर्नियमस्वरूपा।
निवर्तकादत्र यमप्रसिद्धिः प्रवर्तकात्स्यान्नियमप्रसिद्धिः॥८५॥

निवृत्तिरस्ति द्विविधा बहिः स्थिता शरीरसर्वेन्द्रियसंयमात्मिका।
तथापराभ्यन्तरवस्तुसंश्रया सदात्मकूटस्थचिदेकविग्रहा॥८६॥

तयोस्तु बाह्या विधिशास्त्रलभ्या प्रयत्ननिर्वर्त्यतया प्रतीतेः।
विधानशास्त्रं विरहय्य लभ्या चितिस्वरूपा त्वितरा निवृत्तिः॥८७॥

मायामयी बाह्यनिवृत्तिरिष्टा चितिस्वरूपा परमार्थसत्या।
तयोर्निवृत्त्योश्च निवृत्तिशास्त्रं विधायकं बाह्यनिवृत्त्यपेक्षम्॥८८॥

प्रवृत्तिशास्त्रेण समेऽपि सम्मते निवृत्तिशास्त्रस्य विधेयबोधने।
निवृत्त्यनुष्ठाननिबन्धनत्वतो निवर्तकं शास्त्रमिदं प्रचक्षते॥८९॥
शास्त्रद्वयेन परिदर्शितसाधनेन साध्यस्पृहापरवशः पुरुषो मुमुक्षुः।
शुश्रूषते गुरुमथेत्युदितः स चात्र वेदान्तवाक्यविषयश्रवणाधिकारी॥९०॥

स परिपृच्छति कोऽहमसौ च कः सहजमस्य च तस्य च किं पृथक्।
उत तयोरभिदेश्वरजीवयोरिति च संशयसङ्कुलमानसः॥९१॥

गुरूपदेशः

तीर्थेन तं विविदिषन्तमनन्यभक्तं संसारसागरभयातुरचित्तवृत्तिम्।
एकं मुमुक्षुमधिकारिणमात्मतत्त्वज्ञाने समीक्ष्य गुरुराह दयाविधेयः॥९२॥

वक्ष्यामि वत्स तव वाञ्छितमत्यवस्थमत्यन्तमेव च हितं शृणु तन्मनस्कः।
त्वं प्रत्यगव्यवहितं तव सुप्रसिद्धं ब्रह्माद्वितीयमुदितं च तदयजस्रम्॥९३॥

यद्यत्र पश्यसि विरोधमुदीरय त्वं सद्यस्ततः परिहराणि तमप्रयत्नात्।
वाक्यं निरस्तसकलप्रतिबन्धकं सत् त्वां बोधयिष्यति करार्पितबिल्वतुल्यम्॥९४॥

मुमुक्षोः संशयः

अत्राह सद्वयमहं मम रूपमीक्षे तच्चाद्वयं विगणयामि परोक्षमेव।
पारोक्ष्यसद्वयविभागयुजोर्विरोधाद्वाक्यार्थबोधमतिदुर्लभमेव मन्ये॥९५॥

आत्मा उपनिषच्छ्रवणेन न अवगन्तुं शक्यम्

यद्वस्तु सद्वयतयावगतं स्वशब्दात्तस्याद्वयत्वमवगन्तुमशक्यमेव।
यद्वस्तु च् व्यवहितं प्रतिपादितं तत् प्रत्यक्तया न तु जनः प्रतिपत्तुमीशः॥९६॥

आकाङ्क्षितं भवति पूरणशक्तियुक्तं यत्सन्निधौ (पतित)पठितमस्य हि सङ्गतिः स्यात्।
नाकाङ्क्षयैव न तु सन्निधिनैव वा स्यात् सम्बन्धिता हि विरहय्य पदार्थशक्तिम्॥९७॥

योग्यत्वमत्र न च तत्त्वमसीति वाक्ये सम्बन्धितां प्रति पदार्थयुगस्य भाति।
पारोक्ष्यसद्वयविभागविरोधहेतोर्गौरश्व इत्यभिहिते तु यथैव वाक्ये॥९८॥

सोऽयङ्गिरोरिव न लक्षणयापि वृत्तिर्मानान्तराधिगतिहीनतयात्मानि स्यात्।
मानान्तराधिगतगोचर एव दृष्टः शब्दप्रयोग इह लाक्षणिकस्तु लोके॥९९॥

तस्मादखण्डविषया न वचः प्रवृत्तिः संसर्गबोधनमपस्तमयोग्यभावात्।
एवं न वाक्यगतशब्दसमन्वयोऽपि दूरे प्रमान्तरविरोधनिराससिद्धिः॥१००॥

किञ्च प्रमान्तरमपेक्ष्य गिरः प्रवृत्तिः सिद्धेषु वस्तुषु जगत्युपलब्धपूर्वा।
ब्रह्मात्मवस्तुनि तथा वचसः प्रवृत्तिर्युक्तात्मनस्तु फलवत्परिनिष्ठितत्वात्॥१०१॥

नद्यास्तीरे फलमिति गिरः सिद्धवस्तुप्रवृत्तेर्दृष्टा स्वार्थप्रमितिजनने स्वान्यमानव्यपेक्षा।
तद्वद्ब्रह्मण्यपि तु वचसो वैदिकस्याभ्युपेया तस्मादस्मिन्न खलु घटते मानभावः श्रुतीनाम्॥१०२॥

नाखण्डवस्तुविषया वचसः प्रवृत्तिर्लोकेऽपि दृष्टिपथमापतिता कदाचित्।
नानापदार्थघटनाविषयत्वहेतोर्दूरेत्यता श्रुतिशिरोवचनेषु तस्याः॥१०३॥

आदाय मुख्यगुणलाक्षणिकप्रवृत्तीरर्थं समर्पयति शब्द इति (प्रसिद्धिः)प्रसिद्धम्।
आस्वेष नान्यतमयापि वदत्यखण्डं शब्दान्तरात्तविषयादधिकार्थवृत्तेः॥१०४॥

आधिक्यमुत्सृजति शब्दगणो निजेऽर्थे शब्दान्तरात्तविषयादिति मन्यमानाः।
वाक्यत्वमेव पदजातगतं विहन्युर्न ह्यस्ति हस्तकरशब्दगतं तदेषाम्॥१०५॥

किञ्च स्वयम्प्रभमलुप्तचिदेकरूपं सर्वप्रमाणविषयाद्बहिरभ्युपेत्य।
आत्मानमात्मनि च शास्त्रमुदाहरन्तः सिद्धान्तमभ्युपगतं परिपीडयन्ति॥१०६॥

सर्वत्र वस्तुषु जडेष्वजडप्रकाशं कुर्वत्प्रमाणमिति सम्प्रतिपन्नमेतत्।
ब्रह्मात्मवस्त्वजडबोधवपुः कुतोऽस्मिन् वेदान्तवाक्यजनिताजडसंविदन्या॥१०७॥
किञ्च क्रियापदमपेक्ष्य पदानि वाक्यभावेन सम्यगिह सङ्गतिमाप्नुवन्ति।
नात्र क्रियापदमपेक्षितमामनन्ति वाक्यं कुतो भवति वेदशिरस्तदानीम्॥१०८॥

नापूर्वमर्थमुपलम्भयितुं पदानां सामर्थ्यमस्ति परिहृत्य तु वाक्यभावम्।
स्वार्थस्मृतिं हि जनयन्ति पदानि लोके विज्ञातसङ्गतितया न तु कार्यमन्यत्॥१०९॥

हित्वा न वाक्यपदते प्रतिपत्तिहेतुर्वेदो भवेदिति कथञ्चन वक्तुमीशः।
कश्चित्कदाचिदपि तत्र कुतः श्रुतीनां प्रमाण्यमात्मनि भवेदिति वर्णयन्ति॥ ११०॥

किञ्च प्रमान्तरमिहाभ्युपयन् प्रतीचि वेदान्तवाक्यमनुवादकमभ्युपेयात्।
मानान्तरं यदि च नेच्छति शब्दशक्तेस्तत्र ग्रहः कथमिति प्रतिपादनीयम्॥ १११॥

किञ्च प्रवृत्तिविनिवृत्तिविहीनवस्तुतत्त्वप्रतीतिजननान्न च किञ्चिदस्ति।
पुंसः प्रयोजनमतोऽपि न तत्र मानं वेदान्तवाक्यमिति युक्तिमदुच्यमानम्॥ ११२॥

अज्ञातमर्थमवबोधयतः प्रमायां हेतुत्वमभ्युपगतं ननु वेदविद्भिः।
अज्ञात(तापि)ता च परमात्मनि दुर्निरूपा विज्ञानमात्रवपुषीति न मानकृत्यम्॥ ११३॥

बोधस्वभावकमबुद्धमनुष्णमुष्णं शीतस्वभावकमशीतमितीदृशानि।
कः श्रद्दधीत पुरुषो वचनानि तस्माद् ब्रह्माप्रबुद्धमिति वाक्यमयुक्तमाहुः॥ ११४॥

उपाध्यभावे न भवेदुपाधिमत् तटस्थमज्ञानमुपाधिरिष्यते।
प्रमाणबुद्धेर्न तदात्मवस्तुनि स्वयम्प्रकाशे न ततोऽत्र मानधीः॥ ११५॥

अद्वैतमात्मपदमाहुरनन्यमानं द्वैतं प्रमाणमिह च प्रतिपादयन्ति।
वाक्ये निजे पदविरोधमनीक्षमाणाः पाण्डित्यमप्रतिहतं प्रतिलभ्य धीराः॥ ११६॥

मातृप्रमाणमितिमेयविभागभिन्नं ब्रह्मैव चेद्भवति तत्र च वर्णयामः।
कूटस्थतापहतिरेकरसत्वहानिः शाक्यैश्च सन्धिरिति दूषणमन्यदत्र॥ ११७॥
अज्ञानकल्पितमनिर्वचनीयमिष्टं मात्रादिमानफलपर्यवसानमेतत्।
इत्युच्यते यदि तदा परमात्मनोऽपि मेयत्वतो भवति कल्पिततापसङ्गः॥ ११८॥

ब्रह्म प्रमेयमथ नेष्टमिह प्रमाणं वेदान्तवाक्यमिति पक्षपराहतिर्वः।
न ह्यप्रमेयमवबोधयदस्ति मानं नादाह्यदाहक इति प्रथितः कृशानुः॥ ११९॥

किं सिद्धमिदमत्र जगत्त्रयेऽपि स्वाज्ञानकल्पितमनिर्वचनीयमेकम्।
नः शेषतीर्थकृदुदीरिततत्त्रमार्गे सिद्धे यतः सदसती सकलेऽपि तत्त्वे॥ १२०॥

अज्ञानमप्यसदभावतया प्रसिद्धैर्द्वैतप्रसूतिकृदतो न तदभ्युपेयम्।
नासत्कदाचिदपि सज्जनने समर्थं वन्ध्यासुता न खलु पुत्रशतं प्रसूते॥ १२१॥

महावाक्यानि न अपरोक्षज्ञानजनने समर्थानि

वाक्यप्रसूतमतिरिन्द्रियजन्यधीवन्नार्थापरोक्ष्यजननी भवितुं समर्था।
तेनास्तु वाक्यजनितात्मपरोक्षबुद्धिर्भ्रान्तिः सदाजडतयानुभवेऽपरोक्षे॥ १२२॥

नित्यापरोक्षमपि वस्तु परोक्षरूपं वेदान्तवाक्यमवबोधयति स्वभावात्।
प्रामाण्यमत्र कथमस्य वदोपपन्नं न ह्यन्यदन्यदिति बोधयतः प्रमात्वम्॥ १२३॥

वस्त्वस्तु नित्यमपरोक्षमिदं तु वाक्यं तद्वस्तु वक्तुमपरोक्षमशक्तमेव।
न ह्यस्ति शब्दजनितात्र जगत्त्रयेऽपि बुद्धिः करोति खलु या विषयापरोक्ष्यम् ॥ १२४॥

उपनिषज्ज्ञानं अविद्यां न अपनुदति

अत्राह यद्यपि किमप्युपनेयमत्र चैतन्यवस्तुनि न सम्भवति प्रमाणैः।
अस्त्येव तत्र भवभीतिनिदानभूतमज्ञानमात्रमपनेयमनन्यमाने॥ १२५॥

नैतत्प्रमाणमनेतृ (सती)सतो न तावन्नैतन्नियोज्यसमतोऽप्युपघातसिद्धैः।
नाप्यन्यदस्ति सदसद्यदनेन हेयं तस्मात्प्रमाणमपनेतृ न कस्यचिद्वः॥ १२६॥

मानं न कारकमिति प्रथितं पृथिव्यां स्याच्चेत्क्रियावदिदमुज्झति मानभावम्।
जन्यं न मानफलमित्यपि युष्मदीयाः संविद्रते न खलु जातुचिदक्षरेऽस्मिन्॥ १२७॥

अनिर्वचनीयता – केवल तात्पर्याभासः

नाद्यापि वेद्म्यहमनिर्वचनीयभाषां सर्वप्रवादहृदयान्य(न्यवगा)पि गाहमानः।
तात्पर्यतो न च तथाविधमस्ति किञ्चिल्लोके प्रसिद्धमपि तद्विषयेयमिष्टा॥ १२८॥

तस्मात्प्रमाणफलमत्र निरूप्यमाणं ब्रह्मात्मवस्तुनि न सम्भवतीह किञ्चित्।
कृत्यं विना न च निरूपयितुं प्रमाणं वेदान्तवाक्यमिह शक्यमनर्थकत्वात्॥ १२९॥

नियोग एव वेद तात्पर्यम्

कार्यान्वयान्वयिनि वस्तुनि शब्दशक्तिं श्रोतुः प्रवर्तकधियं परिकल्प्य बालः।
चेष्टावशात्पुनरपि प्रविभज्य भागं भागस्य वाचकमिति स्वयमेव वेत्ति॥ १३०॥

त्यक्तः कार्यान्वितार्थं वदितुमलमयं शब्द इत्येष पक्षो नोक्तो योग्येतरार्थान्वितमिति तु पुनः पूर्वमप्येष पक्षः।
किन्तु स्यादस्य शक्तिर्निजसहजवशादन्वितार्थाभिधाने योग्यत्वादेस्तु पश्चात्स्वयमुप(निपतेत्)निपतत्यस्य
कार्यैदमर्थ्यम्॥ १३१॥

प्रवृत्त्यभावस्य विरोधि कार्यं कालत्रयानन्वितमाहुरेके।
स्वगोचरस्येप्सितसाधनत्वं विज्ञापयत्प्रेरकमाहुरन्ये॥ १३२॥

या नान्य(यानन्यमु)मुद्दिश्य कृतिः प्रवृत्ता तयैव यद्याप्यतया प्रतीतम्।
(तथैव) तदेव कार्यं (कार्व्यं प्रथयन्ति) कथयन्ति केचित् विचक्षणाः कार्यनिरूपणायाम्॥ १३३॥

भूत्वा रागः कारणं पुम्प्रवृत्तेर्नैवं कार्यं कार्यरूपं विहाय।
रूपेणा(न्येनेष्यते)न्येनाप्यतेऽस्या निमित्तं भिन्दन्त्येनं रागकार्ये बहुज्ञाः॥ १३४॥

आवापोद्वापहेतोः पदमिदममुकस्याभिधाने समर्थं स्वोत्पत्त्यैवेति शक्तिप्रतिनियममिमं पार्श्ववर्ती तटस्थः।
जानात्यालोच्य भूयो नयनिपुणमतिर्भागशः कार्ययुक्ते वस्तुन्येतस्य हेतोरुपनिषदखिला कार्यशेषे
प्रमाणम्॥ १३५॥

आज्ञादिभेदेष्वनुवर्तमाने प्रवृत्त्यभावस्य विरोधिमात्रे।
लिङ्गादिशब्दस्य स वेत्ति शक्तिं प्रवर्तकाख्यविषयत्वयोग्ये॥ १३६॥

अन्ये वदन्ति निरुपाधिनियोगरूपं वेदे भवत्यपुरुषप्रभवे स्वतन्त्रम्।
लोके पुनः पुरुषधीरचितेषु कार्यं सोपाधिकं तदिति कारणतो वचःसु॥ १३७॥

आज्ञायाश्चाद्युपाधिप्रणीपतितवपुः साधनेहानु(बन्धं)बद्धं
विज्ञातोपायभावं विषयमनुसरत्पौरुषे(षेये तु वाक्ये)यीषु वाक्षु।
वेदे कर्तृस्थरागाद्युपाधिविरहितं कर्तृशून्ये ततोऽस्मिन्
सर्वत्रैकस्वभावस्थितिवपुषि भवेल्लब्धशक्तिर्लिङादिः॥ १३८॥

अन्ये भिन्नस्वभावं विविधमभिदधत्यानुरूप्येण कार्यं लोके धात्वर्थरूपं श्रुतिवचसि पुनस्तन्नियोगाख्यमेव।
सम्मुग्धे तत्र शक्तिं शिशुरयमवगम्यादितो न्यायचक्षुः पश्चाद्वेदैकवेद्यं वदति लिङिति च प्रेक्षते
निश्चयेन॥ १३९॥

धात्वर्थाख्यानशक्तो यदि भवति गुणाद्वर्तितुं वैदिकेऽयं
सम्बन्धाज्ञानहेतोरनलमथ पुनर्वैदिके शक्तिमान् स्यात्।
तत्सम्बन्धात्क्रियामप्यभिवदितुमलं लक्षणावृत्तितोऽयं
लिङ्शब्दस्तेन कार्ये श्रुतिवचनगते शक्त इत्यध्यवस्येत॥ १४०॥

एवं शब्दान्तराणां (णामतिनिपुणमतिः) नयनिपुणमतिः शक्तिवित्सन् क्रमेण
पक्षेपोद्धारदर्शी भवति कतिपयैर्वासरैस्तत्र तत्र।
तस्मात्कार्यान्वितार्थे सकलमपि पदं शक्तिमद्बुध्यमानः
भूताद्यर्थप्रतीतिं प्रति विमुखमनाः शास्त्रतः स्यान्मनुष्यः॥ १४१॥

वाक्याद्भूतार्थनिष्ठाद्भवति न तु नृणां शब्दशक्तिप्रतीतिः लिङ्गं श्रोतृस्थबुद्धेर्नहि किमपि भवेदत्र बालोपलभ्यम्।

न ह्येतत्पुत्रजन्माद्यवगतिनियतं नित्यवन्निश्चितं नो यद्वक्त्रादिप्रसादक्षितितललुठनादीक्ष्यते श्रोतृदेहे॥ १४२॥

तस्मादाध्वं निराशाः श्रुतिशिरसि न तस्यास्ति निष्पन्नरूपे
प्रामाण्यं कार्यशून्ये कथमपि च परब्रह्मणि स्वप्रधाने।
भूतं भव्यप्रधानं भवति न हि पुनः स्वप्रधानं कदाचित्
शास्त्रस्थाः शब्दशक्तिस्थितिनिपुणधियो विस्तरादेवमाहुः॥ १४३॥

तस्मादसङ्गतमिदं प्रतिभाति यन्मे वाक्यप्रमाणकमुदीरितमद्वयत्वम्।
इत्येवमेष मम बुद्धिपथं विरोधः प्राप्तः प्रभो परिहरैनमनुग्रहाय॥ १४४॥

तस्य प्रतिवचनम् – याथात्म्यम् - महावाक्यतात्पर्यं

सत्यं (यथाह) यदाह गुरुमान् यदि वाक्यगम्यं संसर्गरूपमिह वेदशिरःस्वभीष्टम्।
अस्त्येव तत्र पदयोरुभयोर्विरोधः पारोक्ष्यसद्वयविरोधकृतस्तदानीम्॥ १४५॥

यत्कर्मकाण्डनिपुणैरुदितं पुरताद्वाक्यार्थलक्षणमदः पुनरत्र नेष्टम्।
भेदादिवर्जितमखण्डमुशन्ति यस्माच्छ्रीबादरायणमतानुगता महान्तः॥ १४६॥

भेदादिरूपमवबोधयितुं समर्थं यद्वाक्यमस्ति तदखण्डविलक्षणार्थम्।
तल्लौकिकं भवतु वैदिकमेव वास्तु नास्माकमत्र विषये विमतिः कदाचित्॥ १४७॥

यद्वाक्यजातमथ वेदशिरोनिविष्टं यद्वापि लौकिकमखण्डमपास्य नान्यत्।
शक्नोति वस्तु वदितुं तदशेषमेव ब्रूयादखण्डमिति तु प्रतिपादयामः॥ १४८॥

सोऽयं पुमानिति हि मुख्यपदार्थयुक्तवाक्यार्थबुद्धिजननस्य न वक्ष्यमेतत्।
ईशीत वाच्यशबलस्थपदद्वयेन संसृष्टबुद्धिजनने पदयोर्विरोधात्॥ १४९॥

एतद्धि सोऽयमिति वाक्यमखण्डनिष्ठं वक्तव्यमत्र गतिरस्ति न काचिदन्या।
तद्देशकालमनुकृष्य स इत्यनेन नायं पदार्थमुपढौकयते हि नैतत्॥ १५०॥

एवं सतीदमपि तत्त्वमसीति वाक्यमाश्रित्य लाक्षणिकवृत्तिमखण्डनिष्ठम्।
सोऽयं पुमानिति यथा वचनं तथास्तु नो चेत्समं तदलाबुनिमज्जनोक्त्या॥ १५१॥

लाक्षणिकवृत्त्या आत्मनः निर्वाहम्

मानान्तराधिगतगोचरगामिनी स्याच्छब्दस्य लाक्षणिकवृत्तिरिति प्रलापः।
सिद्धत्वमात्रमिह लाक्षणिकप्रवृत्तेर्निर्वाहकारण(णमितोऽन्यदनङ्गमस्याः)मनङ्गमयोऽन्यदस्याः॥ १५२॥

मानान्तराधिगतता हि न लक्षणायां किञ्चित्करी भवति पिङ्गलतावदग्नेः।
धूमस्य जन्मनि हि पिङ्गलता न हेतुर्यद्यप्यवस्थितवती हुतभुक्शरीरे॥ १५३॥

शब्दस्य लाक्षणिकवृत्तिरपि त्रिधैषा काचिज्जहाति न जहाति च वाच्यमन्या।
भागं जहाति न जहाति च भागमन्या सोऽयं त्रिधा भवति लाक्षणिकप्रकारः॥ १५४॥

गङ्गापदं हि निजमर्थमपास्य तीरे यद्वर्तते भवति सा जहाति प्रसिद्धा।
शोणः स्थितो बहिरितीह तु लक्षणायामादाय शोणिमगुणं तुरगे प्रवृत्तिः॥ १५५॥

सोऽयं पुमानिति वचस्युभयप्रकारा देशादिभागपरिवर्जनतः प्रसिद्धा।
पुंसश्च केवलमुपात्ततया पदाभ्यामेवं त्रिधा भवति लाक्षणिकी प्रवृत्तिः॥ १५६॥

वेदेऽपि लाक्षणिकवृत्तिरियं त्रिधैषा यज्ञायुधीति वचने तु जहत्प्रवृत्तिः।
वैश्वानरादिवचनेष्वजहत्प्रवृत्तिस्तत्त्वं गिरोरुभयरूपतया प्रतीतिः॥ १५७॥

ब्रह्माज्ञाने ह्यद्वितीयत्वमेकं ब्रह्मण्यन्यच्चाद्वितीयत्वमस्ति।
तत्सम्पर्कात्तत्र चाद्वैततान्या व्युत्पन्नोऽयं ब्रह्मशब्दस्तु तत्र॥ १५८॥

प्रत्यग्भावस्तावदेकोऽस्ति बुद्धौ प्रत्यग्भावः कश्चिदन्यः प्रतीचि।
प्रत्यग्भावस्तत्कृतस्तत्र चान्यो व्युत्पन्नोऽयं तत्र चात्मेति शब्दः॥ १५९॥

तच्छब्दवाच्यगतमद्वयभागमेकं प्रत्यक्तत्वमात्रमविरोधमपेक्षमाणः।
त्वंशब्दवाच्यशबलस्थमुपाददानो वाक्यादखण्ड(ण्डामिह)मथ तत्त्वमसीति विद्यात्॥ १६०॥

आदेयांशे नाणुमात्रोऽपि भेदो यद्यप्येवं भिन्नमादाय शब्दौ।
वर्तेते त्वय्य(द्वयस्वप्रकाशे)द्वयात्मप्रकाशे बाह्यं हेतुं जामिता नास्ति तस्मात्॥ १६१॥

अद्वैतेऽर्थे प्रत्यगर्थोऽस्ति तद्वत् प्रत्यक्तत्त्वे चाद्वयस्यापि भावः।
यद्यप्येवं नातिरेकावकाशः पूर्णे तत्त्वे तत्त्वमर्थोपपत्तेः॥ १६२॥

न च विनिगमनायां कारणं किञ्चिदस्ति स्फुटमुभयपदस्था लक्षणा शंस्यतेऽतः।
न हि विनिगमनायां हेत्वभावे कदाचित् क्वचिदियमुपलब्धा सोऽयमित्यादिवाक्ये॥ १६३॥

प्रथमचरमभावो निर्णये कारणं चेदयमपि नियमो न ह्यन्यथाप्यस्य दृष्टेः।
प्रथमपठितमासीत्तत्पदं सामवेदे चरमपठितमेतदृष्टमध्वर्युवेदे॥ १६४॥

सोऽयं पुमानयमसाविति पौरुषेये वाक्ये तथा व्यतिहृतेऽत्र विशेषहेतुः।
पूर्वापरत्वमिति शक्यमिदं न वक्तुं मुख्यत्वलाक्षणिकते प्रति शब्दवृत्त्योः॥ १६५॥

न च भवति विरोधस्योत्थितस्यापनीतिः पदयुगलनिविष्टां लक्षणामन्तरेण।
न हि भवति कदाचित्सद्वयस्याद्वयत्वं न हि भवति परोक्षः प्रत्यगर्थोऽपि तद्वत्॥ १६६॥

अविरुद्धविशेषणद्वयप्रभवत्वेऽपि विशिष्टयोर्द्वयोः।
घटते न यदिकता तदा नितरां तद्विपरीतरूपयोः॥ १६७॥

अथ केनचिदात्मनैकता वचनेन प्रतिपाद्यते तयोः।
तदसुन्दरमस्तमेति हि स्फुटमेवं त्रिविधापि लक्षणा॥ १६८॥

साभासाज्ञानवाची यदि भवति पुनर्ब्रह्मशब्दस्तथाहं शब्दोऽहङ्कारवाची भवति तु जहती लक्षणा तत्र पक्षे।
नौरेषा रौति लोहं दहति विषधरो रज्जुरग्रे तवासावित्यत्रेवात्मवस्तुन्यपि भवति जहल्लक्षणा को
विरोधः॥ १६९॥

प्रत्यक्तवादिगुणान्वयेन यदि वा गौण्यस्तु वृत्तिस्तयोर्ब्रह्माहम्पदयोः परेतरदृशोर्मुख्ये विरोधो यतः।
मुख्यार्थानुपपत्तिहेतुकतया गौण्यस्तु वृत्तिर्यतो लोके माणवको विभावसुरसौ सिंहः पुमानित्यपि॥ १७०॥

परशब्दवृत्तिरपरत्र भवेदिति यद्यपीदमुभयोः सदृशम्।
अनयोस्तथापि तु विभागकरं स्फुटमस्ति लक्षणमवान्तरकम्॥ १७१॥

गुणतो गुणवृत्तिरिष्यते ह्यपरा लाक्षणिकी तु सङ्गतेः।
इति भेदकमस्ति लक्षणागुणवृत्त्योरिति वेदवादिनः॥ १७२॥

नित्यःशुद्धो बुद्धमुक्तस्वभावः सत्यः सूक्ष्मः सन् विभुश्चाद्वितीयः।
आनन्दाब्धिर्यः परः सोऽहमस्मि प्रत्यग्धातुर्नास्ति संशीतिरस्ति॥ १७३॥

सच्चित्सुखाद्वयवपुः कथयन्ति केचित् सच्चित्सुखात्मकमिति प्रथयन्ति केचित्।
ब्रह्मेतराणि किल नास्य वपूँषि तेषां बुद्धौ स्फुरन्त्यपररूपनिवृत्तिभावात्॥ १७४॥

ब्रह्मेति शेषिपदमत्र हि लक्ष्यमेकं शेषाणि लक्षणसमर्पणमस्य कुर्युः।
लक्ष्यार्पणेन सह लक्षणवाचि(पूर्वं) सर्वं सङ्गच्छतेऽरुणपदं क्रयवाचिनेव॥ १७५॥

पृष्ठात्परस्परयुजाप्रतिपत्तिरेषामेवंविधत्वमुपपादयितुं समर्था।
लक्ष्यस्य तस्य महतः क्रयवस्तुवत्स्यात् सर्वस्य कारकपदस्य परस्परेण॥ १७६॥

तत्त्वम्पदार्थविषयो नय एष योज्यः सत्यादिवस्तुषु न तत्र विशेषकल्पः।
सत्यादिशब्दविषयाः शबलास्तदर्थभागेषु लाक्षणिकवृत्तिरपीह तुल्या॥ १७७॥

सत्यादिपदानाम् मुख्यार्थः (शक्त्यर्थः)

आकाशादौ सत्यता तावदेका प्रत्यङ्मात्रे सत्यता काचिदन्या।
तत्सम्पर्कात्सत्यता तत्र चान्या व्युत्पन्नोऽयं सत्यशब्दस्तु तत्र॥ १७८॥

बुद्धेर्वृत्तौ ज्ञानता तावदेका प्रत्यग्बोधे ज्ञानता काचिदन्या।
तत्सम्पर्काज्ज्ञानता तत्र चान्या व्युत्पन्नोऽयं ज्ञानशब्दस्तु तत्र॥ १७९॥

बुद्धेर्वृत्तौ तावदानन्दतैका प्रत्यङ्मात्रे काचिदानन्दतान्या।
तत्सम्पर्कात्तत्र चानन्दतान्या व्युत्पन्नोऽयं तत्र चानन्दशब्दः॥ १८०॥

आकाशादौ नित्यता तावदेका प्रत्यङ्मात्रे नित्यता काचिदन्या।
तत्सम्पर्कान्नित्यता तत्र चान्या व्युत्पन्नोऽयं नित्यशब्दस्तु तत्र॥ १८१॥

आकाशादौ शुद्धता तावदेका प्रत्यङ्मात्रे शुद्धता काचिदन्या।
तत्सम्पर्काच्छुद्धता तत्र चान्या व्युत्पन्नोऽयं शुद्धशब्दस्तु तत्र॥ १८२॥

गोवत्सादौ मुक्तता तावदेका प्रत्यङ्मात्रे मुक्तता काचिदन्या।
तत्सम्पर्कान्मुक्तता तत्र चान्या व्युत्पन्नोऽयं मुक्तशब्दस्तु तत्र॥ १८३॥

आकाशादावस्तिता तावदेका प्रत्यक्तत्वे चास्तिता काचिदन्या।
तत्सम्पर्कादस्तिता तत्र चान्या व्युत्पन्नोऽयं तत्र चास्तीति शब्दः॥ १८४॥

यो यः शब्दो यत्कृतेऽर्थे निरूढस्तत्रैवार्थे लक्षणावृत्तिरस्य।
वक्तव्या स्यात्पण्डितैरेवमेतत् प्रत्यक् पूर्णं ब्रह्म वेदान्तवेद्यम्॥ १८५॥

सत्यादीनां लाक्षणिकया अभिन्नत्वम्

सत्येऽप्यस्ति ज्ञानता ज्ञानतायां सत्यत्वं च स्पष्टमस्त्येव तद्वत्।
सत्यप्येवं नातिरेकावकाशः पूर्णे तत्त्वे ज्ञानसत्योपपत्तेः॥ १८६॥

आनन्दत्वे ज्ञानता ज्ञानतायामानन्दत्वं विद्यते निर्विशङ्कम्।
सत्यप्येवं नातिरेकावकाशः पूर्णे तत्त्वे ज्ञानसौख्योपपत्तेः॥ १८७॥

आनन्दत्वे सत्यता सत्यतायामानन्दत्वं निर्विवादं प्रसिद्धम्।
सत्यप्येवं नातिरेकावकाशः पूर्णे तत्त्वे सत्यसौख्योपपत्तेः॥ १८८॥

शेषेऽप्यूह्यं न्यायसाम्यादशेषमन्योऽन्यस्मिन्नस्तिता पूर्णता च।
अन्योऽन्यस्याजामिता शब्दशक्तैरेवं सुस्थं सर्वमुक्तोपपत्तेः॥ १८९॥

बोधात्मत्वे निर्निमित्ते प्रतीचो बोधात्मत्वे तन्निमित्ते तु बुद्धेः।
बोधात्मत्वे बुद्धिधर्मौ च बुद्धेरुक्ते साक्षाद्वेदसिद्धान्तविद्भिः॥ १९०॥

जहतीह च लक्षणा मता गुणवृत्तिश्च तथाभ्युपेयते।
न विशेषविनिर्णयक्षमं किमपीहास्ति विशेषकारणम्॥ १९१॥

ऐश्वर्यं न आत्मस्वभावं

ऐश्वर्यमप्यनुभवादिवदात्मरूपं तस्मादबोधगतमस्य च तानि कस्मात्।
नेष्टानि पूर्ववदिति ब्रुवतो मुखस्य सद्यः पिधानमनुसृत्य वचाँसि कुर्मः॥ १९२

ऐश्वर्यवर्णनमतिस्फुटमेव कृत्वा नेतीत्यवादि बहुशः श्रुतिभिः प्रयत्नात्।
सत्यादिवस्तुनि पुनर्न तथास्ति पूर्वमुक्त्वा निषेधनमितीह विशेषयुक्तिः॥ १९३॥

शब्दस्य लाक्षणिकमुख्यविभागभिन्ना वृत्तिर्हि लौकिकवचस्युपलब्धपूर्वा।
यस्मादतो न घटते यदि मुख्यवृत्तिराश्रीयतामिह गिरश्चरमापि वृत्तिः॥ १९४॥

तस्मादखण्डमवबोधयितुं समर्थो वेदान्तभूमिगतशब्दसमन्वयोऽतः।
संसर्गलक्षणमपास्य विरोधहेतोर्वाक्यार्थमद्वयमखण्डमिहाश्रयस्व॥ १९५॥

आत्मज्ञानोत्पत्तिक्रमम्

सामानाधिकरण्यमत्र भवति प्राथम्यभागन्वयः पश्चादेष विशेषणेतरतया पश्चाद्विरोधोद्भवः।
उत्पन्ने च विरोध एकरसके वस्तुन्यखण्डात्मके वृत्तिर्लक्षण्या भवत्ययमिह ज्ञेयः क्रमः सूरिभिः॥ १९६॥

सामानाधिकरण्यमत्र पदयोर्ज्ञेयस्तदीयार्थयोः सम्बन्धस्तु विशेषणेतरतया ताभ्यां सहास्यात्मनः।
सम्बन्धोऽप्यथ लक्ष्यलक्षणतया विज्ञेय एवं बुधैरेतान्यर्थपदानि बुद्धिपदवीमारोहणीयानि तु॥१९७॥

निःसन्धिबन्धनमिदं चिदचित्स्वरूपं सङ्कीर्णमन्तरपरिस्फुरणेन शून्यम्।
आचित्तशुद्धिफलतः स्फुरितोपपत्तेः शब्दार्थसङ्गतिमिहैव तु गृह्णतऽज्ञाः॥१९८॥

शब्दार्थसङ्गतिविदामथ सत्त्वशुद्धेरुत्पन्नतर्कदृढलोहशलाकया तु।
दृश्यं दृशं च निपुणं द्वयमन्तरेण निक्षिप्तया दृगदृशोः क्रियते विभागः॥१९९॥

शुष्युत्थतर्कजनितं चिदचिद्विभागं प्राप्य स्थिताः पुनरिमां गिरमुद्विरन्ति।
सत्यादिशब्दगण एष तु तत्र तत्र व्युत्पत्तिमान् शबलवस्तुनि नो दृशीति॥२००॥

एकत्र शक्तिग्रहणोपपत्तावनेकक्लृप्तिः क्रियते किमर्थम्।
इत्येतदेवं सति नास्ति चोद्यं पुरास्य पुंसः परमाविवेकात्॥२०१॥

अत्राह वाच्यशबलान्वितवस्तुनीयं तद्वर्त्मना भवति लाक्षणिकी प्रवृत्तिः।
किं वा तदन्वितविलक्षणवस्तुनि स्याच्छब्दस्य नोभयमपि प्रतिभाति युक्तम्॥२०२॥

सम्बन्धिरूपं यदि वतु लक्ष्यं अखण्डवाक्यार्थमतिः कुतस्त्या।
अनन्वितं वस्तु पदार्थलभ्यं न लक्ष्यते कुत्रचिदत्र लोके॥२०३॥

पूर्वक्षणे भवति वाच्यपदार्थभागभागित्वसङ्गतिरिहात्मनि निर्विभागे।
मोहोपदर्शितवपुर्घटते ततोऽस्मिञ्छब्दस्य लाक्षणिकवृत्तिरदोषदुष्टा॥२०४॥

सम्बन्धिता भवति लाक्षणिकप्रवृत्तेः सर्वत्र कारणमितीदमभीष्टमेव।
सम्बन्धिताकरणमेव तु लाक्षणिक्या बुद्धेरनिष्टमिह तद्व्यभिचारदृष्टेः॥२०५॥

यत्रैष काक इदमेव तु देवदत्तवेश्मेति लाक्षणिकवृत्तिरिहाभ्युपेता।
काकास्पदत्वमवधीर्य तथापि वेश्ममात्राकृतिर्भवति लाक्षणिकी तु बुद्धिः॥२०६॥

सोऽयमित्यपि पदार्थरूपकं लक्षणं यदुपलक्षणं हि तत्।
अंशिता यदि पदार्थलक्ष्ययोर्गृह्यते ननु पुनर्विरोधिता॥२०७॥

एवं तावल्लक्षणावृत्तिहेतोरानीतैषाखण्डवाक्यार्थबुद्धिः।
मुक्त्वापीमां लक्षणावृत्तिमेषा वक्तुं शक्येत्युच्यतेऽनन्तरेण॥२०८॥

भिन्नाभिन्नरवौ घटादिवचसा साकं समुच्चारितावन्यूनानधिके घटादिविषये तावत्प्रवृत्तौ तव।
नो चेद्विश्वसृजोऽपि दुष्परिहरा भेदादिमालाऽऽगता भेदादेरपि तत्र वाच्यमपरं भेदादिकं स्यादिति॥२०९॥

परस्पराभावमुपाददानो निमित्तमर्थेषु हि भिन्नशब्दः।
प्रवर्ततेऽन्ये तु घटादिशब्दा निजं निजं वाच्यमुपाददानाः॥२१०॥

परस्पराभावविहीनभावादभिन्नशब्दस्य घटे प्रवृत्तिः।
घटस्वरूपैकनिबन्धना तु घटादिशब्दस्य घटे प्रवृत्तिः॥२११॥

अबोधनाशश्चितिरित्यमुष्मिन् पदद्वये त्वेकरसात्मनिष्ठे।
अगौणमेकं पदमन्यदत्र द्वितीयवृत्तीतरसङ्गमाय॥२१२॥

अज्ञाननाशपदमत्र हि मुख्यमिष्टं विद्यानिबन्धननिवृत्ति(समर्पणत्वात्) समर्पकत्वात्।
तेनान्वयाय चितिवाचि पदं स्ववाच्ये सौवं समुज्झति मतेः परिणामरूपम्॥२१३॥

विधिपदानि हि भागसमर्पणादपरभागनिराकरणादपि।
अविषयात्ममतिं जनयन्ति नो न तु मृषार्थनिवृत्तिगिरस्तथा॥२१४॥

भेदो भिन्नश्चातिरेकोऽतिरिक्तोऽभेदोऽभिन्नः संविदः स्वप्रकाशाः।
इत्येतस्मिन् विद्यते नार्थभेदो वेदान्तानामप्यखण्डस्तथार्थः॥२१५॥

एवं तावदखण्डवस्तुविषयः शब्दान्वयो दर्शितो लोके दृष्टनयेन पाणिनिवचोऽप्यस्यैव संसूचकम्।
येनायं स्मरति प्रकृत्यभिहिते वृक्षादिके केवले तन्मात्रे प्रथमेति सूत्रवचसैवाद्यां विभक्तिं मुनिः॥२१६॥

सामानाधिकरण्यमन्वयगिरा हेतुं वदत्यादरात् तस्यैवाथ विशेषणं समिति च व्यावृत्तये गृह्यते।
गौणान्मुख्यमयं भिनत्ति भगवान् व्यावर्तकेनामुना नीलेनोत्पलवस्तुवत् स्फुटतरद्वैविध्यसद्भावतः॥२१७॥

तद्धि द्विधैकाधिकरण्यमुक्तं गौणं च मुख्यं च विविच्य सद्भिः।
संसर्गरूपार्थनिवेशि गौणं मुख्यं त्वखण्डार्थनिविष्टमाहुः॥२१८॥

आदाय नानाविधकारणानि गिरामथैकत्र तु या प्रवृत्तिः।
तामाहुरैकाधिकरण्यनाम्ना विपश्चितो वेदशिरःसु विप्राः॥२१९॥

नीलं सुगन्धि महदुत्पलमम्बुशायीत्येवम्प्रकारमिह गौणमुशन्ति सन्तः।
सोऽयं पुमानुदशरावगतो विवस्वानाकाशगो रविरसाविति मुख्यमाहुः॥२२०॥

एकत्र वृत्तिरिति लक्षणमत्र मुख्यं संसर्गवस्तुनि पुनर्न हि तद्घटेत।
नानारसे हि विषये वचसां प्रवृत्तिर्नीलं सुगन्धि महदुत्पलमित्यमीषाम्॥२२१॥
नानाविधैर्बहुभिरेव निमित्तभेदैर्भिन्नेषु वस्तुषु गिरामथ या प्रवृत्तिः।
सर्वत्र वैयधिकरण्यमिति प्रसिद्धा सा शब्दवृत्तिकुशलव्यवहारभूमौ॥२२२॥

अभिन्नहेतुर्विषये समाने विभिन्नवाचामथ या प्रवृत्तिः।
पर्यायनाम्ना(ऽभिवदन्ति) प्रवदन्ति धीराः प्रवृत्ति(मेतां)मेनां वचसां बहूनाम्॥२२३॥

कुड्यं गृहस्य सरसोऽम्बुजमस्य वस्त्रमित्यत्र वैयधिकर(ण्यमिति)ण्यमपि प्रसिद्धम्।
एवं मुखं वदनमाननमित्यमीषां पर्यायतापि विदितैव पुरोक्तहेतोः॥२२४॥

पर्यायता न खद्द तत्त्वमसीति वाक्ये नापीह सम्भवति भेदकभेद्यभावः।
तत्त्वम्पदार्थगतमेकरसैकभागं तत्त्वम्पदे समुपलक्षयतो विरोधात्॥२२५॥

प्रकृष्टप्रकाशध्वनी व्यक्तिमेकां यथा लक्षणावर्त्मनोपक्षिपेताम्।
शशाङ्कादिशब्दार्थसङ्कीर्तने सच्चिदानन्दशब्दाः परं ब्रह्म तद्वत्॥२२६॥

न नीलोत्पलाद्या गिरो व्यक्तिनिष्ठाः स्ववाच्यार्थसंसर्गमात्राभिधानात्।
विरोधे हि वाच्यच्युतिर्नाविरोधे गिरां लक्षणाऽत्रापि चेदस्तु साम्यम्॥२२७॥

न नीलत्वजात्याश्रयव्यक्तितः स्याद्विभिन्नोत्पलत्वाश्रयव्यक्तिरेषा।
तथैवोत्पलत्वाश्रयव्यक्तितः स्यान्न नीलत्वजात्याश्रयव्यक्तिरन्या॥२२८॥

न नीलोत्पलादिप्रदेशेषु किञ्चिद्गिरां लक्षणाकारणं तेन तत्र।
न नीलोत्पलत्वादिकव्यक्तिनिष्ठा गिरस्ता भवेयुः प्रमाणाद्दते नः॥२२९॥

इदमुपेत्य किमप्युदितं मया न तु तयोरभिदा परमार्थतः।
गुणगुणित्वकृतोऽतिशयस्तयोर्भवति लक्षणयापि गृहीतयोः॥२३०॥

प्रकृष्टप्रकाशत्वजाती हि लोके प्रकृष्टप्रकाशाभिधानाभिधेये।
तयोरन्वये कीर्त्यमाने तु ताभ्यां शशाङ्काभिधानाभिधेयं न लभ्यम्॥२३१॥

शशाङ्काभिधानाभिधेये हि पृष्टे तदेवोत्तरेणापि निर्णेयमत्र।
प्रकृष्टप्रकाशत्वजात्यन्वयोऽयं तदाक्षिप्ततद्व्यञ्जकव्यक्तिनिष्ठः॥२३२॥

शशाङ्काभिधानाभिधेयो न चेष्टः शशाङ्कस्य तेजो विशेषत्वहेतोः।
ततश्चोपपन्ना जहल्लक्षणातः पुरोक्ता पदाभ्यामखण्डार्थसिद्धिः॥२३३॥

प्रकर्षः प्रकाशातिरिक्तो न चात्र प्रकाशः प्रकर्षातिरिक्तो न चात्र।
बहिश्चन्द्रमस्ति स्वरूपातिरेकस्तयोश्चन्द्रमस्येकतैवातिमात्रम्॥२३४॥

न चन्द्रप्रकाशप्रकर्षम् प्रकाशात्तदीयात्पृथक्कश्चिदुत्पश्यतीह।
तथास्य प्रकर्षप्रकाशं प्रकर्षात्ततो नानयोरस्ति भेदे प्रमाणम्॥२३५॥

तथा सच्चिदानन्दशब्दास्तदर्थं तथा तत्त्वमावात्मनो ब्रह्मभावम्।
विरोधान्मिथो लक्षणावर्त्मनेमौ किमर्थं न सम्भूय वक्तुं समर्थौ॥२३६॥

प्रत्यक्तत्वं लक्षयेत्त्वं पदार्थस्तच्छब्दार्थो लक्षयेदद्वितीयम्।
एवं पूर्णं प्रत्यगात्मानमेतौ शब्दौ ब्रूतो लक्षणावर्त्मनैव॥२३७॥

पारोक्ष्यं च ब्रह्मणि प्रत्यगर्थे दुःखित्वं च ध्वान्त(भ्रान्त)सम्भूतमाहुः।
सम्यग्ज्ञानध्वस्तमोहस्य पुंसः प्रध्वंसेते हेत्वभावेऽफलत्वात्॥२३८॥

शब्दाः मुख्यया वृत्त्या आत्मानं न प्रकाशते

षष्ठीजातिगुणक्रियादिरहिते सर्वस्य विज्ञातरि प्रत्यक्षे परिवर्जिताखिलजगद्वैतप्रपञ्चे दृशौ।
सन्त्यक्तव्यवधानके परमके विष्णोः पदे शाश्वते त्वय्यज्ञान(विजृम्भिताः)विनिर्मिता न हि गिरो
मुख्यप्रवृत्तिक्षमाः॥२३९॥

आस्तामत्र वचः प्रवृत्तिविरहः प्रत्यक्तत्वहेतोर्दृशि व्यापाराय मनोऽपि न प्रभवति भ्राम्यत्परागभूमिषु।
एवं चेदखिलप्रमाणपदवीः षोढा विभिन्ना भवान् उल्लङ्घ्य व्यवतिष्ठते त्वयि गिरः स्यान्मुख्यवृत्तिः
कथम्॥२४०॥

आत्मानं न तु कर्मतामुपनयञ्छब्दो वदेल्लक्षणामार्गेणापि यतः परागविषयवन्नास्येष्यते कर्मता।
प्रत्यक्ता हि विरुध्यते यदि भवेदस्यात्मनः कर्मता यद्यत्कर्म न तस्य तस्य भवति प्रत्यक्स्वभावो
यतः॥२४१॥

वागादेः खद्द बाह्यवस्तुविषयो नात्मा यतो नात्मनि व्यापारं करणस्य कस्यचिदपि पेक्षामहे न्यायतः।
यत्किञ्चित्करणं जगत्त्रयगतं तत्प्रत्यगात्मेक्षितं बाह्ये वस्तुनि वर्ततेऽनुभवनं तत्र प्रमाणं मतम्॥२४२॥

प्रत्ययूपमतो न शब्दविषयो बुद्धेरवेद्यं यतो बुद्धिर्यत्र हि वर्तते स विषयः शब्दस्य नात्मन्यसौ।
तेनात्मानमसौ न गोचरयितुं शब्दः क्षमो मुख्यया वृत्त्यै(वृत्त्या)वेतरयापि तेन न तया तस्यात्मनः
कर्मता॥२४३॥

आत्मविषये उपनिषदः एव प्रमाणम्

नन्वज्ञेयमिदं भवेद्यदि मम प्रत्यक्स्वरूपं ततः प्रमाण्यं कथमस्य वेदशिरसस्तत्र प्रतिज्ञायते।
यन्मेयं न भवेत्कदाचिदपि तद्वेदान्तवेद्यं भवेत् इत्येतद्वचनं पराहतपदं वक्तुं न युक्तं बुधैः॥२४४॥

नैतद्वस्तुनि कल्पितस्य जगतो वाक्यप्रसूतप्रमाबुद्धिर्मूलधगिष्यते तव निजस्वाकारमात्रग्रहात्।
कर्मत्वं न करोति वाक्यजनिता बुद्धिः स्वरूपे तव स्वाकारग्रहणेन केवलमियं संसारमूलं दहेत्॥२४५॥

सम्विद्व्युत्पादकं यद्वचनमभिमतं कर्ममीमांसकानां तत्कर्मत्वं न तावत्क्षिपति घटपटाद्यर्थसंवित्स्वरूपे।
किन्त्वज्ञानापनुत्त्या फलवदभिमतं तत्र शिष्यस्य तद्वत् सर्वं वेदान्तवाक्यं फलवदिदमपि प्रत्यगात्म-
स्वरूपे॥२४६॥

अकार्यस्वरूपस्य कार्यत्वमिष्टं यथा कारकैर्मूर्तमुत्सारयद्भिः।
तथैवाप्रमेयस्य मेयत्वमिष्टं(त्वमस्य) प्रमाणैस्तमस्तज्जमुत्सा(स्तद्वदुत्सा)रयद्भिः॥२४७॥

वाक्योत्थापितबुद्धिवृत्तिरमला यज्ञादिभिर्निश्चला वेदन्तश्रवणादिभिः स्फटिकवत् स्वच्छ सती तावकम्।
रूपं दर्पणवद्बिभर्ति परमं विष्णोः पदं सन्निधेरेतस्मादिह(दथ) कारणादथ भवेत्संसारबीजक्षयः॥२४८॥

एवं वेदशिरः प्रमाणमुदितं प्रत्यक्स्वरूपे तव कर्मत्वं विरहय्य तत्र न हि नो बाधः प्रतिज्ञागिरः।
कर्मत्वं न करोति बोधयति च स्पष्टं वचो वैदिकं रूपं तावकमेवमस्य भवति प्रामाण्यमत्रात्मनि॥२४९॥

पृष्ठेन पूर्ववपुषा क्रियते प्रतीतिर्नेतीति वाक्यजनिता जगतो निषेद्ध्री।
प्राधान्यमस्तु विधिना सममेव तस्मात् तस्याथ वा भवतु तद्वचनं प्रधानम्॥२५०॥

अद्वैतीकरणं निषेधवचनादुत्पन्नबुद्धेरपि तुल्यं तत्त्वमसीति वाक्यजनितप्रत्यक्प्रतीत्या सह।
आर्थं शाब्दमथापि वा भवतु तत्किं तेन यद्वा विधिर्नाकर्तुं शबलार्थगोचरतया निर्भेदमर्थं क्षमः॥२५१॥

सम्बन्धजातविरहान्न च लक्षणास्मिन् सम्भाव्यते परिहृताखिलदृश्यराशौ।
ब्रह्मात्मवस्तुनि ततः प्रतिषेधवाक्यशेषत्व(मेति)मेतु विधिरित्यपि केचिदन्ये॥२५२॥

वाक्यं मुक्तिफलां धियं जनयति स्पष्टं विधिव्यापृतं साक्षादेव तव स्वरूपकथनान्नैवं निषेधात्मकम्।
अध्यारोपितरूपभेदविलयव्यापारनिष्ठं तव स्वाकारग्रहणक्षमां न हि धियं कर्तुं समर्थं यतः॥ २५३॥

अस्थूलादिवचः समुत्थितमतिर्नाकारमादास्यते साक्षाद्द्वयवस्तुनस्तव विभोरज्ञानविच्छेदिनः।
अज्ञातस्य हि वस्तुनो न हि धिया स्वाकारसंवेदनं मुक्त्वा तद्विषयस्य विभ्रमकृतो ध्वान्तस्य
विध्वंसनम्॥ २५४॥

रज्वज्ञानविजृम्भितस्य फणिनो रज्जुप्रकाशक्षमं विज्ञानं विरहय्य न प्रशमनं दृष्टं निषेधे कृते।
तद्वत्प्रत्यगविद्यया विरचितं संसारदुःखं न तत्संवित्तिं विरहय्य शाम्यति धिया नेतीति शब्दोत्थया॥ २५५॥

अस्थूलादिवचो निषेधकतया भेदस्य संशोधनाद्वाक्यार्थान्वयसिद्धये नु(तु) घटते वाच्यार्थलक्ष्यार्थयोः।
एवं तत्त्वमसीति वाक्यगतयोस्तत्त्वम्पदोक्तार्थयोः संशुद्ध्यैव तु नेति नेति वचनं मोक्षाय साक्षान्न तु॥ २५६॥

अन्ये पुनर्विधिवचोजनितात्मबुद्धिसामर्थ्यसिद्धमनुवक्ति निषेधवाक्यम्।
द्वैतोपमर्दमिति शासति शिष्यवर्गे तच्च प्रशस्तमनवद्यमभीष्टमेव॥ २५७॥

दृष्टश्च रज्जुविधिनावगतार्थवस्तुसामर्थ्यसिद्धभुजगप्रशमानुवादः।
रज्जुस्तवाग्रत इयं न भुजङ्गमोऽयमित्यत्र तद्वदिह योजयितव्यमेतत्॥ २५८॥

अस्यैव तत्त्वविनिवेदनशक्तिभाजः संसारमूलविनिवृत्तिफलप्रसूतौ।
सामर्थ्यमस्ति पटुभिः परिबृंहितत्वाद्वेदान्तभूमिगतपञ्चविधार्थवादैः॥ २५९॥

सृष्टिस्थितिप्रलयसंयमनप्रवेशव्यापारजातकथनच्छलतः प्रवृत्तेः।
सानुग्रहादवगतिः खलु तत्त्वमादेर्वाक्यात्परस्य घटते न ततोऽपरस्मात्॥ २६०॥

सूत्रं तत्तु समन्वयादिति विधिव्यापारनिष्ठं वचो मोक्षायेति निवेदनाय कृतवान् वेदान्तवेदी मुनिः।
न्यायेनाकलयन्नशेषवचनव्यापारमूरीकृतस्वातन्त्र्यः सकलेऽपि वेदशिरसि स्वैरं चरन्नीश्वरः॥ २६१॥

वाक्यार्थान्वयितत्पदार्थकथने नेतीति वाक्यं पुनः साक्षात्सूचयति स्म सूत्रकृदतस्तत्तत्परं निश्चितम्।
एवं हस्ततलार्पितामलकवत्तात्पर्यसंवेदने सत्यन्यादृगुदीरयन्ति यदि तत्क्षन्तुं कथं शक्नुमः॥ २६२॥

सत्यं ज्ञानमनन्तमित्यभिहिते सम्भावनाऽऽनीयते नास्थूलादिवचः समुद्भवधिया द्वैतोपमर्दं विना।
तेनावान्तरवाक्यलक्ष्यविषयां बुद्धिं दृढीकुर्वता सर्वद्वैतनिषेधकेन वचसा वाक्यार्थधीर्जन्यते॥ २६३॥

अस्थूलादिवचोनिरस्तनिखिलद्वैतप्रपञ्चं परं जाग्रत्स्वप्नसुषुप्तिवर्जितमिदं प्रत्यक्स्वरूपं तथा।
एकीकृत्य परस्परेण पदयोरर्थद्वयं तत्त्वतः प्रत्यक् चाद्वयमद्वयं च तदिति प्रेक्षस्व निःसंशयम्॥ २६४॥

अद्वैतं परिशोधितं भगवतो विष्णोः परं यत्पदं तच्छब्देन समर्पितं परिहृतानादेयमात्मप्रभम्।
यच्चोपाधिविवर्जितं तव निजं साक्षात्स्वरूपं तयोरेकत्वं परिवर्जितव्यवधिकं प्रत्यक्षमीक्षस्व भोः॥ २६५॥
अनृतजडविभक्तदुःखतुच्छासहनवपुः परमं पदं मुरारेः।
परिहृतसकलप्रपञ्चमात्मा तव तदवेहि तमो निरस्य वाक्यात्॥ २६६॥

श्रद्धत्स्व सोम्येति हि शास्ति शास्त्रं श्रद्धाधनत्वश्रुतिरस्ति चान्या।
श्रद्धा तु यस्येत्यपरं च वाक्यमधीयते संशयकुत्सनाय॥ २६७॥

अज्ञो विनश्यति पुमानतिमूढभावादश्रद्धयोपहतबुद्धिरतोऽपि कष्टः।
कष्टाच्च कष्टतर एव तु संशयात्मा दुःखी सदेति भगवानपि वासुदेवः॥ २६८॥

रूपं तावकमुज्झितद्वयमभूदद्वैतमेवाञ्जसा तच्चाद्वैतमपास्य मोहजनितं पारोक्ष्यमात्मा ह्यभूत्।
एवं वेदशिरः पदान्वयवशादेकत्वमेकान्ततः सिद्धं प्रत्यगनन्तयोरिति तव श्रेयः समाप्तिं गतम्॥ २६९॥

सम्बन्धः समवाय इत्यपि पदे वैशेषिकोच्चारिते नाखण्डव्यतिरिक्तवस्तु वदितुं शक्तोऽनवस्थाभयात्।
पञ्चानां समवायितेति वचनव्याघातभीतेरपि सम्बन्धान्तरमस्य नाभिमनुते वैशेषिकः कातरः॥ २७०॥

शब्दो गकार इति लौकिकमस्ति वाक्यं विस्पष्टमस्ति च पदद्वयमत्र वाक्ये।
प्राभाकरे च समये न गकारमात्रादन्यत्पदद्वयनिगद्यमभीष्टमस्मिन्॥ २७१॥

शब्दत्वजातिवचनो न हि शब्दशब्दः श्रोत्रोपलम्भनतया तु निबन्धनेन।
वर्णान् ब्रवीति न हि जातिरिहाभ्युपेता साक्षाद्गकारमयमाह गकारशब्दः॥२७२॥

तस्मादखण्डविषये वचने विवादं प्रभाकराः परिहरन्तु न चेदशक्यम्।
निर्वोढुमेतदिह वाक्यमितोऽन्यथा चेदस्यार्थकल्पनमभीप्सितमिष्टहानिः॥२७३॥

प्रातिपादिकान्यनतिरिक्तविषयाणि प्राह भगवान् प्रथमशब्दितविभक्त्या।
पाणिनिरतः सकलतर्कसमयज्ञो वष्टि वचसोरनतिरिक्तविषयत्वम्॥२७४॥

इयं घटव्यक्तिरितीदृशेषु च प्रसिद्धमेवैकरसार्थगोचरम्।
पदद्वयं लोकवचःसु तेन च प्रशस्यते नात्र विवादसङ्गहः॥२७५॥

न च प्रमाणान्तरयोग्यतायां प्रयोजकं स्यात्परिनिष्ठितत्वम्।
यतः प्रमाणान्तरयोग्यतायां प्रयोजकं रूपरसादिमत्त्वम्॥२७६॥

ततस्तु रूपादिविहीनरूपे प्रमान्तरागोचरचित्स्वरूपे।
वचः प्रमाणान्तरनिःस्पृहं सत् प्रमाणमात्रात्मनि निर्विवादम्॥२७७॥

लोकप्रसिद्धपदगोचरतानिमित्तमन्यप्रमाणविषयत्वमिह प्रसिद्धम्।
लोकप्रसिद्धपदगोचरता न चास्मिन् ब्रह्मात्मनीति च तदत्र निवारणीयम्॥२७८॥

लोकप्रयुक्तपदगोचरतास्ति कार्ये तेनास्तु कार्यपरवाक्यमशेषतस्ते।
मानान्तरेषु परतन्त्रतया प्रमाणं स्वार्थे न दूषणमिदं श्रुतिमस्तकेषु॥२७९॥

न च क्रियाकारितसंहतीनि पदानि लोके नियमेन वक्तुम्।
समीहते पक्वमतिः पदानां क्रियां विनाप्यन्वयदर्शनेन॥२८०॥

महीभुजोऽयं पुरुषो मनस्वी वनस्पतेस्तत्फलमित्यपीह।
क्रियां विनाप्यन्वयवन्ति लोके पदानि दृष्टानि बहूनि वक्तुः।॥२८१॥

क्रियापदं वेदशिरःस्वपीष्यते विवक्षितार्थानुगुणं तु तन्मतम्।
विवक्षितार्थप्रतिपत्तिघाति तु क्रियापदं स्वीकृतमप्यनर्थकम्॥२८२॥

अस्त्यस्म्यसीति च पदं प्रचुरं क्रियाया वेदान्तवाक्यगतमादरतः पठन्ति।
तन्मात्रतः सकलवेदशिरः पदानां सङ्घातसिद्धिरिति वेदशिरोनिषण्णाः॥२८३॥

यत्तु प्रमाणभूतिरिति प्रमाणसामान्यलक्षनमनूद्य पुनर्वदन्ति।
सत्ताप्रमाणघटनां प्रति योग्यतातो नास्त्यर्थनिष्ठवचनेष्वनपेक्षतेति॥२८४॥

तदुर्घटं न खद्दृ संविदियं स्वयोग्या न ह्यात्मनि स्थितिमुपैष्यति योग्यतास्याः।
वस्त्वन्तरोपनिहितस्वपदत्वहेतोर्न ह्यात्मरूपदहने दहनस्य शक्तिः॥२८५॥

संवित्प्रमाणघटनां प्रति योग्यतां चेन्नेयं बिभर्ति न सती भवितुं समर्था।
तद्योग्यतैव यदि मातृघटादिसत्ता तस्याप्यसत्त्वमिति शून्यमुपाजिहीथाः॥२८६॥

वस्तुस्वभाव इति सत्त्वमतो गृहाण तच्च द्विधेति वितथावितथत्वभेदात्।
सत्त्वं द्विरूपमितरेतरसङ्करेण सच्छब्दवाच्यमिति च व्यवहारकाले॥२८७॥

उत्सृज्य तत्र वितथांशमथेतरस्मिन् संवित्स्वरूपपरमार्थसति स्वरूपे।
बुद्धिं कुरु प्रणिदधत्प्रणयेन भूम्नि ब्रह्माहमस्मि परमार्थसदित्यजस्रम्॥२८८॥

ब्रह्म स्वयम्प्रभमतः शबलेषु तस्य मानन्तरानधिगतेष्वपि शब्दशक्तिः।
रूपेषु वृद्धजनसंव्यवहारहेतोः शक्या ग्रहीतुमुदितेन पथानभिज्ञैः॥२८९॥

लोकप्रसिद्धार्थपदान्तराणां समीपसङ्कीर्तनतोऽपि शक्तिः।
ब्रह्मादिशब्दस्य सुखावसेया यथा हि यूपादिगिरस्तथैव॥२९०॥

विनापि शक्तिग्रहणं पदानां परात्मनोर्वाचकभावभाजाम्।
भवेत्परब्रह्मणि वेदवाक्यात् प्रतीतिरन्यप्रतिषेधनेन॥२९१॥

नञः प्रपञ्चप्रतिपादकस्य च प्रतीत्य शक्तिं व्यवहारतः स्थितः।
पदस्य शक्नोति परं समीक्षितुं श्रुतेः प्रपञ्चप्रतिषेधमार्गतः॥२९२॥

ब्रह्मास्मीति वचोनिविष्टपदयोर्मानं भवेदन्वयः साक्षादद्वयवस्तु तस्य च भवेन्मेयं ततस्तद्गतेः।
यद्यत्र प्रमितिं करोति भवति प्रामाण्यमत्रास्य च स्पष्टं दृष्टमिदं हि युक्तिघटितं रूपे यथा चक्षुषः॥२९३॥

मानन्तरानधिगतं परिनिष्ठितं यद्वेदः समर्पयति चेतसि तत्परः सन्।
तत्तथ्यमेव भवतीति समाश्रयस्व श्रेयस्करो विधिगिरोऽवगतो यथैव॥२९४॥

निष्पन्नमेव यदि वा पुरुषप्रयत्ननिष्पाद्यमस्तु तदनङ्गमिह प्रमेये।
एवं विधिर्भवतु शब्दसमन्वयो वा प्रामाण्यकरणमिदं न वदन्ति सन्तः॥२९५॥

नीलैकगोचरतया नियतं न चक्षुर्नाप्यस्य पीतविषये नियमोऽस्ति शक्तेः।
तद्वन्न वेदवचसामपि शक्तियोगः कार्यादिवस्तुषु कथञ्चन पक्षपाती॥२९६॥

यद्वादरायणमतं परिगृह्य पूर्वं श्रेयस्करेऽनधिगते खलु चोदनायाः।
प्रामाण्यमुक्तमिदमस्य समन्वयस्य वस्तुस्वरूपकथनेऽप्यविशिष्टमस्ति॥२९७॥

मानन्तरानधिगतं त्ववगम्यमानं मेयं भवेदिति हि मेयविदो वदन्ति।
मानान्तरानधिगते विषयेऽवबोधं कुर्वत्प्रमाणमिति मानविदं प्रसिद्धिः॥२९८॥

एवं सतीह यदि वेदशिरो न मानं श्रेयस्करे विधिगिरोऽपि न मानता स्यात्।
श्रेयस्करे विधिगिरो यदि मानता स्यात् वस्तुस्वरूपकथनेऽपि समन्वयस्य॥२९९॥

वस्तुस्वरूपकथने ननु नास्ति पुंसः किञ्चित्फलं विधिवचःसु पुनः प्रवृत्तिः।
सम्भाव्यते फलमतः किल वस्तुनिष्ठं वाक्यं विधिस्तुतिपरं त्विति जैमिनीयाः॥३००॥

स्यादेतदेवमनवद्यपुमर्थसिद्धिर्वेदान्तवेद्य(वाक्य)विषयावगतौ न चेत्स्यात्।
स्वाराज्यमत्र कबलीकृतभोगभूमिसम्पूर्णमस्य विदुषो भवतीति दृष्टम्॥३०१॥

यस्यापि विप्रुषि(विप्लुषि) कृतार्थतया निषण्णाः शक्रादयो जलचरा इव सागरस्य।
प्रत्यक्स्वभावकमपास्तसमस्तदुःखं तद्वैष्णवं सुखमवाप्तवतः किमन्यत्॥३०२॥

अज्ञानमात्मविषयं (भ्रमहेतु)भवहेतुभूतं प्रच्छादकं च परमात्मसुखस्य तूर्णम्।
त्रय्यन्तवाक्यजनितात्ममतिर्विपाकमासाद्य हन्ति यदि तत्र किमर्थनीयम्॥३०३॥

करमुष्टिनिविष्टमुत्तमं कनकं प्रस्मरणादलब्धवत्।
प्रतिभाति तदाप्तवाक्यतः प्रतिपत्त्या लभते यथा जनः॥३०४॥

परमात्मपदं पराकृतद्वितयं प्राप्तमपि स्वभावतः।
अनवाप्तवदेव लिप्सते लभते चैवमयं प्रमाणतः॥३०५॥

न स्वाध्यायवदाप्यता न च पुनस्त्रेताग्निवज्जन्यता न व्रीह्यादिवदस्य संस्कृतियुजा नो सोमवद्विक्रिया।
पाठाधानजलोक्षणाभिषवणैः कूटस्थरूपं हि तद्ब्रह्मापास्तविकारजन्ममरणं निःश्रेयसं साधनैः॥३०६॥

ब्रह्मैव सन्निति वचः प्रथमश्रुतत्वादप्येतिशब्दमुपसंहरणस्थमुच्चैः।
प्रच्यावयत्स्वविषयादुचिताद्बलीयो ब्रह्मात्मनोरनतिरेकमसाध्यमाह॥३०७॥

आग्नेय इत्याद्यपि तद्धितान्तमष्टाकपालादिसमन्वितं सत्।
आख्यातशब्दस्य धुरं बिभर्ति भव्यार्थसंवित्तिनिबन्धनत्वात्॥३०८॥

आख्यातमेव सदिदं भवतीति नाम भव्येतरार्थमति(र्थमपि)जन्मनिबन्धनत्वात्।
अप्येतिशब्दमपि तद्वदिमं प्रतीमो भव्येतरार्थगतबुद्धिनिबन्धनत्वात्॥३०९॥

ब्रह्मैव सन्निति गिरं प्रति शेषितायै नाप्येतिगीरियमलं कथितोपपत्तेः।
आख्यातमेव खलु नामपदस्य शेषि नाख्यातमेतदनृतत्वनिवेदकत्वात्॥३१०॥

ब्रह्मैव सन्निति ततः प्रथमश्रुतं सदप्येतिशब्दमपसारयति स्ववाच्यात्।
अस्याङ्गभावविरहादमुना सहातो ब्रह्मात्मनोरनतिरेकमुशन्ति धीराः॥३११॥

भव्याय भूतमिति किञ्च विधिप्रधाने काण्डे नयोऽयमिह तद्विपरीतमाहुः।
भूताय भव्यमिति भूतपरं हि सर्वं वेदावसानमिति सूत्रकृदाचचक्षे॥३१२॥

ब्रह्मैव सन्निति ततोऽपि बलिष्ठमेतदप्येतिशब्दमवसानगतं व्यपेक्ष्य।
तस्मादमुष्य परिपीडकमेतदेव ब्रह्मैव सन्निति पदं गुणकल्पनायै॥३१३॥

निःश्रेयसं न खद्दृ साध्यमतः क्रियाभिर्ज्ञानेन वा द्वयसमुच्चयवर्त्मना वा।
उत्पत्तिराप्तिविकृती च न संस्कृतिश्च यस्मान्न सम्भवति वर्णितवर्त्मनेह॥३१४॥

तस्मात्प्रवृत्तिविनिवृत्तिविवर्जितत्वं ब्रह्मात्मवस्तुविषयावगतेर्न दोषः।
सर्वप्रवर्तकनिवर्तकमूलदाहात् स्वाराज्यहेतुरिति भूषणमेव तन्नः॥३१५॥

अज्ञाततापि घटतेऽत्र दृशोऽनुभूतेर्जानामि नाहमिति दृश्यपि दृश्यते हि।
अज्ञाततानुभवनं न च वास्तवं तदज्ञाततोद्वहति कल्पिततां(तता) हि तस्याः॥३१६॥

अज्ञानमित्यजडबोधतिरस्क्रियात्मा जाड्यं च मौड्यमिति च प्रकृतिः प्रसिद्धा।
सा चातिदुःस्थितवपुर्दृशमद्वितीयामालिङ्गति(ङ्गते) स्म घृतपिण्ड इवाग्निमिद्धम्॥३१७॥

चिद्वस्तुनश्चिति भवेत्तिमिरं तमिस्रं तामिस्रमन्धतमसं जडिमा तमिस्रा।
माया जगत्प्रकृतिरच्युतशक्तिरान्ध्यं निद्रासुषुप्तिरनृतं प्रलयो गुणैक्यम्॥३१८॥

आश्रयत्वविषयत्वभागिनी निर्विभागचितिरेव केवला।
पूर्वसिद्धतमसो हि पश्चिमो नाश्रयो भवति नापि गोचरः॥३१९॥

नाभावतास्य घटते वरणात्मकत्वान्नाभावमावरणमाहुरभावशौण्डाः।
अज्ञानमावरणमाह च वासुदेवस्तद्भावरूपमिति तेन वयं प्रतीमः॥३२०॥

एकः शत्रुर्न द्वितीयोऽस्ति शत्रुरज्ञानतुल्यः पुरुषस्य राजन्।
येनावृतः कुरुते सम्प्रमत्तः घोराणि कर्माणि सुदारुणानि॥३२१॥

जाड्यं जगत्यनुगतं खद्दृ भावरूपं मौड्यं च पुङ्गतमिति प्रतिभाति तादृक्।
जाड्यं च मौड्यमिति चानुभवप्रसिद्धमज्ञानमाहुरपवर्गापिधानदक्षम्॥३२२॥

साभासमेतदुपजीव्य चिदद्वितीया संसारकारणमिति प्रवदन्ति धीराः।
साभासमेतदिति संसृतिकारणत्वे द्वारं परं भवति कारणता दृशस्तु॥३२३॥

यावद्दृशोऽन्यदिह संसृतिकारणं तद्वेदान्तवादिसमये न मतं जडत्वात्।
यद्यज्जडं भवति संसृतिकारणं तन्नेति स्फुटं वदति सूत्रकृदत्र यस्मात्॥३२४॥

अजडकारणभावनिबन्धनं सकलमेव जडं न तु कारणम्।
इति हि वेदशिरःसु विचक्षणाः कपिलपक्षनिराकरणे जगुः॥३२५॥

शबलमात्मपदेन निगद्यते सकलमात्मजमित्यपि च श्रुतिः।
शबलमात्मपदं जगतस्ततः प्रकृतिरित्यपरे च जना जगुः॥३२६॥

सुकृतदुष्कृतकर्मणि कर्तृतां मतिगतात्मचितिप्रतिबिम्बकम्।
व्रजति तद्वदतः परमात्मनो जगति याति तमःप्रतिबिम्बकम्॥३२७॥

सुकृतदुष्कृतयोःशबला यथा भवति कारणमात्मचितिस्तथा।
गगनवायुपुरःसरकरणं परमचेतनता शबलाकृतिः॥३२८॥

शबलताकबलीकृततावशात् परमचेतनतैव निगद्यते।
शबलमात्मपदेन न कथ्यते शबलमात्मनि वृत्तिनिबन्धनम्॥३२९॥

शबलतापरिधानसमन्वयात् परमचेतनतात्मगिरः पदम्।
भवति तेन जनस्य तु विभ्रमः शबलमात्मगिरः पदमित्ययम्॥३३०॥

बहु निगद्य किमत्र वदाम्यहं शृणुत सङ्ग्रहमद्वयशासने।
सकलवाङ्मनसातिगता चितिः सकलवाङ्मनसव्यवहारभाक्॥३३१॥

चित्रायागः पशुफल इति श्रूयमाणेऽपि चित्रापूर्वं द्वारं पशुफलतयाक्षिप्यते तत्र तद्वत्।
चैतन्यात्मा जगदुदयकृच्छ्रूयतेऽत्रापि पश्चान्मायादीनां भवति जगति द्वारभावः फलेऽस्मिन्॥ ३३२॥

कारणत्वमुपलक्षणं चितेर्ब्रह्मणो न खद्दे तद्विशेषणम्।
इत्यपीदमुपपद्यते तदा चेतना भवति कारणं यदा॥ ३३३॥

अन्यदेव यदि कारणं भवेत् कारणत्वमुपलक्षणं कथम्।
चेतनस्य घटतेऽन्यगामिना वस्तु नान्यदुपलक्ष्यते यतः॥ ३३४॥

अनवबुद्धमतः श्रुतिमस्तकैर्विषयतामुपपादयितुं क्षमम्।
अनुभवात्मपदं तमसा यतः पिहितमेतदिह प्रतिभासते॥ ३३५॥

अज्ञानकल्पितमनिर्वचनीयमस्मिन्नाबालवृद्धमविवादपदं प्रसिद्धम्।
स्वप्ने तथा च भगवानपि वक्ष्यतीदं सन्ध्येऽस्ति सृष्टिरिति पक्षनिराससिद्ध्यै॥ ३३६॥

मिथ्यासुषिः सवितृमण्डलमध्यवर्ती प्रत्यक्षदृष्टिपथमापतितोऽचिरेण।
द्रष्टुः शरीरकरणप्रविभागरूपं मृत्युं निवेदयति सत्यमिदं प्रसिद्धम्॥ ३३७॥

स्वप्नः शुभाशुभफलागमसूचकः स्यान्मिथ्यापि सन्निति च सूत्रकृदाह यत्नात्।
गुर्वादि सर्वमिदमद्वयबुद्धिहेतुर्मायानिबन्धनमिति प्रतिपादनाय॥ ३३८॥

भ्रान्तिप्रतीतिविषयो न च सन्न चासन्नाकाशतत्कुसुमयोर्न हि सास्ति नापि।
तस्या भवेत्सदसात्मकगोचरत्वं न ह्यस्ति तत्किमपि यत्सदसत्स्वरूपम्॥ ३३९॥

आलम्बनं च विरहय्य न विभ्रमस्य ज्ञानात्मनो भवति जन्म कदाचिदत्र।
सिद्धं ततः सदसती व्यतिरिच्य किञ्चिदालम्बनं भ्रमधियः सकलप्रवादे॥ ३४०॥

ब्रह्मात्मवस्तु निरवद्यचिदेकरूपं वह्न्युष्णतावदपरोक्षवपुः स्वभावात्।
निर्दोषवेदशिरसो वचनादतोऽस्मिन् ब्रह्मात्मवस्तुनि भवेदपरोक्षबुधिः॥ ३४१॥

सा चोपनेयरहिते विषयिण्यनन्तेऽनिर्वाच्यमग्रहणमात्रमपाकरोति।
स्वोत्पत्तिलब्धनिजवस्तुबलेन तत्र तापत्रयं समुपशाम्यति निर्निमित्तम्॥ ३४२॥

नियोगः - न उपनिषदः तात्पर्यम्

वाक्यात्प्रवर्तकनिवर्तकरूपभाजः पुंसः प्रवृत्तिमुपलभ्य धियोऽनुमानात्।
कार्यान्विते शिशुरवैति पदस्य शक्तिमित्युच्यते यदि तु तत्र वयं वदामः॥ ३४३॥

योग्येतरान्वितपदार्थनिवेदने तु शब्दस्य शक्तिरिह वृद्धजनप्रयोगे।
विज्ञायते न खद्दे कार्यसमन्वितेऽर्थे कार्याभिधायिषु पदेष्वपि तत्प्रसङ्गात्॥ ३४४॥

कार्यन्वितार्थविषया यदि शब्दशक्तिः कार्यार्थवाचिषु लिङादिषु कार्यमन्यत्।
वक्तव्यमापतति तत्र च तत्र चान्यद्वक्तव्यमेव भवतीत्यनवस्थितिः स्यात्॥ ३४५॥

सिद्धान्वितं यदि लिङादिपदानि कार्यं ब्रूयुर्विनश्यति तदा नियमस्त्वदीयः।
यो वर्णितः सकलमेव पदं स्वमर्थं कार्यान्वितं वदति नान्यमिति स्वशास्त्रे॥ ३४६॥

योग्येतरान्वितनिमित्तकशब्दशक्तिव्युत्पत्तिरेव यदि सम्भवभागिनी स्यात्।
आश्रीयते किमिति कार्यसमन्वितेऽर्थे शब्दस्य शक्तिरसदर्थविशेषणेन॥ ३४७॥

यत्राविशेषितनिमित्तकताविरोधे(तावरोधे) किञ्चिन्निवारकमुदीक्षितमस्तु तत्र।
किञ्चिद्विशेषणविशिष्टमभीष्टशक्तेर्वस्तु प्रयोजकमिदं पुनरत्र नास्ति॥ ३४८॥

कार्यान्वयान्वयिनि वस्तुनि शब्दशक्तिरित्युच्यते यदि तदापि समानमेतम्।
अन्वीयमानवचनत्वमतोपपत्तौ कार्यान्वयान्वयविशेषणगीर्वृथेति॥ ३४९॥

वक्तृज्ञानविवक्षयोरपि भवेच्छब्दार्थता तावके पक्षे शब्दमनु प्रतीतिरुभयोरस्त्येव यस्मात्तयोः।
यद्यच्छब्दमनु प्रतीतिपदवीमारोहदुत्प्रेक्ष्यते तत्तद्वाच्यमिति स्थितौ न हि तयोः शब्दार्थतावर्जनम्॥ ३५०॥

वेदे वक्तुरभावतस्तदुभयं नास्तीह यस्मादतः शब्दो वाचकशक्तिमुज्झति निजां तत्र स्ववाच्यं विना।
वाच्ये वाचकशक्तिमिच्छति भवान्नान्यत्र(भवानन्यत्र) तत्र श्रुतेरप्रामाण्यमिति(मति) स्फुटं तव
भवेद्बुद्धेरनुत्पत्तितः॥ ३५१॥

न च सोमयागपदयोरुभयोरपरस्परेण घटतेऽत्र युजा।
पदजातमेतदखिलं हि निजं विषयं समर्पयति कार्ययुतम्॥ ३५२॥

कार्यान्वयान्वयिनि शक्तिरिति स्थितौ च कार्यान्वयान्वितमतिर्न परस्परेण।
सम्बन्धितामतिरतश्च न सिद्धिमेति सर्वो विशिष्टविधिरित्यपि दूषणं वः॥ ३५३॥

योग्येतरान्वितपदार्थगतैव शब्दशक्तिः स्थिता यदि पुनर्घटते तदायम्।
सर्वो विशिष्टविधिरस्तु तथैव तस्माद्युक्तं तदेतरदितीदमपीह भाष्यम्॥ ३५४॥

शब्दः प्रवृत्तिजनको न तु बोधकश्चेन्नैतत्प्रवर्तकधियो जनकत्वहेतोः।
इष्टाभ्युपायमतिजन्मनिमित्तभूतः शब्दः प्रवर्तयति नैष पुनः पुमांसम्॥ ३५५॥

तस्मादसङ्गतमिदं यदुशन्ति केचित् कार्यान्वितार्थविषयैव तु शब्दशक्तिः।
तत्र प्रयोगमभिवीक्ष्य तथा प्रतीतिं (प्रतीतिः) कल्प्येति वर्णितनिजेष्टविघातहेतोः॥ ३५६॥

वेदैकगम्यमिति कार्यमभीष्टमस्मिन् शक्तिग्रहोऽपि न यदस्य समञ्जसोऽयम्।
शक्तिग्रहञ्च परिहृत्य न बोधकत्वं शब्दस्य शक्यमिह वक्तुमशङ्कितेन॥ ३५७॥

शश्वत्स्वयम्प्रभमहं क्वचिदात्मभूतं विष्णोः परं पदममुत्र तु शब्दशक्तिः।
शक्या ग्रहीतुमतिबुद्धिमनस्यपीति शास्त्रप्रमाणकमदः प्रवदन्ति सन्तः॥ ३५८॥

जातः सुतः सकलवंशविवर्धनस्ते विप्रेति वाक्यसमनन्तरमस्य बुद्धिः।
श्रोतुर्मुखाकृतिवशेन तु पुत्रजन्मवस्तुन्यवश्यमन्मीयत एव शब्दैः॥ ३५९॥

भूतार्थनिष्ठवचनादपि शब्दशक्तिः शक्या ग्रहीतुमुदितेन पदानभिज्ञैः।
तत्र प्रवर्तकनिवर्तकवाक्यमूलशक्तिग्रहैकनियमस्य न हेतुरस्ति॥ ३६०॥

सामान्यतः प्रथममेष पदार्थपिण्डो वाच्योऽस्य वाचकमिदं पदपिण्डरूपम्।
इत्याकलय्य पुनरेष विशेषतोऽपि शब्दार्थसङ्गतिमवैति जनस्तटस्थः॥ ३६१॥

काष्ठैः स्थाल्यां पचति विविधैरोदनं पूर्णिकेति श्रुत्वा बालः सपदि मनुते काष्ठशब्दस्य शक्तिम्।
दृष्ट्वा तस्मिन्पचनकरणं प्रज्वलत्काष्ठजातं न्यायोपायादितरवचसां शक्तिषु प्राक्प्रवीणः॥ ३६२॥

न च किमपि नः कार्यं नाम प्रमाणपथानुगं यदिह तु पुनर्लिङ्लोडादेरुपैष्यति वाच्यताम्।
न खद्व तदितो धात्वर्थादेः पृथग्व्यवसीयते व्रजतु तदिह श्रेयोहेतुर्लिङादिपदार्थताम्॥ ३६३॥
न खद्व जगति श्रेयोहेतुप्रतीत्युदयादृते पुरुषवचनात्कापि प्राज्ञः प्रवर्तितुमर्हति।
पुरुषवचनाच्छ्रेयोहेतुप्रतीत्युदये(प्रतीत्युदयात्) पुनस्तदनुवशगो रागोत्पत्तौ ततः स हि चेष्टते॥ ३६४॥

नयनिपुणधीर्बालश्चेष्टां समीक्ष्य समीहितुः कृततदुचितव्याप्तिज्ञानः पुरा निज आत्मनि।
परतनुगतं श्रेयोहेतुप्रतीत्युदयोत्थितं चरितविषये रागं तस्य प्रवर्तकमिङ्गति॥ ३६५॥

प्रवर्तकोत्थाननिबन्धने ततः समीहितोपायविशेषवस्तुनि।
गिरोऽनुमाय प्रतिपत्तिहेतुतां विशेषसिद्धौ तु समीहते पुनः॥ ३६६॥

पदान्तरस्यागमनादिहान्यतस्तथा परस्योद्धरणादितो गिरः।
विशेषसिद्धिं लभते प्रयत्नवान् पदार्थ(सदा त) सम्बन्धगतां विचक्षणः॥ ३६७॥

लडादिशब्देऽपगते लिङादौ प्रत्यागतेऽभीप्सितसाधनत्वम्।
प्रतीयते तेन लिङादिशब्दस्तदर्थवाचीति स वेत्ति बालः॥ ३६८॥

योग्येतरान्विततया न च वाच्यतास्य कार्यान्वितत्ववपुषा सुतरां न चेष्टा।
किन्त्वन्वितत्ववपुषा न विशेषणस्य किञ्चित्प्रयोजकमिहास्ति निरूपणायाम्॥ ३६९॥

यत्केचि(ये केचि)दाहुरभिधाय निजान्पदार्थानेतावतोपरतवन्ति पदानि तेभ्यः।
पश्चाद्विशेषणविशेष्यतया तु तेषां संसर्गबुद्धिरपरावतरिष्यति॥ ३७०॥

तद्दुर्घटं न खद्दे किञ्चिदपि प्रमाणमस्याः प्रसादकमुदीरितकल्पनायाः।
येनोपलब्धिविषयत्वमुपागतानि संसृष्टमेव तु पदानि पदार्थमाहुः॥ ३७१॥

नासंसृष्टपदार्थबुद्धिपरयोः पूर्वापरत्वप्रमां मुक्त्वा कारणकार्यतावगतये कश्चित्समर्थस्तयोः।
पौर्वापर्यमुदीक्ष्य हेतुफलतां सर्वत्र सङ्गृह्णते नो चेत्सर्वमसङ्गतं भवति वः सर्वव्यवस्थाहतेः॥ ३७२॥

पूर्वापरान्वयबलेन हि कारणत्वकार्यत्वसङ्गतिमिह प्रतियन्ति लोके।
नो चेद्भवेदनियमो न च तत्र कर्तुं कार्याणि कारणविशेषमुपाददीरन्॥ ३७३॥

पदजातबुद्धिजनिता भवति व्यतिषक्तबुद्धिरिति तावदिह।
न विगानमस्ति भवतामपि चेद् व्यवधानकल्पनमकारणकम्॥ ३७४॥

व्यतिषक्त(व्यतिषिक्त)बुद्धिजनकं सकलं पदजातमित्यनुमतं यदि वः।
व्यवधानकल्पनविडम्बनया किमिहाञ्जसैव जनकं भवतु॥ ३७५॥

पारम्पर्यं ह्यगतिकगतिं कारणादाश्रयन्ते नोत्सर्गेन स्फुरति विदुषां यत्र तत्र प्रणाडी।
श्रुत्या सोमक्रयमनुगतः साधनत्वेन हित्वा साक्षाद्भावं ह्यरुणिमगुणः प्रापदेनामशक्तेः॥ ३७६॥

श्वेतिमानमभिपश्यतः पुरः शृण्वतस्तदनु हेषितध्वनिम्।
तद्वदत्र (यद्वदत्र) खुरमुद्गरस्वनं श्वेतरूपतुरगोऽटतीति धीः॥ ३७७॥

तद्वदत्र पदजातबुद्धिभिर्बोधिताखिलपदार्थहेतुकः।
सर्वशब्दविषयार्थसङ्गतेः प्रत्ययो भवति योग्यतादिभिः॥ ३७८॥

नैतत्कृप्तनिमित्ततोऽपि घटते संसर्गधीरीदृशी श्वेताश्वस्त्वरितोऽभिधावतितरामित्यादिका योत्थिता।
कार्यं कृप्तनिबन्धनं यदि भवेन्नास्यापरं कारणं कल्प्यं तेन पदार्थजातजनिता नैषा मतिर्लिङ्गजा॥ ३७९॥

पादार्थं न पृथक्प्रमाणमपरं नानाप्रमाणोद्भवं नाप्येतत्फलमत्र पक्षयुगले कल्प्यं निमित्तान्तरम्।
कृप्तं लिङ्गमतोऽपि निर्वहति चेत्संसर्गधीरीदृशी पादार्थी न पृथक्प्रमा न च फलं नानाप्रमाणोद्भवम्॥ ३८०॥

नासंसृष्टमतो वदन्ति वचनान्याहुः (न च तान्याहुः) क्रियासङ्गतं योग्येनान्वितमेव केवलममून्याहुः समर्थं यतः।
एवं सत्यपवर्जितक्रियमलं निष्पन्नरूपं सदा संसर्गादिविवर्जितं च वदितुं वस्तुस्वरूपं श्रुतिः॥ ३८१॥

अभिहितघटनाथ वान्वितानामभिहितिरस्त्वथ वा न पक्षपातः।
क्वचिदपि समयेऽस्ति नः कदाचित् बहुघटनात्मकवस्तुनिष्ठवाक्ये॥ ३८२॥

अभिहितघटना न चोपपन्ना परदृशि नाभिहितिस्तदान्वितानाम्।
अनधिकविकलार्थगोचरत्वान्न तदुभयं श्रुतिमस्तके पदानाम्॥ ३८३॥

अभिहितघटना यदा तदानीं स्मृतिसमबुद्धियुगं पदे विधत्तः।
परदृशि पुनरन्विताभिधाने पदयुगलात्स्मृतियुग्ममेव पूर्वम्॥ ३८४॥

स्मृतिसमपदजन्यबुद्धियुग्मात् परदृशि मोहनिवर्तनं परेषाम्।
परदृशि पदजस्मृतिद्वये स्यात् पदयुगलात्प्रमितेः समुद्भवो नः॥ ३८५॥

भावना - श्रुतिवाक्यतात्पर्यम्

औदासीन्यप्रच्युतिप्रापकेऽर्थे लिङ्लोडादेर्लोकतो ज्ञातशक्तेः।
पुंसो वेदे प्रेरकत्वेन कल्प्या लिङ्लोडादेर्भावनैवानृतन्त्रे(वान्यतन्त्रे)॥ ३८६॥

आज्ञाद्यर्थः प्रेरकः पौरुषेये लिङ्लोडादेर्भावना वेदवाक्ये।
पुंसोऽभावात्तद्गताज्ञाद्यभावात् पुंसंबन्धात् (पुंसम्बन्धे) प्रेरकास्ते हि वाक्ये॥ ३८७॥

लिङ्लोडादेर्भावकस्तत्र भाव्यानुष्ठेयेऽर्थे पुम्प्रवृत्तिः प्रसिद्धा।
लिङ्लोडादेः पुंप्रवृत्त्यंशनिष्ठो व्यापारो यस्तं विदुर्भावनेति॥ ३८८॥

करणमिह लिङादेर्ज्ञानमेवाङ्गभागः पुनरभिरुचिहेतुर्दृश्यते च प्रशंसा।
विधिरयमिह तन्त्रे जैमिनीये न कार्यं न च भवति विधिर्नः श्रेयसो हेतुरर्थः॥३८९॥

विधिरिह गुणभूतः प्रत्ययार्थोऽपि नित्यं भवति च पुरुषोत्था (पुरुषार्था) भावनास्य (भावनान्यत्) प्रधानम्।
भवति दशलकारप्रत्ययैः सामिधेया विधिविहितलकारैर्भावना शब्दहेतुः॥३९०॥

भवति च पुरुषार्थकर्मिकेयं पुरुषनिमित्तकभावना न तद्वत्।
भवति तु विधिशब्दकर्तृकान्या न हि निरवद्यपुमर्थता प्रवृत्तेः॥३९१॥

अभिमतपशुपुत्रवृष्टिनाकप्रभृतिकभाव्यगता हि भावनेयम्।
अनभिमतसुदुष्करातिदुःखां नयति तु भाव्यपदं प्रवृत्तिमन्या॥३९२॥

प्रत्ययप्रकृतिशब्दतो बहिर्विद्यतेऽभिहितसङ्गतिश्च नः।
प्रत्ययप्रकृतिशब्दयोः पुनर्नित्यमन्वितधियो निमित्तता॥३९३॥

भावनाद्वयमतोऽवबोध्यते धातुवाच्यघटितं लिङादिभिः।
प्रत्ययार्थगुणवस्तुवाचिनो धातवः प्रकृतयो हि धातवः॥३९४॥

भव्याय भूतमुपदिश्यत इत्यवोचन् पूज्यास्ततः सकलमेव तु वेदशास्त्रम्।
कार्यप्रधानमिति निश्चिनुमोऽस्मदीये तन्त्रे च कार्यमुदितः पुरुषप्रयत्नः॥३९५॥

भावना - न वेदवाक्यतात्पर्यम्

अभिदधाति करोति च लिङ्वदं श्रुतिवचःसु निजामपि भावनाम्।
न च करोति न वक्ति च तां पुनर्नरवचःस्विति दुःशकमुच्यते॥३९६॥

वक्तृत्वमेव घटते यदि लिङ्वदस्य सर्वत्र नार्धजरतीयमिदं प्रशस्तम्।
सामर्थ्यमेकरसमेव यदोपपन्नं नानारसं न खद्दे तत्परिकल्पनीयम्॥३९७॥

श्रेयोहेतुत्ववाची यदि भवति तदा सम्भवत्येकरूपा शक्तिस्तस्याभिधाने न तु भवति तदा कारकोऽयं प्रवृत्तेः।
श्रेयोहेतुश्च वाच्यः श्रुतिवचसि तदा पौरुषेये च तुल्यः क्लृप्तश्चासौ न कल्प्यः श्रुतिवचसि यथा भावना
लिङ्निबद्धा॥३९८॥

धात्वर्थतोऽन्या न च भावनास्ति यां भावनां वक्तुमलं लकारः।
धात्वर्थमुद्रिच्य न पुम्प्रयत्नो लोके यतो भाति निरूपणायाम्॥३९९॥

न कर्मकाण्डेऽपि ततो नियोगो न भावनाप्युक्तनयेन तस्मिन्।
न तद्वयं वेदशिरःसु तस्मात् ततो न कार्यार्थपराणि तानि॥४००॥

अपि च प्रतिषेधचोदनाविषयः स्यात्प्रतिषिद्धकर्मणः।
फलगर्धिनिवृत्तिरेव सा न नियोगो न च तस्य गोचरः॥४०१॥

नञः स्वसम्बन्धिपदार्थवस्तुनो निवृत्तिरर्थः सहजः प्रसिद्धितः।
अनीक्षणादौ व्रतशब्दसङ्गतेः परप्रयुक्ता खद्दे मानसी क्रिया॥४०२॥

अपि तु प्रतिषेधचोदना न तु भिद्येत भवन्मते विधेः।
विधिरेव तु चोदनाखिला न हि वेदे वचनं निवर्तकम्॥४०३॥

प्रतिषेधवाक्यवदतः सकलं विधिशून्यमेव फलवद्भवतु।
वचनं त्रयीशिरसि तत्त्वमसिप्रभृति प्रतीचि तमसोऽपहतेः॥४०४॥

नामधातुसहितो नञिष्यते पर्युदासविषयो मनीषिभिः।
न प्रसक्तविनिवृत्तिवाचकोऽब्राह्मणादिषु तथोपलम्भनात्॥४०५॥

अब्राह्मणाधर्मगिरोर्नञेष नामान्वयादाश्रितपर्युदासः।
अन्यं विरुद्धं च सदाभिधत्ते नोद्यन्तमित्यादिषु धातुयोगात्॥४०६॥

नोद्यन्तमित्यत्र नञेक्षणार्थसमीपकार्यांतरमुच्यते हि।
ततश्च नेक्षिष्य इतीदृशी स्यात् सङ्कल्पना सन्निहितत्वहेतोः॥४०७॥

द्विजं न हन्यान्न कलञ्जमद्यादित्यादिवाक्ये विधिनास्य योगात्।
प्रसज्यमानार्थनिवृत्तिमात्रं नञोऽर्थ इत्याश्रितमादरेण॥४०८॥

नाद्यां न हन्यां न पिबेयमित्यपि वाक्येषु नञ्वत्सु वदन्ति मानसीम्।
सङ्कल्परूपां विधिबन्धिनीं (विधिवर्त्तिनी) क्रियां नोद्यन्तमित्यादिवचःस्विवापरे॥४०९॥

वाक्येषु नञ्वत्सु निवृत्तिमात्रं प्रमेयमित्यभ्युपगम्यमाने।
प्रत्यक्षमानेन विरुध्यते हि निवृत्तिशास्त्रं न च युज्यते तत्॥४१०॥

प्रवर्तकं वाक्यमुवाच चोदनां निवर्तकं नैवमुवाच भाष्यकृत्।
ततश्च विद्मो न हि चोदनास्ति सा प्रवर्तिका या न भवेदिति स्थितिः॥४११॥

न नामयोगो न च धातुयोगो लिङादियोगोऽपि न कारणं नः।
नञः स्वसम्बन्धिनिवृत्तिमात्रं स्वतोऽभिधेयं परतोऽन्यदस्य॥४१२॥

तथा हि नाग्रे करिणीति नाम्ना गजोऽत्र नास्तीति च धातुयोगे।
लिङादियोगेऽपि निवृत्तिरर्थो विषं न खादेति नञ्पदस्य॥४१३॥

तथा श्रुतौ नेति वचःसु नाम्नि नानेह नास्तीति च धातुयोगे।
तथा विधाने न कलञ्जमद्यान्नञोऽविशेषेण निवृत्तिरर्थः॥४१४॥

औदासीन्यं पुरुषगतमेवाविशेषान्नञर्थो भ्रान्तिप्राप्ते सति तु विषये यत्र यत्रैष दृष्टः।
नौदासीन्यं पृथगिह भवेदात्मचिन्मात्ररूपात् सिद्धे वस्तुन्यवसितमतो वेदवाक्यं निषेधे॥४१५॥

प्रवर्तकं वाक्यमुवाच चोदनां निधाय बुद्धौ वचनं निवर्तकम्।
द्वितीयसूत्रे भगवान् बहुश्रुतो न चोदनाद्वित्वनिवारणाय तत्॥४१६॥

ननु निवृत्तिपरत्वमुदीरित विघटयामि निषेधगिरामहम्।
न हि कलञ्जमिति प्रतिपाद्यते यदि तदा नयनेन विरुध्यते॥४१७॥

अथ कलञ्जपदार्थगभक्षणं न हि तदाप्यमुनैव विरुध्यते।
अथ तदीयफलस्पृहयान्वयो न हि तदपनुभूतिपराहतम्॥४१८॥

अथ तदीयनियोगनिवर्तनं भवतु भक्षणमस्ति (भक्षणमस्तु) तदिच्छया।
न हि नियोगनिवृत्तिनिवेदने सति कलञ्जमभक्ष्यमितीङ्ग्यते॥४१९॥

इह कलञ्जपदेन नञन्वयो भवति वास्य नञोऽदिसमागमः।
अदिगतेन लिङादिपदेन वा सह समेति नञत्र गतिस्त्रयी॥४२०॥

उदितपक्षपरिग्रहकारिणां न च निषेधगिरामुपपादने।
भवति शक्तिरतस्तु निषेधगीरपि नियोगपराभ्युपगम्यताम्॥४२१॥

तथा च यागाद्यनुबन्धभेदाद्भिन्नेषु शास्त्रेषु नियोगभेदः।
निवृत्ति(निवर्त्य)भेदादपि तद्वदस्य निवृत्तयोऽपि ह्यनुबन्धभूताः॥४२२॥

निवृत्तिसिद्ध्यापि नियोगसिद्धिः प्रवर्तमानस्य न गर्तपातः।
निषिद्धचेष्टा निरयस्य हेतुर्नियोगतो नाध्यवसीयते हि॥४२३॥

नियोग एवैष पुमान्नियुज्यते नियोगसिद्ध्यै तु पुनर्नियुज्यते।
परत्र कर्मस्वथ वा निवृत्तिषु स्थितिः प्रसिद्धेति नियोगवादिनाम्॥४२४॥

प्रवृद्धरागस्य निवृत्तयोऽस्थिरास्ततः स्थिरत्वाय नियुज्यते पुमान्।
निवृत्तिदेशेषु नियोगबुद्धितो निवृत्तिमूर्ध्वं परिपालयिष्यति॥४२५॥

अनाद्यजग्धेश्च निवृत्तिरिष्टा(निष्ठा) विशिष्टदन्तोष्ठनिविष्टसंवित्।
अनन्यसंसर्गिपदार्थसंविन्निवृत्तिरित्येष हि राजमार्गः॥४२६॥

ननु समीहितसाधनता लिङो लशुनगृञ्जनभक्षणसंश्रया।
भवति वाच्यतयाभिमतास्य नो नञपि तद्विनिवृत्तिनिवेदकः॥४२७॥

तदसदिष्टफलोद्भवदर्शनाल्लशुनगृञ्जनपर्युषिताशनात्।
न हि निषिद्धपदार्थनिमित्तकः सुखलवः पुरुषस्य न विद्यते॥४२८॥

अदृष्टदोषं परिहृत्य शंसतः कलञ्जमास्वाद्य सुखित्वमात्मनः।
पुमानबोधोपहतः समीहते तदीहिताभावपरा निषेधगीः॥४२९॥

नरकपातविवर्जनवर्त्मना भवतु विप्रवधात्परमार्थतः।
मम सुखित्वमितीच्छति यत्पुमान्न तदितीह निषेधगिरोच्यते॥४३०॥

प्रमाणतो नास्ति निषिद्धकर्मणः फलस्पृहादृष्टभयं विना तव।
भ्रमाद्बोधप्रभवात्प्रवर्तसे न तात मानेन फलस्पृहात्र ते॥४३१॥

इति श्रुतिः शास्ति निषिद्धकर्मणि प्रवृत्तिमन्तं पुरुषं नञन्विता।
न चायमर्थोऽपहृतः (र्थोऽपहृतः) प्रमान्तरैर्न हि प्रमाणैरपरैर्विरुध्यते॥४३२॥

भुजङ्गभोगं सुकुमारशीतलं निदाघसन्तापनिवृत्तये शिशुम्।
भ्रमादुपादित्सुमुदीक्ष्य कातरा निवर्तयेत्तज्जननी यथा तथा॥४३३॥

भ्रमादनर्थय निदानमादरात् कृतार्थतायै लशुनादिभक्षणम्।
नञन्विता वैदिकचोदनाप्यसौ विधित्सुमालक्ष्य निवर्तयिष्यति॥४३४॥

क्रियानुप्रवेशं विना प्रागभावः प्रसक्तक्रियाया न निर्वोढुमीशः।
गुणद्रव्यवन्नित्यनिष्पन्नभावात्पदत्वं नियोगस्य भावार्थवद्वः॥४३५॥

न पाल्यत्वयोगादलम्भूष्णुभावो यतः पालनं श्रूयते नात्र वाक्ये।
न खल्वश्रुतं गृह्यते न्यायहानात् (हीनं) यथा न श्रुतं त्यज्यते तद्भयेन॥४३६॥

उदासीनता च श्रुता नञ्पदार्थो नियोगे सति त्याज्यतां याति सद्यः।
अतद्योग्यभावादयोग्यः पदार्थो न वाक्यार्थभागिष्यते जैमिनीयैः॥४३७॥

निषिद्धक्रिया प्रत्यवायाय नेति स्वकर्णौ जनः प्रोर्णुते पापभीरुः।
समाकर्ण्य दुर्भाषितं पार्श्ववर्ती न पापाक्षरं किञ्चिदेतादृगन्यत्॥४३८॥

निषिद्धक्रिया प्रत्यवायाय नो चेत् तदा दुःखमाकस्मिकं सर्वपुंसाम्।
सुखं पुण्यमूलं यथा सर्वपुंसां तथा दुःखमप्यस्तु वः पापमूलम्॥४३९॥

निषिद्धक्रियां चोदितस्याक्रियां वा विना नास्ति पापस्य निष्पत्तिहेतुः।
ततस्तद्वयं पापनिष्पादकत्वाद्भवेत्प्रत्यवायस्य नित्यं निदानम्(निमित्तम्)॥४४०॥

निषिद्धक्रिया दुःखनिष्पत्तिहेतुर्भवेल्लक्षणं चोदितस्याक्रियास्य।
अभावान्न भावस्य निष्पत्तिरिष्टा भवेल्लक्षणं ज्ञायमानस्त्वभावः॥४४१॥

निवृत्तिनिष्ठे तु निषेधवाक्ये निषिद्धकर्माचरणादनर्थः।
प्रतीयतेऽर्थादिति तत्र युक्तं दुःखं नृणां दुश्चरितैकमूलम्॥४४२॥

समीहितोपायतया लिङन्वयात् प्रतीयमानस्य तु भक्षणादिनः।
न पर्युदासाश्रयणेन नञ्पदादनिष्टहेतुत्वमतिर्भविष्यति॥४४३॥

तथा हि सम्बन्ध्युपमर्दबुद्धये समर्थमुत्सर्गमपेक्ष्य नञ्पदम्।
न पर्युदासाय विनापवादकं ततो निवृत्त्यर्थपरं तदिष्यते॥४४४॥

अतः प्रसज्यप्रतिषेधसम्भवान्न पर्युदासाश्रयणं प्रशस्यते।
न पर्युदासाश्रयणं विना भवेदनिष्टहेतुत्वनञर्थकल्पना॥४४५॥

अभीष्टहेतुत्वलिङ्गर्थपृष्ठतो ह्यनर्थहेतुत्वनञर्थकल्पना।
न पर्युदासं परिहृत्य कल्प्यते न पर्युदासः प्रतिषेधसम्भवात्॥४४६॥

प्रमाणमिच्छन् प्रतिषेधचोदनां समस्तवेदस्य न कार्यगोचरम्।
प्रमाणभावं प्रतिपत्तु(प्रतिवक्तु)मीश्वरो निषेधवाक्ये तदसम्भवाद्यतः (वादतः)॥४४७॥

अतो न वेदान्तवचःसु विद्यते विधिर्नियोगो न च शब्दभावना।
न कर्मकाण्डेऽपि नियोगतोऽस्त्यसौ यतो निषेधेषु न विद्यते विधिः॥४४८॥

उपेत्यवादं परिहृत्य चोच्यते नियोगनिष्ठास्तु निषेधगीरपि।
तथापि वेदान्तवचःसु विद्यते विधेर्न गन्धोऽपि विरोधकारणात्॥४४९॥

ज्ञानं विधातुं न शक्यम्

ज्ञानं विधातुं न हि शक्यमेतन्न शक्यते कर्तुमकर्तुमेतत्।
तथान्यथा कर्तुमशक्यमेतत् प्रमाणमेयैकनिबन्धनत्वात्॥४५०॥

ब्रह्मज्ञानं जानता ब्रह्मबुद्धेः कर्तव्यत्वं शक्यते ज्ञातुमेतत्।
न ह्यज्ञात्वा ब्रह्मबुद्धिं तदीयं कर्तव्यत्वं कश्चिदिष्टे ग्रहीतुम्॥४५१॥

ब्रह्मज्ञानं ब्रह्मणि ज्ञायमाने ज्ञातुं शक्यं नान्यथा तच्च तद्वत्।
विज्ञातं चेद्ब्रह्मणस्तावमस्य प्राप्ता मुक्तिर्नास्ति कृत्यं विधीनाम्॥४५२॥

दृशो विराङ्नेत्रशरीरगोचरं परस्पराध्यासमबोधसम्भवम्।
अनर्थमाहुः श्रुतिमस्तके स्थितास्ततोऽस्य विद्यासमयैव मुक्तता॥४५३॥

अनाद्यविद्यापटनेत्रबन्धनं प्रसह्य वेदान्तनिबन्धना मतिः।
स्वजन्ममात्रेण दृढात्मगोचरा समूलदाहं दहतीति हि श्रुतिः॥४५४॥

विज्ञाते ब्रह्मणि स्याद्विधिरयमफलः प्रत्यये तस्य तद्व-
न्नाज्ञातब्रह्मकर्मा विधिविषय इति प्रत्ययो बुद्धियोग्यः।
ब्रह्मात्मप्रत्ययेऽतो विधिरनवसरः सर्वथा चिन्त्यमान-
स्तस्माद्ब्रह्मात्मवस्तुन्यवसितमखिलं विद्धि वेदान्तवाक्यम्॥४५५॥

विरुद्धत्रिकस्य द्वयापत्तिदोषान्न शक्यं विधानं धियः सङ्ग्रहीतुम्।
यथा वाजपेये गुणस्येह तद्वत् ततो नास्ति वेदान्तवक्ये विधानम्॥४५६॥

उद्दिश्यमानत्वमनूद्यमानभावः प्रधानत्वमितीदमेकम्।
तथाप्युपादेयविधेयशेषभावप्रभेदं त्रिकमन्यदत्र॥४५७॥

एकेन वाक्येन धियो विधानं प्रत्यक्प्रमित्सा च यदि प्रतीचि।
त्रिकद्वयं तत्र विरुद्धमेतत् प्रसज्यते कष्टमतः किमन्यत्॥४५८॥

उद्दिश्यमानं तदनूद्यमानभूतं प्रधानं च (प्रधानाच्च) धियो विधाने।
प्रमीयमाणं पुनरात्मवस्तु तदास्पदं स्यादितरत्रिकस्य॥४५९॥

प्रथमत्रिकं यजिनिगद्यगतं गुणसङ्गतेरवगमे भवति।
चरमत्रिकं यजिनिगद्यगतं फलसङ्गतेरवगमे तु पुनः॥४६०॥

सकृदुच्चरन् यजतिरेष गुणं न फलं च सङ्गमयितुं क्षमते।
कथितत्रिकद्वयविरोधवशाद् यजिवस्तुनीति ननु नीतिविदः॥४६१॥

इति वाजपेयगतनीतिवशादपि नात्मवस्तुविषयावगतौ।
विधिरस्ति तेन विधिशून्यतया परमात्मवस्तुविषयोपनिषत्॥४६२॥

विशिष्टात्मनि श्रुतितात्पर्यम्

सगुणवाक्यमपीह समन्वितं भवति निर्गुणवस्तुनि सर्वशः।
न खद्द निर्गुणवस्तुसमन्वयं न सहते सगुणस्य (सगुणेऽस्य) समन्वयः॥४६३॥

सत्यासत्यवपुस्तथा हि सगुणं ब्रह्मास्य विद्या तथा तद्वत्तद्विषयस्य वेदवचसस्तात्पर्यमेवं विधं।
तेनावान्तरमस्य वेदवचसस्तात्पर्यमन्यादृशं चान्यन्निर्गुणवस्तुतत्त्वविषयं सङ्कीर्त्यते भागशः॥४६४॥

रूप्यज्ञानं रजतमिदमित्येवमुत्पद्यमानं मत्यासत्यं विषयमपृथग्दर्शयत्येकमेव।
तद्वन्मानं सगुणविषयं सत्यमिथ्यावभासं संसृष्टार्थ(संसज्यार्थ)द्वयमिति दृढं दर्शयत्येकमेतत्॥ ४६५॥

उपनिषदः सद्विषयं सूचयति

तद्बुद्धिमात्रफलतैव च तत्परत्वं वेदान्तवादिसमये न तु शेषभावः।
शेषत्वमक्षरकलापगताप्तिमात्रं प्रत्येव नाध्ययनमर्थधियोऽपि शेषः॥ ४६६॥

तच्छेषभावमनपेक्ष्य च तत्फलं स्यादाधानवन्न हि तदङ्गमिह क्रतूनाम्।
अभ्यङ्गमेव हि तदिष्टमथापि तस्य सर्वक्रतुष्वधिकृतिः फलमभ्युपेतम्॥ ४६७॥

मन्त्रार्थवादगतमध्ययनं तदर्थमात्रप्रतीतिफलमित्यपि नाभ्युपेतम्।
विध्यर्थबुद्धिमनुसृत्य फलावमाना सा तद्वतीति तदतत्परतोपपत्तिः॥ ४६८॥

सप्रयोजनकबुद्धिकारणं वाक्यमाहुरिह तत्परं बुधाः।
सप्रयोजनकबुद्धिशेषधीहेतुमन्यपरमश्रयन्ति च॥ ४६९॥

मन्त्रार्थवादवचसामपि गोचरेषु सौवेष्ववान्तरमुशन्ति च तत्परत्वम्।
केचित्त्रयीशिरसि खिन्नधियो मुनीन्द्रास्तत्तद्धियो (तद्वद्धियो) विधिषु शेषतया निवेशात्॥ ४७०॥

श्रेयःसाधनता लिङर्थ इति च प्रागुक्तमत्यादराच्छ्रेयःसाधनयागदानहवनाद्यर्थैकनिष्ठं ततः।
सर्वं कर्मवचो नियोगपरता तस्यापि नालोचने वक्तव्यं (वक्तव्या) किमुतास्य वेदशिरसः सा नेति भूयोऽपि
नः॥ ४७१॥

श्रेयःसाधनयागदानहवनाद्यर्थेषु कार्यात्मसु सर्वं कर्मवचः प्रमाणमिति तु ग्राह्यं वचो जैमिनेः।
भाष्यं पश्यत शाबरं स्फुटतरं यो यागमित्यादिकं श्रेयःसाधनयागमात्रवचनं धर्माभिधानं वदत्॥ ४७२॥

पुल्लिङ्गतापि घटते क्रतुगामिनोऽस्य सूक्ष्मात्मना भवति हि क्रतुरप्यपूर्वम्।
तेन क्रतोरुपचरन्नभिदां पुमान्स्यात् क्लीबस्तु धर्ममिति हि क्रतुवाचकत्वे॥ ४७३॥

इष्टाभ्युपायवचनो लिङिति स्थितौ च स्याद्भावनावचनतास्य यदा तदा च (तदापि)।
कर्तुर्भवेदधिकृतिस्तु नियोगवादे स्वाम्ये स्थिते सति भवेदथ कर्तृभावः॥ ४७४॥

इष्टाभ्युपायो विधिरात्मनीच्छामुत्पादयन्प्रेरकतामुपैति।
इष्टाभ्युपायेऽवगते लिङ्गादेरिच्छा फलादेनमुपैति सद्यः॥ ४७५॥

नियोगकोट्यापि नरो न कश्चिदिच्छां विना दुःखनिदानभूतम्।
करोति कर्मेह पुमर्थरागात् प्रवृत्तिरेवेति हि राजमार्गः॥ ४७६॥

इष्टाभ्युपायस्य च कार्यभावः प्रयत्ननिष्पाद्यतयोपपन्नः।
स चावसेयो वचनाल्लिङादेः प्रत्यक्षतो रागनिबन्धनस्तु॥ ४७७॥

कार्यत्वमिच्छावशवर्ति किञ्चिदिष्टाभ्युपाये निजमस्य किञ्चित्।
निजं लिङादेरवसेयमस्य साक्षिप्रसादादितरप्रतीतिः॥ ४७८॥

जानात्यर्थे लिङ्वदं गौणमाहुर्जानात्यर्थः कर्तृतन्त्रो न हीष्टः।
यागाद्यर्थे कर्तृतन्त्रे हि मुख्यो लिङ्लोडादिः श्रेयसो हेतुभूते॥ ४७९॥

जानात्यर्थे श्रेयसो हेतुभावभागोऽबुद्धो बोध्यते लिङ्वदेन।
यागाद्यर्थे श्रेयसो हेतुभावो मुख्यो बोध्यः कर्तृतन्त्रो न गौणः॥ ४८०॥

यागाद्यर्थे मुख्यता यद्वदस्य ब्रह्मज्ञानस्यान्तरङ्गेषु तद्वत्।
तर्कादीनां कर्तृतन्तृत्वहेतोर्ज्ञानादर्वाग्गौणताहेत्वभावात्॥ ४८१॥

भूतस्य भव्याय यथोपदेशः क्रियापरे वस्तुपरे तु काण्डे।
न हीष्टमेवं विपरीतमस्मिन् भव्यस्य भूताय सदोपदेशः॥ ४८२॥

भव्यप्रतितावुपयोगभाजो भवन्ति कात्स्न्र्येन हि सिद्धवादाः।
क्रियाप्रधाने न तथात्र किन्तु भूतप्रतीतौ खद्द भव्यवादाः॥ ४८३॥

भव्यप्रतीतौ न हि कश्चिदर्थो भूतप्रतीतौ पुनरस्ति मुक्तिः।
श्रोतव्य इत्यादि ततो विधानं भूतोपदेशानुगुणं समस्तम्॥४८४॥

आदाय मुख्यगुणलाक्षणिकप्रवृत्तीर्भव्यप्रतीतिजनकैः सह भूतवादाः।
सम्बन्धिनो विधिवचःसु तथात्र सर्वे भव्यार्पणाः परिबृढप्रतिपादकेन॥४८५॥

सिद्धार्थवादिवचनेषु न गौणतादिर्दोषाय कर्मपरवाक्यगतेषु यद्वत्।
कार्यार्थवादिवचनेषु न गौणतादिर्दोषस्तथोपनिषदीति समानमेतत्॥४८६॥

मानेन मेयावगतिश्च युक्ता धर्मस्य जाड्याद्विधिनिष्ठकाण्डे।
मेयेन मानावगतिश्च युक्ता वेदान्तवाक्येष्वजडं हि मेयम्॥४८७॥

कर्मप्रधानेऽतिगते च काण्डे वाक्यत्वमाख्यातपदप्रयुक्तम्।
ब्रह्मप्रधाने श्रुतिमस्तकेऽस्मिन्नामप्रधानं वचनं समस्तम्॥४८८॥

कार्यप्रधानमखिलं च पदं सुबन्तमाख्यातमेव फलतः खद्दं कर्मकाण्डे।
तद्वत्तिङन्तमपि वेदशिरःसु सर्वं नामैव तद्धि परिनिष्ठितवस्तुनिष्ठम्॥४८९॥

आग्नेयमाश्विनमथैन्द्रमितीदृशं हि सर्वं सुबन्तमपि भव्यपरं प्रसिद्धम्।
सास्येति ताद्धितमन्वितसन्निधाने नामैव तद्भवति यद्भवतीति तद्वत्॥४९०॥

अस्त्यस्म्यसीति च तिङन्तपदानि सन्ति वेदान्तवाक्यनिलयानि तथापि तानि।
नाख्यातशब्दनिजशक्तिधुरं वहेयु(वदेयु)रस्तित्वमात्रविषया हि निषक्तिरेषाम्॥४९१॥

पूर्वापरीभूतपदार्थनिष्ठमाख्यातमाख्यातविदो वदन्ति।
कूटस्थसत्तावगतिप्रधानमाख्यातवत्साधु तिङन्तमाहुः॥४९२॥

अस्तित्ववस्तुविषयोपनिषन्निषक्तिराश्रीयते यदि तदा प्रमितं प्रमेयम्।
तस्यास्तवापतति मानमितत्वमेव ह्यस्तित्वमात्मगतमभ्युपयन्ति धीराः॥४९३॥

अथवा मितियोग्यतास्तिता निरवद्यास्तु समस्तवस्तुषु।
परमात्मनि तत्प्रतीयते सकलं वेदशिरः प्रवर्तताम्॥४९४॥

तदसुन्दरमात्मसंविदोरपि सत्ता भवताभ्युपेयते।
न तयोर्विषयत्वहीनयोर्मितियोग्यत्वमितत्वसम्भवः॥४९५॥

जगत् - चित्कार्यम्

क्षितिजलदहनानिलाम्बराणां जनिमनुमाय विभक्तताबलेन।
जगति हि जनिमद्विभज्यमानं घटघटिकादि समीक्ष्यते समस्तम्॥४९६॥

क्षितिजलदहनेषु तत्प्रदेशाज्जनिसहितानुपलभ्य तद्बलेन।
क्षितिजलदहनत्वलिङ्गमार्गादपि जनिमेष्वनुमाय तर्कयन्ति॥४९७॥

जनिमदभवदेतच्चेतनादेव हेतोर्घटवदिति पुनस्तत्कारने चेतनत्वम्।
अनुमिमत उदर्के कार्यतालिङ्गतोऽमी जगति हि परिदृष्टं चेतनादेव कार्यम्॥४९८॥

जगदुदयनिमित्तं चेतनं किन्तु नाना किमु भवतु तदेकं सर्ववित्सर्वशक्ति।
इति भवति तु पश्चात्कारणे चेतनेऽस्मिन्ननवगतिनिमित्तः संशयो दुर्निवारः॥४९९॥

श्रुतिवचनविशेषाच्चेतने कारणेऽस्मिन् यत इति निरवद्यादेकताधीरथागात्(थाद्या)।
प्रकृतिरिति च तस्मिन्कारणे पञ्चमीयं जनयति दृढबुद्धिं तद्विधानादिहैव॥५००॥

एकत्वमेकवचनादवगम्यमानं यच्छब्दवाच्यनिलयं यत इत्यमुष्मिन्।
वाक्ये जगत्प्रकृतिगामितया न विद्मः (निविष्टां) सङ्ख्यां विभक्त्यभिहिते वचनं हि नाह॥५०१॥

न हि विभक्त्यभिधेयपदार्थगं वचनमाह निजं विषयं क्वचित्।
वचनवाच्यगतं न वदन्ति च स्वमभिधेयमशेषविभक्तयः॥५०२॥

प्रातिपदिकार्थगतमेव वचनानि स्वं स्वमभिधेयमभिधातुमलमर्थम्।
प्रातिपदिकार्थगतमेव निजमर्थं वक्ति च विभक्तिरपि नेह वचनार्थे॥५०३॥

पशुनेति पदे तृतीयया करणत्वं हि पशोर्निवेद्यते।
वचनेन पशोरिहैकता न पुनः सा करणस्य कथ्यते॥५०४॥

अनुपपत्तिबलेन विधेस्तयोः करणतैकतयोरवगम्यते।
करणतैकपशोरिति सङ्गतिर्न घटते हि विधिर्विरहय्य ताम्॥५०५॥

उपादानतः सङ्ख्या सङ्गतिः स्यादवच्छेदकत्वेन सङ्ख्यानिवेशात्।
पशोरेतयो(रेनयो)स्तेन मार्गेण कार्ये निवेशोपपत्तेरुपादानमानात्॥५०६॥

न चैवं विधिः कश्चिदत्रेति न स्यादुपादानतः सङ्गतिर्यत्पदार्थे।
विभक्त्यर्थसङ्ख्यार्थयोर्नेह कश्चिद्यतो वा इमानीति वाक्ये विधिर्नः॥५०७॥

अवितथमिदमेवमेतदस्मिन्न खद्द विधेर्वचनं पठन्ति वाक्ये।
यत इति घटते तथापि योगो वचनविभक्तिनिगद्ययोरिहापि॥५०८॥

एकत्वमेकवनेन समर्पितं यद्यच्छब्दवाच्यनिलयं यत इत्यमुष्मिन्।
पञ्चम्युपात्तमपि यत्प्रकृतित्वमस्मिन् सङ्गच्छते तदुभयं पशुवस्तुनीव॥५०९॥

एका या प्रकृतिः समस्तजननी तद्ब्रह्म जिज्ञास्यतामित्यत्रापि हि वस्तुनिष्ठवचने शक्यैव तत्सङ्गतिः।
विज्ञातुं विधिमन्तरेण च तथानर्थक्यभीत्या न हि स्वाध्यायाध्ययनैकगोचरविधेरायातमर्थं विना॥५१०॥

वचनार्थविभक्तिवाच्ययोरुपपन्नान्वयबुद्धिरर्थतः।
पशुनेति पदे यथा तथा यत इत्यादिपदेऽपि लक्षणे॥५११॥

विधिनिष्ठवाक्यमपि बोधयति स्वमपेक्षितं विषयमर्थवशात्।
परमात्मनिष्ठमपि तुल्यमिदं वचसोर्द्वयोरपि तु रूपमतः॥५१२॥

एकं चेतनमस्य यत्प्रकृतितामापन्नमुत्प्रेक्षते तद्ब्रह्मेति निशामयेति निपुणं ब्रूते परब्रह्मणः।
सिद्धं लक्षणमादरेण महता व्यावर्तयद्ब्रह्मणस्तत्त्वं तत्त्वमसीति वाक्यनिलयं तच्छब्दलक्ष्यं वचः॥५१३॥

त्रिविधलक्षणा

लक्ष्यस्य लक्षणमिह त्रिविधं प्रसिद्धं लोके स्वलक्षणममुष्य विशेषणं वा।
यद्वोपलक्षणमिमानि च लक्षणेन व्यावर्णयामि पृथगेव तु तत्प्रतीहि॥५१४॥

लक्ष्यार्थनिष्ठमुपलब्धमतोऽन्यतोऽर्थान्निःशेषतो यदतिरिच्य तदर्थवस्तु।
लक्ष्यं निवेदयति लक्षणमेतदाहुः सामान्यलक्षणमिदं त्रिषु लक्षणेषु॥५१५॥

लक्ष्यस्वरूपमपि सद्यदमुष्य साक्षादर्थान्तराद्भवति भेदकमेतदाहुः।
अस्य स्वलक्षणतयैव तु लक्षणं खं छिद्रं द्रवं जलमितीदृशमत्र लोके॥५१६॥

स्वानुरक्तमतिजन्मकारणं(हेतुतां) यत्पुनर्भवति लक्ष्यवस्तुनि।
तद्विशेषनतयास्य लक्षणं केसरादिकमिवाश्ववस्तुनि॥५१७॥

स्वानुरक्तमतिजन्महेतुतां लक्ष्यवस्तुनि निरस्य लक्षणम्।
अस्वरूपमपि तस्य यद्भवेत् काकवत्तदुपलक्षणं विदुः॥५१८॥

ब्रह्मलक्षणम्

विश्वोद्भवस्थितिलयप्रकृतित्वमस्य चिद्वस्तुनो यदसहायपरिग्रहस्य।
तद्वर्णनीयमुपलक्षणमेव कस्माद् ब्रह्मेति लक्ष्यपदशक्त्यविरोधहेतोः॥५१९॥

विश्वोद्भवस्थितिलयप्रकृतित्वरूपमेकाकिनो यदिह लक्षणमुच्यमानम्।
तद्ब्रह्मणो यदि विशेषणरूपमिष्टं ब्रह्मेति लक्ष्यविषयस्य पदस्य भङ्गः॥५२०॥

लक्ष्यार्थवाचि पदमत्र हि लक्षणार्थे वाक्ये प्रधानमितरद्गुणभूतमाहुः।
ब्रह्मेति लक्ष्यविषयं च पदं समर्थं भूमानमेव वदितुं न तु मर्त्यमल्पम्॥५२१॥

तस्मात्प्रधानपदभङ्गभयाद्गुणानां युक्तं ग्रहीतुमुपलक्षणगोचरत्वम्।
ब्रह्मेति चैतदुपलक्ष्यसमर्पणार्थमेवं समञ्जसमिदं पदजातमस्मिन्॥५२२॥

लक्ष्यस्वरूपकथनाय न लक्षणानि नाप्यस्य वाचकमिदं पदमित्यमुष्मै।
व्यावृत्तमेतदखिलादितरर्थजातादित्येतदेव वदितुं ननु लक्षणानि॥५२३॥

लक्ष्यस्वरूपमुपलभ्य तदेकनिष्ठं दृष्ट्वा च लक्षणमनेन तदेव लक्ष्यम्।
व्यावर्त्य बोधयितुमुत्सहते जनोऽयं तत्त्वान्तरादिति यतः प्रतिपन्नमेतत्॥५२४॥

संज्ञासंज्ञिसमन्वयावगतये नेष्टं क्वचिल्लक्षणं व्यावृत्तिप्रतिपत्तिमात्रजनकं लक्ष्ये भवेदन्यतः।
लक्ष्यं लक्षणवर्त्मना हि जगति व्यावर्तयन्तोऽन्यतस्तत्तल्लक्षणमादरेण महता सङ्गृह्यते वादिनः॥५२५॥

तस्माद्ब्रह्मणि वाच्यवाचकयुजासिद्ध्यै श्रुतिर्नाभ्यधाज्जन्माद्यस्य समीक्षितस्य जगतो यद्ब्रह्मणो लक्षणम्।
नापीदं स्वकरूपबोधनपरं सङ्कीर्तितं ब्रह्मणः किन्त्वब्रह्मपदार्थतोऽस्य सकलाद्यावृत्ततासिद्धये॥५२६॥

परिच्छिन्नवस्तुव्यवच्छेदसिद्ध्यै जगाद श्रुतिर्लक्षणं ब्रह्मणस्तत्।
परिच्छिन्नता प्रापिता पूर्वपक्षे परब्रह्मणस्तन्निषेधार्थमेतत्॥५२७॥

कालस्वभावपरमाण्वसुभृत्प्रधानस्कन्धप्रतीत्यखिलशून्यकथाप्रसङ्गे।
जन्मादिसूत्रमवतीर्णमियं श्रुतिश्च तस्मादिदम्परमिदं द्वितयं प्रवृत्तम्॥५२८॥

अधिष्ठात्रधिष्ठेयभाव्न योनिर्निमित्तं च यत्कारनं जन्मभाजाम्।
परिच्छिन्नतास्यापि सम्भावितैव प्रतीचोऽस्य भेदे परैरुच्यमाने॥५२९॥

ततस्तन्निषेधार्थमेतद्वभाषे श्रुतिर्ब्रह्म तद्भिन्नता तस्य कस्मात्।
प्रतीचोऽपि हि ब्रह्मता नित्यसिद्धा दृशो भेदसिद्धिर्निरालम्बनैव(म्बनेति)॥५३०॥

जगत्कारणत्वं पुनर्यत्र दृष्टं न तल्लक्षणं तत्स्वरूपप्रसिद्ध्यै।
स्वरूपे (स्वरूपं) यतो लक्षणे दृश्यमाने प्रसिद्धं ततो लक्ष्यवस्तुस्वरूपम्॥५३१॥

निमित्तं च योनिश्च यत्कारणं तत् परम्ब्रह्म सर्वस्य जन्मादिभाजः।
इति स्पष्टमाचष्ट एषा श्रुतिर्नः कथं सिद्धवल्लक्षणं सिद्धिबाह्यम्॥५३२॥

न खल्वीदृशं कारणं लोकसिद्धं यतोऽनूद्य तल्लक्षणं तेन लक्ष्यम्।
व्यवस्थापयन्ती प्रवृत्तैवमेषा विधत्ते नु वक्तीति चैतद्विरुद्धम्॥५३३॥

अनुवददिदमेव वाक्यमर्थादुपनयतीदृशकारणं प्रसिद्धम्।
अनुवदनमशक्यमन्यथा स्यादवगतगोचरमेव हीदमिष्टम्॥५३४॥

यथा विशिष्टस्य विधानतोऽर्थाद्विशेषणानां घटते विधानम्।
स्थितेऽनुवादेऽपि तथेह योज्यमनूद्यमानेऽपि जगन्निदाने॥५३५॥

अथवानुवादमुपलभ्य ततोऽनुपपद्यमानवपुषः प्रमितेः।
अपरं निमित्तमिह कल्प्यमिति प्रवदन्ति केचिदभियुक्ततराः॥५३६॥

अपि विशिष्टविधौ वचनान्तरादनुपपत्तिबलानुमितादिह।
विधिरशेषविशेषणगोचरो न तु पुनस्तत एव विधानतः॥५३७॥

जन्मादिलक्षणमिदं जगतो यदुक्तं सद्ब्रह्मणस्तदिह चिह्नतयोपदिष्टम्।
नास्मिन्प्रमाणमपरे पुनरेतदेव ब्रह्मप्रमाणमनुमानमुदीरयन्ति॥५३८॥

कार्यानुमानपरतन्त्रमिदं हि शास्त्रं शास्त्रस्य नोपकरणं तदितीक्षमाणाः।
तद्दुर्घटं न खद्द कारणमद्वितीयं चैतन्ययुक्तमिति कार्यवशात्प्रतीमः॥५३९॥

वेदान्तवाक्यमिह येन पथा प्रवृत्तं लोकप्रसिद्धपदशक्तिमुपाददानम्।
विश्वोद्भवस्थितिलयप्रकृतौ निमित्ते सच्चित्सुखात्मनि परात्मनि नैवमन्यत्॥५४०॥

भङ्क्त्वा कथञ्चिदनुमानवशेन सिद्धे सर्वेश्वरे कणभुगादिभिरुच्यमाने।
वेदान्तवाक्यमपि योज्यमतोऽनुमाने सापेक्षतोपनिषदां यदि साहसं तत्॥५४१॥

निष्कारणं श्रुतिशिरोवचनस्य भङ्गं ये वर्णयन्ति सहसा स्वमनोरथेन।
दीप्तस्य दावदहनस्य न ते किमर्थं ज्वालां पिबन्ति कथनीयमिदं बहुज्ञैः॥५४२॥

ननु सच्चिदादिवपुषो जगतः प्रकृतित्वबोधनमकारणकम्।
परमात्मनो न हि पदार्थयुजा रहितेह सम्भवति योग्यतया॥५४३॥

उपादानता सच्चिदानन्दमूर्तेर्विरुद्धा जडेष्वेव सा दृश्यते हि।
विरुद्धैः पदार्थैर्न वाक्यार्थसिद्धिर्न खल्वग्निनोक्षेदितीहान्वयोऽस्ति॥५४४॥

उपादानता चेतनस्यापि दृष्टा यथा स्वप्नसर्गे विचित्रे प्रतीचः।
यथा चोर्णनाभस्य सूत्रेषु पुंसां यथा केशलोमादिसृष्टौ च दृष्टा॥५४५॥

बुद्ध्यादिकार्येष्वपि चेतनोऽयं भवेदुपादानमितीष्यते च।
आत्मा गुणी ते च गुणाः प्रसिद्धा गुणी गुणानां प्रकृतिश्च सिद्धा॥५४६॥

आकाङ्क्षादिर्विद्यते योग्यतान्ता यस्मादस्मिन्नागमे(न्नागमाज्ञा) जायमाने।
सामाग्री या वैदिकैरस्य दृष्टा तस्माद्युक्ता योनिता चेतनस्य॥५४७॥

तस्मादेतल्लक्षणं चिह्नमाहुर्नैतत्तस्मिन् ब्रह्मणि स्यात्प्रमाणम्।
आम्नायस्य स्वप्रधानत्वहेतोर्लिङ्गस्यास्मिञ्छेषभावाच्च नित्यम्॥५४८॥

इत्थं जगत्कारणवादिवाक्यं समन्वितं ब्रह्मणि तत्पदार्थे।
तल्लक्षणं तस्य तटस्थभूतमानन्त्यसिद्धै कथयद्यथोक्तम्॥५४९॥

स्वात्मानमेव जगतः प्रकृतिं यदेकं सर्गे विवर्तयति तत्र निमित्तभूतम्।
कर्माकलय्य रमणीयकपूयमिश्रं पश्यन्नृणां परिबृढं तदितीर्यमाणम्॥५५०॥

पदवृत्तिसमन्वयावुभौ प्रतिपाद्यौ प्रथमे हि लक्षणे।
तदवान्तरवाक्यवर्त्मना पदवृत्तिः प्रथमं प्रकीर्तिता॥५५१॥

आद्ये सूत्रे त्वम्पदस्योदितत्वाद्वृत्तेरस्मिंस्तत्पदस्योच्यमाना।
वृत्तिर्ज्ञेया तत्पदार्थेऽद्वितीये प्रत्यङ्मात्रे त्वम्पदस्योदितैव॥५५२॥

अनधिकारिणि शुद्धचिदात्मके दृगदृशोरितरेतरविभ्रमात्।
शमदमादिसमन्वितते्ष्यते भवति तेन चितोऽप्यधिकारिता॥५५३॥

अनधिकारितया दृगवस्थिता स्वरसतः परमेश्वरविग्रहा।
घनतमः पटलावरणान्वयादुपगता श्रवणाद्यधिकारिताम्॥५५४॥

अज्ञानतज्जघटना चिदधिक्रियायां द्वारं परं भवति नाधिकृतत्वमस्याः।
नाचेतनस्य घटतेऽधिकृतिः कदाचित् कर्तृत्वशक्तिविरहादिति वक्ष्यते हि॥५५५॥

उपसत्तिवाक्यमधिकारिणि यत् कथितं समन्विततया प्रथमम्।
इदमेव चेतसि निधाय तु तत् मुनिना प्रकीर्तितमुदारधिया॥५५६॥

शिष्योपसत्तिवचनानि समन्वितानि शिष्ये चिदात्मनि परात्मनि नित्यमुक्ते।
इत्येतदत्र कथितं मुनिना त्वमर्थे त्वं शब्दवृत्तिकथनाय परे प्रतीचि॥५५७॥

उपसदनवचोविचारमार्गात् त्वमिति पदस्य परात्मनीह वृत्तिम्।
कथयति भगवान् द्वितीयसूत्रे तदिति पदस्य परात्मनीति भेदः॥५५८॥

आवृत्त्या वा तन्त्रवृत्त्याथवेदं सूत्रं युक्तिं वेदवाक्योपयुक्ताम्।
अप्याचष्टे बृंहणीमन्तरेण स्वार्थे युक्तिं वेदवाक्यं न पुष्टम्॥५५९॥

त्वम्पदार्थविषयं समन्वयं तत्पदार्थविषयं ततः क्रमात्।
तस्य शेषमपरं च वर्णयन् उक्तवानथ महावचोगतम्॥५६०॥

त्वम्पदस्य दृशि वृत्तिमद्वये तत्पदस्य च निवेदयन्मुनिः।
प्रत्यगद्वयपरं समन्वयं शेषिनं पुनरथाब्रवीत्तयोः॥५६१॥

शक्नोति सिद्धमवबोधयितुं च वाक्यं शक्नोति कार्यरहितं वदितुं च वाक्यम्।
शक्नोत्यखण्डमवबोधयितुं च वाक्यं शक्नोति मुक्तिफलमर्पयितुं च वाक्यम्॥५६२॥

एतत्समन्वयनिरूपणमेवमस्मिन् बुद्धिस्थतामुपगते सति वाक्यजन्यम्।
विज्ञानमद्वयगतं न ततोऽन्यदन्यत् पुंसोऽपराधकृतमित्युदियात् प्रतीतिः(प्रतीचिः) ॥५६३॥

इति प्रथमोऽध्यायः

सङ्क्षेप शारीरिकम्

अथ द्वितीयोऽध्यायः

ननु - वेदान्तवाक्यं प्रत्यक्षादिमानान्तरेण परिपीडिता

एवं समन्वयनिरूपणयावबोधो जातोऽप्यखण्डविषयो ननु वाक्यजन्यः।
मानान्तरेण परिपीडित एव जातो भेदप्रकाशनकृताक्षनिबन्धनेन॥१॥

मज्जत्यलाबु सहसाप्सु शिलाः प्लवन्त इत्यादिकादभिहितादिव वाक्यजातात्।
जातापि बुद्धिरपबाधितगोचरैवमद्वैतबुद्धिरपि भेदधियात्मनि स्यात्॥२॥

अध्यक्षगोचरमनर्थमवैमि वाक्यं निर्मुक्तमाह मम रूपमनर्थहेतोः।
एवं च वेदशिरसोऽक्षनिबन्धनेन ज्ञानेन बाधनमतीव हि दुर्निवारम्(दुर्निरूप्यम्) ॥३॥

कर्तृत्वमाह मम कर्मविधिर्नियोगसम्बन्ध(र्नियोगः सम्बन्ध)पूर्वकमपास्तसमस्तभेदम्।
मामाह वेदशिरसो वचनं तथा च सत्यस्य दुःस्थितमिवापतति प्रमात्वम्॥४॥

प्रत्यक्षकर्मवचसोरुभयोः समूहः सामर्थ्यवानुपनिषद्विषयापहारे।
एकैकमेव तु न पारयतेऽपहर्तुं स्वार्थप्रकाशनविधावुभयोः समत्वम्॥५॥

ज्यैष्ठात्समर्थमथवाक्षजमेकमेव तस्यैव कर्मविधिरस्तु सहायभूतः।
प्रत्यक्षमेव विधिवाक्यसहायमेवं ब्रह्मात्मवस्त्वपहरिष्यति को विरोधः॥६॥

उपनिषद्वाक्यानि प्रत्यक्षादि मानान्तरेण न परिपीडितानि

अत्रोच्यते न खद्दृ वेदशिराँसि मुक्त्वा किञ्चित्प्रमाणमिह तत्त्वनिवेदनाय।
शक्नोति येन भवतीह विरोधशङ्का वेदान्तवाक्यमुखतोऽवगते प्रतीचि॥७॥

अज्ञातमर्थमवबोधयदेव मानं तच्च (तत्त्व)प्रकाशकरणक्षममित्यभिज्ञाः।
न प्रत्यगात्मविषयादपरस्य तच्च मानस्य सम्भवति कस्यचिदत्र युक्त्या॥८॥

सर्वं परागविषयमेव हि मानजातं वेदावसानवचनानि तु वर्जयित्वा।
यद्भौतिकं किमपि भौतिकगोचरं तद्रूपप्रदीपकनिदर्शनतः प्रसिद्धम्॥९॥

यद्व्यञ्जकं किमपि लौकिकमीक्षितं तद्व्यङ्ग्येन तुल्यमवलोकितमत्र जात्या।
दीपः प्रकाशकतया विदितो हि लोके रूपेण तैजसतया सदृशः प्रसिद्धः॥१०॥

बुद्धिः समस्तविषयावगमे प्रवृत्ता सापि प्रकाश(प्रकाश्य)विषयेण समनजातिः।
बुद्धिश्च भौतिकतया श्रुतिषु प्रसिद्धा तेनास्तु सापि खद्दृ भौतिकगोचरैव॥११॥

एवं प्रमाणमखिलं बहिरर्थनिष्ठं वेदान्तवाक्यमपहाय यथोक्तहेतोः।
न प्रत्यगात्मविषयं श्रुतिरप्युवाच स्पष्टं पराञ्चिवचसार्थमिमं यथोक्तम्॥१२॥

पराञ्चि खानि व्यतृणत् स्वयम्भूस्तस्मत्पराङ् पश्यति नान्तरात्मन्।
कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्॥१३॥

यत् कर्मभावमनपास्य(मनिवार्य) निजप्रमेये संवित्तिसाधनतया जगति प्रसिद्धम्।
मानं जडार्थविषयं तदिहाभ्युपेयं न प्रत्यगात्मविषयं कथितोपपत्तेः॥१४॥

प्रमाणलक्षणम्

यत्तु प्रमाणवधीर्यं निजप्रमेये कर्मत्वमर्थमवबोधयितुं प्रवृत्तम्।
तत् प्रत्यगात्मविषयं भवितुं क्षमेत तत्तत्त्वमादिवचनं न ततोऽन्यदस्ति॥ १५॥

नाज्ञाततावगतिरस्ति जडेषु पूर्वं मेयेषु तत्स्फुरणकारणवर्जितत्वात्।
मानोदयान्न हि पुरा किमपीह मानं नापि प्रमेयबलतो जडता हि तस्य॥ १६॥

नाज्ञाततावगतये स्वयमेव बाह्यं मेयं समर्थमवबोधविलक्षणत्वात्।
नापि प्रमाणमवबोधोकमस्ति किञ्चिन्मानोदयात्पुर इति स्फुटमभ्युपेयम्। १७॥

नाज्ञाततामनवगम्य पुरा प्रवेशान्मानस्य किञ्चिदपि मानबलेन बोद्धुम्।
शक्नोति कश्चिदपि मानबलेन बुद्धं किं वा स्वभाव इति निश्चयहेत्वभावात्॥ १८॥

प्रक्षालनेन धवलं किमिदं बभूव किं वा पुरापि धवलं स्वयमेव वस्त्रम्।
इत्येवमेष न विवेक्तुमलं कदाचित् यो दृष्टवान्न मलिनं वसनं पुरस्तात्॥ १९॥

एवं पुरानधिगतं यदि नानुभूतं मानेन बोधितमिदं प्रतिभाति मेयम्।
न स्वप्रकाशमिति शक्यमिदं विवेक्तुं केनापि नैव तदवस्थतयैव दृष्टे॥ २०॥

अज्ञातमर्थमवबोधयितुं न शक्तमेवं प्रमाणमखिलं जडवस्तुनिष्ठम्।
किन्त्वप्रबुद्धपुरुषं व्यवहारकाले संश्रित्य सञ्जनयति व्यवहारमात्रम्॥ २१॥

सत्यमिथ्याविवेचनम्

आबोधतः सकलमेव हि सत्यमिथ्याभ्रान्तिप्रमाणविनिवर्त्यनिवर्तकत्वम्।
स्वप्नेऽपि दृष्टमिदमेवमिहापि जाग्रत्काले भवत्वखिलमापरमात्मबोधात्॥ २२॥

स्वप्ने तप्तशिलाधिरोहणगता निःश्रेयसोपायता मिथ्या ब्राह्मणतर्पणादिनिलया सत्या तथा लौकिकी।
स्रक् सत्या तदहिर्मृषैव विदितो निद्रानिवृत्तौ पुनः स्वप्ने दृष्टमशेषमेव वितथं ग्राह्यं तथा जागरे॥ २३॥

श्रेयःसाधनताग्निहोत्रनिलया सत्येति सङ्गृह्यते मिथ्या तप्तशिलाधिरोहणगता शिष्टैः परित्यज्यते।
रज्जुः सत्यतया स्थितैव तदहिर्मिथ्यैव तावद्भवेत् यावन्मूलतमोविदारणपटुर्विद्योदयो नागमत्
(नागमात्) ॥ २४॥

ननु - अद्वैतसमयः विज्ञानवादेन समः

ननु शाक्यभिक्षुसमयेन समः प्रतिभात्ययं च भगवत्समयः।
यदि बाह्यवस्तु वितथं नु कथं समयविमौ न सदृशौ भवतः॥ २५॥

यदि बोध एव परमार्थवपुः न बोध्यमित्यभिमतं भवति।
ननु चाश्रितं भवति बुद्धमुनेर्मतमेव कृत्स्नमिह मस्करिभिः॥ २६॥

अद्वैतमतविज्ञानवादयोः भेदम्

ननु मातृमानविषयवगतीरपरस्परं प्रति विभागवतीः।
उपयन् भदन्तमुनिना सदृशः कथमेष वैदिकमुनिर्भवति॥ २७॥

परमात्मसंश्रयतमोजनितं प्रविभक्तमेव तु परस्परतः।
स्थिरमभ्युपेतमिह नः समये ननु मातृमानविषयप्रभृतिः॥ २८॥

तमसा विनिर्मितमिदं सकलं चतुरः स पश्यति परः पुरुषः।
अविकारिबोधवपुरद्वयकः करणैर्विना सकलसाक्षितया॥ २९॥

निजमायया परिगतः पुरुषः परतन्त्रया तु निजया प्रभया।
परिकल्पितं सकलमाकलयन् स हि साक्षितामुपगतो भवति॥ ३०॥

ग्राह्यग्राहकयोः स्थिरत्वगमनी तत्प्रत्यभिज्ञा प्रमा नोपापत्स्यत चेदसेत्स्यदपि नौ सिद्धान्तयोस्तुल्यता।
सा निर्वक्ष्यति सिध्यतीति जगतः (नयतः) स्थैर्यं स्वरूपात्मकं चैतन्यस्य च भङ्गुरत्वमिव मे सर्वस्य ते
दर्शने॥ ३१॥

ननु - जाग्रत्स्वप्नावस्थयोः समानता

ननु कल्पितं यदि हि जागरितं वद कीदृशी खद्दे विलक्षणता।
स्वपनादमुष्य भवतोऽभिमता परिकल्पितत्वमुभयोस्तु समम्॥ ३२॥

जाग्रत्स्वप्नावस्थयोर्भेदः

न प्रमातरि सति प्रबाध्यते जागरः स्वपनदृष्टवस्तुवत्।
मातृमानविषयोपलब्धिभिः साकमेव तमसो निराकृतेः॥ ३३॥

देशकालपुरुषैरवस्थया जागरस्य खद्दे कारणं तमः।
साकमेव सहसा निरस्यते वेदवाक्यजनितात्मसंविदा॥ ३४॥

स्वप्नदृष्टमिह रज्जुसर्पवाद्देशकालपुरुषेषु बाध्यते।
जागरः पुनरयं तथाविधं बधकं न लभतेऽसमीक्षणात्॥ ३५॥

तेन सत्यमिह जागरं विदुः स्वप्नविभ्रमविरुद्धधर्मकम्।
आपरात्मपरमार्थदर्शनात् तेन बाधितवपुर्न सत्कचित्॥ ३६॥

तत्र सत्यमनृतं च भेदतः प्रत्यगात्मतमसा विकल्पितम्।
प्रक्षिणोति परमात्मवस्तुगा बुद्धिवृत्तिरविचालिनी सती॥ ३७॥

नित्यबोधपरिपीडितं जगद्विभ्रमं नुदति वाक्यजा मतिः।
वासुदेवनिहतं धनञ्जयो हन्ति कौरवकुलं यथा पुनः॥ ।३८॥

सत्यानिर्वचनीययोः भेदः अद्वैतैव प्रसज्यते

सत्यमेवमनृतं च दुर्लभं ब्रह्मवादिसमयाद्बहिः पुनः।
सत्यतो यदि पृथङ् मृषा भवेत् सत्यमेव तदपि प्रसज्यते॥ ३९॥

सत्यतो यदि मृषा न भिद्यते सत्यमेव सुतरां तदिष्यताम्।
न द्वयात्मकतयानृतं मतं पक्षयोः कथितदूषणद्वयात्॥ ४०॥

वेदवाक्यविषयस्य सत्यता बुद्धवाक्यविषयो मृषा भवेत्।
इत्यदः कथयितुं न शक्नुयात् ब्रह्मवादिसमयाद्बहिर्मुखः॥ ४१॥

सत्यमेवमनृतं च भेदतः कल्पितं भवतु वर्णितान्नयात्।
तत्र तद्घटयितुं हि शक्यते नेतरत्र कथितोपपत्तिभिः॥ ४२॥

व्यावहारिकमतोऽवगम्यतां मानजातमखिलं न तात्त्विकम्।
बाह्यवस्तुविषयं विरोधतोऽबुद्धबोधविधिशक्त्यसम्भवात्॥ ४३॥

एवं तत्त्वविनिवेदनशक्तियोगः सम्भाव्यतेऽनधिगताधितेरयोगात्।
मानान्तरस्य सकलस्य ततश्च तेन बाधस्त्रयीशिरसि वर्णयितुं न शक्यः॥ ४४॥

प्रत्यक्षं सत्यत्वं न प्रकाशते

आरम्भणादिवचसा खद्दे निर्विकल्पप्रत्यक्षबुद्धिमनुसृत्य विकल्पबुद्धेः।
आभासतां मुनिरुवाच तदास्य भावो विज्ञायते स्फुटतरो गुडजिह्विकायाम्॥ ४५॥

सत्सम्प्रयोग इति जैमिनिरप्युवाच यल्लक्षणं तदुभयोः सममेव विद्यात्।
आपाततस्तदथ युक्तिनिपीडितं सत् सन्मात्रसंविदि निषीदति निर्विशङ्कम्॥ ४६॥

तत्रापि दुर्घटमवैति यदा तु तत्त्वबोधं विवक्षति विसृज्य विकल्पजालम्।
किं कारणं वदति येन अ तत्त्वगामिविज्ञानमर्थमवबोधयदप्रबुद्धम्॥४७॥

औत्पत्तिके हि भगवानयमप्रबुद्धमर्थं प्रमाणविषयं कथयाम्बभूव।
अत्राह तत्र ननु धर्मगतं प्रमाणं तत्त्वार्थगामि कथितं न परात्मगामि॥४८॥

सत्यं यदाह पितृमान् व्यवहारदृष्टिमाश्रित्य तत्कथितवान्प्रकृतोपयोगात्।
दूरप्रसारितनिसृष्टनिगूढभावस्तद्बादरायणमतानयनात्प्रतीमः॥४९॥

द्रष्टव्य इत्यपि विधिर्न विधिप्रमेयमात्मानमेव विनियच्छति तत्कुतश्चेत्।
अज्ञातता च परमात्मन एव यस्माद्यस्माच्च कर्तृवशवर्ति न दर्शनं तत्॥५०॥

अर्हे कृत्यतृचश्च पाणिनिवचः स्पष्टं विधत्ते यतस्तस्माद्दर्शनयोग्यतां वदति नस्तव्यो न तत्त्वान्तरम्।
तस्मादात्मपदार्थमात्रनियतं मेयत्वमेकान्ततो द्रष्टव्यादिवचो वदत्यनुभवादज्ञात आत्मा यतः॥५१॥

रूप्यादिविभ्रममपेक्ष्य हि शुक्तिकादौ सत्सम्प्रयोगजनितैव तु बुद्धिवृत्तिः।
तामप्यपेक्ष्य सति संहृतसर्वभेदे सत्सम्प्रयोगजनिता मतिरभ्युपेया॥५२॥

वेदान्तवाक्यजनितां परमात्मबुद्धिवृत्तिं व्यपेक्ष्य पुनरत्र न काचिदस्ति।
सत्सम्प्रयोगजनिता भुवनत्रयेऽपि बुद्धिस्तमोविरचितं हि जगत्समस्तम्॥५३॥

धर्मेऽपि तत्त्वमतिरेव तु चोदनायाः सत्त्वादिवस्तुनि यथाक्षनिबन्धना धीः।
अज्ञाततापि सदृशी व्यवहारकाले तत्त्वावबोधसमये न तु तत्त्वबुद्धिः॥५४॥

आरम्भणादिवचनं सकलं प्रवृत्तं प्रत्यक्षबुद्धिविषयादपहर्तुमुच्चैः।
तत्त्वं यथोदितनयनेन विवर्तवादमाश्रित्य सत्यपरिणामिनिवारणेन॥५५॥

परिणामवादस्वीकारकारणम्

वाक्यप्रवृत्तिमनुसृत्य च सूत्रकारः सिद्धान्ततामनयदत्र विवर्तवादम्।
तत्त्वप्रकाशनविधावपहृत्य शक्तिमारम्भणादिवचनादपरप्रमायाः॥५६॥

आरम्भसंहतिविकारविवर्तवादानाश्रित्य वादिजनता खद्द वावदीति।
आरम्भसंहतिमते परिहृत्य वादौ द्वावत्र सङ्ग्रहपदं नयते मुनीन्द्रः॥५७॥

तत्रापि पूर्वमुपगम्य विकारवादं भोक्त्रादिसूत्रमवतार्य विरोधनुत्त्यै।
प्रावर्तत व्यवहृतेः परिरक्षणाय कर्मादिगोचरविधावुपयोगहेतोः॥५८॥

साक्षादिहाभिमतमेव विवर्तवादमाहत्य सूचयति पूर्वमपेक्षमाणः।
आरम्भणादिवचनेन विवर्तवादं शक्नोति वक्तुमुदिते परिणामवादे॥५९॥

आरुह्य भूमिमधरामितराधिरोढुं शक्येति शास्त्रमपि कारणकार्यभावम्।
उक्त्वा पुरा परिणतिप्रतिपादनेन सम्प्रत्यपोहति विकारमृषात्वसिद्ध्यै॥६०॥

विवर्तवादस्य हि पूर्वभूमिर्वेदान्तवादे परिणामवादः।
व्यवस्थितेऽस्मिन्परिणामवादे स्वयं समायाति विवर्तवादः॥६१॥

उपायमातिष्ठति पूर्वमुच्चैरुपेयमाप्तुं जनता यथैव।
श्रुतिर्मुनीन्द्रश्च विवर्तसिद्ध्यै विकारवादं वदतस्तथैव॥६२॥

आरम्भवादः कणभक्षपक्षः सङ्घातवादस्तु भदन्तपक्षः।
साङ्ख्यादिपक्षः परिणामवादो वेदान्तपक्षस्तु विवर्तवादः॥६३॥

विकारवादं कपिलादिपक्षमुपेत्यवादेन तु सूत्रकारः।
श्रुतिश्च सञ्जल्पति पूर्वभूमौ स्थित्वा विवर्तप्रतिपादनाय॥ ६४॥

अभेदिनः सावयवस्य सत्यविचित्ररूपान्तरदर्शकत्वम्।
वदन्ति धीराः परिणाममस्या वसुन्धराया इव सत्यसृष्टिम्॥ ६५॥

अभेदिनो निर्विकृतेरनेकमृषास्वरूपान्तरदर्शकत्वम्।
विवर्तशब्दार्थ इह प्रसिद्धस्तरङ्गभेदादिव चन्द्रभेदः॥ ६६॥

उपनिषदः विवर्तवादमेव उपपादयन्ति

अहं प्रजायेय बहु स्वयं स्यामित्यादिनादौ परिणाममुक्त्वा।
विकारमिथ्यात्वमथ ब्रुवाणा विवर्तवादं श्रुतिरानिनाय॥ ६७॥

मायाश्रुतिस्मृतिवचः सकलं तथा च वस्तुत्वमर्दनपरं घटते विवर्ते।
सर्वस्य कारणविकारविभागभाजः प्रागादृतस्य परमार्थतया प्रतीतेः॥ ६८॥

सङ्घातवादनिराकरणम्

सङ्घातवादमुपगम्य तु तत्र पक्षे संहन्त्रभाव इति सूत्रकृदाह दोषम्।
स्थायी भदन्तसमये न हि कश्चिदत्र सङ्घातसञ्जननशक्तिसमन्वितोऽस्ति॥ ६९॥

आरम्भवादनिराकरणम्

आरम्भवादमुपगम्य तदीययुक्तेस्तत्प्रक्रियामनुसरन् व्यभिचारमाह।
वैशेषिकं प्रति महद्वदिदं हि योज्यं यद्वापि दीर्घवदिदं जडमित्यनेन॥ ७०॥

ह्रस्वारब्धं त्र्यणुकमणुभिस्तद्वदारब्धमेतद् ह्रस्वं नो तन्न च तदणुवत्सम्मतं तद्वदेतत्।
सर्वं कार्यं गगनधरणीमध्यगं चेतनोत्थं निश्चित्कं नो जडिमघटितं युक्तमित्याचचक्षे॥ ७१॥

ह्रस्वाणुत्वे कारणद्वित्वहेतोर्जाते नैते पारिमाण्डल्यहेतोः।
दीर्घत्वं यद्यच्च दीर्घे महत्त्वं द्रव्ये ते द्वे कारणत्रित्वहेतोः॥ ७२॥

द्व्यणुकस्य जन्म परमाणुयुगात् परिमण्डलादिति कणादमतम्।
द्व्यणुकत्रयत्र्यणुकजन्म पुनर्नियमं न कश्यपसुतो वदति॥ ७३॥

द्व्यणुकत्र्यणुकव्यपाश्रयं परिमाणं प्रति कारणाश्रयः।
न तु कारणमिष्यते गुणस्तदवष्टम्भ्य वयं जिगीषवः॥ ७४॥

यदि कारणशंश्रयाद्गुणात् द्व्यणुकादेः परिमाणमिच्छति।
द्व्यणुकादिसमाश्रये तदा परिमाणेऽतिशयो विरुध्यते॥ ७५॥

परिणामवादमुपगम्य तथा रचनाद्यसम्भवमुवाच मुनिः।
परमेश्वरं न हि विना घटते जडरूपवस्तुपरिणाम इति॥ ७६॥

परमतखण्डनप्रक्रिया

क्वचिदभ्युपेत्य कथनं कुरुते परपक्षदूषणकथावसरे।
निजपक्षदोषपरिहारपरः क्वचिदभ्युपेतय् वदतीह मुनिः॥ ७७॥

परपक्षनिषेधमाचरन् क्वचिदङ्गीकरणं करोति सः।
परदर्शितदोषनुत्तये क्वचिदित्येष विशेष ईरितः॥ ७८॥

भोक्रादिसूत्रे परिणामवादमाश्रित्य तद्वादिभिरुक्तदोषम्।
समादधानो मुनिराह तस्मात् सिद्धान्तसिद्धिः पुनरुत्तरत्र॥७९॥

प्रत्यासन्ना परिणतिरियं विप्रकृष्टस्तु पूर्वः सङ्घातादिः सकल उदितो वेदसिद्धान्तसिद्धेः।
एतावत्त्वादियमभिमता सूत्रकारस्य भाति भ्रान्तिभ्रष्टस्फुटनिजमनः कौशलानां नराणाम्॥८०॥

त्रिविधदृष्टयः

आरोपदृष्टिरपवाददृष्टिरेवं व्यामिश्रदृष्टिरिति दृष्टिविभागमेनम्।
सङ्गृह्य सूत्रकृदयं पुरुषं मुमुक्षुं सम्यक्प्रबोधयितुमुत्सहते क्रमेण॥८१॥

आरोपदृष्टिरुदिता परिणामदृष्टिर्द्वैतोपशान्तिरपवादकदृष्टिरन्त्या।
मध्ये विवर्तविषया द्वयमिश्रदृष्टिर्व्यामिश्रदृष्टिरधरोत्तरभूमिभावात्॥८२॥

तत्त्वावेदकमानदृष्टिरधमा तत्त्वक्षतिर्मध्यमा नत्त्वप्रच्युतिविभ्रमक्षतिकरी तत्रान्त्यदृष्टिर्मता।
जीवैकत्वमुमुक्षुभेदगतितो व्यामिश्रदृष्टिर्द्विधा भिन्ना तत्र च पूर्वपूर्वमिलयादूर्ध्वोर्ध्वलब्धिर्भवेत्॥८३॥

परिणामबुद्धिमुपभृद्य पुमान् विनिवर्तयत्यथ विवर्तमतिम्।
उपमृद्य तामपि पदार्थधिया परिपूर्णदृष्टिमुपसर्पति सः॥८४॥

अधशब्दसूचितमुमुक्षुरिमं खदृ दृष्टिभेदमुदितक्रमतः।
उपढौकते विगलिताखिलधीरवतिष्ठते निजमहिम्नि ततः॥८५॥

परिणाम इत्यथ विवर्त इति बहवोऽहमेव च मुमुक्षुरिति।
परिपुष्कलं च परमं पदमित्यवगत्य तिष्ठति महिम्नि निजे॥८६॥

परिणामधियो विवर्तधीरपवादात्मतया व्यवस्थिता।
सकलद्वयमर्दिनीं धियं प्रति सारोपगिराभिधीयते॥८७॥

उभयव्यतिमिश्ररूपतां भजते तेन विवर्तधीरियम्।
प्रथमोत्तमयोर्द्वयोः पुनर्व्यतिमिश्रीभवनं न विद्यते॥८८॥

ननु – त्रिविधमुमुक्षुभेदात् त्रिविधदृष्टयः

कृपणधीः परिणाममुदीक्षते क्षापितकल्मषधीस्तु विवर्तताम्।
स्थिरमतिः पुरुषः पुनरीक्षते व्यगतद्वितयं परमं पदम्॥८९॥

पुरुषभेदवशाद्विविधा भवेत् क्षपितकल्मषधीरपि मध्यमा।
जगदनेकमुमुक्षुकमीक्षते पुरुष एकतरो न तथेतरः॥९०॥

त्रिविधदृष्टयः एकमुमुक्षुसम्बन्धि

इति तु केचिदुशन्ति महाधियस्तदपि सम्भवतीति न दुष्यति।
इह तु सूत्रकृताथगिरोदितः पुरुष एकविधस्त्रिविधो न तु॥९१॥

तिसृषु भूमिषु तस्य च तिष्ठतः क्रमवशात्स्वयमुत्तमभूमिका।
समुपसर्पति तत्र च तिष्ठतः समुपशाम्यति कारणकार्यधीः॥९२॥

श्रुतिवचाँसि मुनिस्मरणानि च द्वयविशारदगीरपि सर्वशः।
त्रयमपेक्ष्य दशात्रितयं विना न हि घटामुपयाति कदाचन॥९३॥

अतोऽनपोद्यैव(पोह्यैव) च तत्त्वसंविदुत्पादनेऽध्यक्षमितेः(मतेः) पुरस्तात्।
सामर्थ्यमक्षादिविरोधमस्य निवारयामास समन्वयस्य॥९४॥

इहाधुनारम्भणशब्दशक्तिं संश्रित्य तत्त्वावगतिक्षमत्वम्।
अक्षादिमानस्य निराकरोति समन्वयस्यापनयन् विरोधम्॥९५॥

अखण्डवाक्यार्थमनुव्रजन्ती समन्वयोत्थापितबुद्धिवृत्तिः।
अक्षादिभिस्तत्त्वनिवेदने हि सद्यः परिम्लायति निर्विशङ्कम्॥९६॥

अखण्डमेवाद्वयमात्मतत्त्वं त्रयीशिरोवाक्यमनुप्रविष्टाः।
वदन्ति शब्दा इति शब्दशक्तिनिरूपणे पूर्वमुदीरितं हि॥९७॥

अतो विरोधस्य निराससिद्धै निरयतेऽक्षादिषु तत्त्वभागः।
संरक्ष्यते संव्यवहारशक्तिभागः पुनः सर्वमतोऽनवद्यम्॥९८॥

चितिवस्तुनः स्वमहिमस्फुरणे स्वयमेव कारणमिति प्रगतम्।
प्रतिबध्य तच्चितिगताग्रहणं विपरीतबुद्धिमुपढौकयति॥९९॥

व्यवहारनिर्वहणशक्तिमसौ न चिदग्रहोऽस्य विनिवारयति।
परमार्थवेदनविधिक्षमतामवखण्डयन्नपि मनः प्रभृतेः॥१००॥

चितिवस्तुबुद्धिजनकस्य पुनर्वचसो न खण्डयति शक्तिमसौ।
स्वनिबन्धनस्फुरणमेव चितेः प्रतिबध्य तिष्ठति न वाचनिकम्॥१०१॥

प्रत्यक्षादेरेष दोषस्ततोऽयं वेदान्तानां नैव दोषानुबन्धः(नुषङ्गः)।
सत्यं वस्तु छादयन्नद्वितीयं द्वैतं यस्मादानयत्येष दोषः॥१०२॥

किञ्च प्रतीचि सकलोपनिषत्प्रसिद्धा मानान्तरं सकलमेव तु तत्पराचि।
प्रत्यक्पराग्विषयगोचरयोस्तु(योश्च) बुद्ध्योः स्पर्धा न सम्भवति मेयविभागसिद्धेः॥१०३॥

अभिन्न एवैष पटः समीक्ष्यते न भेदगन्धोऽपि पटे समीक्षते।
पटेऽपि भेदो यदि कल्प्यते तदा पटो विदीर्येत कुतस्तदा पटः॥१०४॥

घटात्पटो भिन्न इतीष्यते यदि स्फुटं प्रसज्येत विकल्पिता भिदा।
न सत्यमापेक्षिकमीक्षितं क्वचित् तथा च यत्नेन निरूपयिष्यते॥१०५॥

न भेदबुद्धिर्घटते प्रमाणतो विनापि धर्मिप्रतियोगिसंविदा।
न भेदबुद्धिं विरहय्य कल्पते तथैव धर्मिप्रतियोगिधीरपि॥१०६॥

परस्पराभावधिया न भेदधीर्विनोपपन्न न तथा विनेतरा।
इतीदमन्योन्यसमाश्रयं यतो मतिद्वयं तेन तदस्तु कल्पितम्॥१०७॥

असन्निवृत्तिर्न च सन्निवृत्तिर्न चोपपन्ना सदसन्निवृत्तिः।
जडप्रमाणस्य फलं ततोऽपि न तेन वेदान्तजबुद्धिबाधः॥१०८॥

असत्प्रसूतिर्न च सत्प्रसूतिर्न चोपपन्ना सदसत्प्रसूतिः।
जडप्रमाणस्य फलं ततोऽपि न तेन वेदान्तजबुद्धिबाधः॥१०९॥

जडार्थसंविन्न हि कुर्वतः फलं तदा हि कुर्वत्त्वमपीदृशं भवेत्।
अकुर्वतस्तत्फलमित्युदीरयन् विहस्यते दुर्मतिरर्भकैरपि॥११०॥

सती न संवित्क्रियते हि सत्त्वान्न चासती तद्वदसत्त्वहेतोः।
न चोपपन्नं सदसत्त्वमस्यास्ततो न कार्यत्वमुपैति संवित्॥१११॥

न शक्यमुत्पाद्यमिति प्रशस्यते तदा हि शक्तेरपि जन्यतापतेत्।
अशक्यमुत्पाद्यमितीष्यते यदि द्रुतं नभश्चूर्णय मुद्गरादिभिः॥ ११२॥

जडप्रमाणस्य फलानिरूपणाज्जडस्य तत्त्वं न निरूपणक्षमम्।
अतो न मानान्तरमर्थतोऽपि नस्त्रयीशिरोवस्तु निराकरिष्यति॥ ११३॥

आत्मन्येव समस्तमस्तु यदि वा मानान्तरं तेन च स्पष्टं वेदशिरोविरुद्धमिति च स्वीकुर्महे कामतः।
एवं सत्यपि पूर्वभावि सकलं मानान्तरं बाधते पश्चात्कस्यचिदेव वेदशिरसो जाता परब्रह्मधीः॥ ११४॥

पौर्वापर्ये पूर्वदौर्बल्यमिति सूत्रम्

पूर्वोत्पन्नमृगाम्बुविभ्रमधियो बाधं विना नोत्तरं विज्ञानं समुदेतुमृषरभुवो याथात्म्यमावेदयत्।
शक्नोतीति यथा मृगाम्बुधिषणामुन्मृद्यदुत्पद्यते तद्वद्वेदशिरोवचोजनितधीर्भेदभ्रमं ब्रह्मणि॥ ११५॥

पौर्वापर्ये पूर्वदौरबल्यमाह षष्ठेऽध्यायेऽवस्थितो जैमिनिर्यत्।
वक्ष्यामस्तत्सर्वमानीय तुभ्यं बुद्धिं स्वीयां सम्यगत्रावधत्स्व॥ ११६॥

उद्गातृप्रतिहर्तृकतया जातौ वियोगौ क्रमाद् यस्मिन्कर्मविधिप्रयोगसमये तत्रैष नः संशयः।
किं सर्वद्रविणव्ययो भवतु वा संस्थापनं दक्षिणाहीनस्येति तदा परं बलवदित्यूचे मुनिर्जैमिनिः॥ ११७॥

यद्वत्प्राकृतवैकृतावतितरामन्योन्यसंस्पर्धिनौ धर्मौ बाध्यनिवर्तकावभिमतौ बुद्धौ क्रमेणान्वयात्।
पाठव्यत्ययसम्भवेऽपि च तयोर्बुद्धिक्रमो विद्यते पूर्वा प्राकृतधर्मधीरितरधीरन्त्या तथैवोत्तिथेः॥ ११८॥

सापेक्षावुदितौ यदा तु भवतः पूर्वापरप्रत्ययौ पूर्वस्तत्र निवर्तको भवति तत्रान्यो निवर्त्यो यथा।
वेदोपक्रमजा मतिर्बलवती नर्गादिसंहारजा वेदोपक्रममुख्यभाग्भवति तत्रर्गादिवाणी गुणात्॥ ११९॥

ब्रह्म पुच्छमिति वाक्यगामिनोर्ब्रह्म पुच्छमिति शब्दयोर्द्वयोः।
ब्रह्मशब्दबलवत्तरत्वतः पुच्छशब्दपरिपीडनं मतम्॥ १२०॥

अथ यद्युपक्रमणमल्पतरं भवति प्रभूतमुपसंहरणम्।
बलवत्तदा चरममेव भवेदुभयोर्विरोधसमये नितराम्॥ १२१॥

अथ यद्युपक्रमणमल्पमपि प्रतिपाद्यवस्तुविषयं भवति।
अविवक्षितार्थविषयं चरमं भवति प्रभूतमपि बाध्यमदः॥ १२२॥

आसन्नवस्तुविषयेण यथाक्षजेन बाधो भवत्यनुमितेर्व्यवधानयोगात्।
प्रत्यक्तवमात्रविषयेण तथागमेन युक्तोऽक्षजादिविषयावगमस्य बाधः॥ १२३॥

किञ्चान्नायवचः प्रमेयबलतः सर्वं प्रमाणान्तरं स्वार्थं साधयतीति तत्सकलमेवायत्तमस्मिन् भवेत्।
यद्यत्रायतते विरोधसमये तेनास्य तद्बाधने सामर्थ्यं न च विद्यते श्रुतिवचो बाधो यथा हि स्मृतेः॥ १२४॥

ब्रह्मज्ञानसमुद्भवं ग्रहगणं सातिग्रहं ब्रह्मणः स्वाकारग्रहणेन वेदशिरसो जाता मतिर्बाधते।
विद्यावस्तुबलेन जन्म लभते माया तु निर्वस्तुका सा तामुद्भवमात्रतः क्षपयति ध्वान्तं यथा
भास्करः॥ १२५॥

रागद्वेषप्रशाखं विषयगुणसमुद्भासिधीवृत्तिशाखं धर्माधर्मप्रवृत्तिप्रचुरसुखसमुद्वेगभोगप्रवालम्।
छिन्द्याः संसारवृक्षं निशितमतिमहाशस्त्रनिक्षेपदक्षः प्रत्यक्तत्वस्थलीगं निबिडितमतमोमूललब्ध-
प्ररोहम्॥ १२६॥

प्रत्यग्वस्तुन एव तत्र विषये माया तमः कारणं ध्वान्तं बीजमबोध इत्यपि गिराविद्यैव सङ्कीर्त्यते।
तस्या एव विलास एष भवता गुर्वादिभेदान्वितः सङ्कल्पो न तु विद्यते पृथगसौ सन्ध्ये यथा धामनि॥ १२७॥

एकजीववादानुसारेण बन्धमोक्षभेदम्

मुक्तामुक्तौ विद्वदज्ञौ त्वदन्यावाकाशादि क्षमावसानं च विश्वम्।
स्वाविद्योत्थस्वान्तनिष्पन्दनं तद्विज्ञातव्यं मा ग्रहीरन्यथैतत्॥ १२८॥

कालोऽतीतोऽनादिरेष्यन्ननन्तो मुक्तामुक्तौ तत्र पूर्वं तथोर्ध्वम्।
तस्मादेतद्दुर्घटं शङ्कसे चेन्मा शङ्किष्ठाः स्वप्नदृष्टान्तदृष्टेः॥ १२९॥

सुप्तो जन्तुः स्वल्पमात्रेऽपि काले कोटीः पश्येद्वृत्तसंवत्सराणाम्।
पश्येत्कोटीरेवमागामिनां च जाग्रत्काले योजयेत्सर्वमेतत्॥ १३०॥

कालोऽनादिस्तत्र मुक्तः शुकादिः कालोऽनन्तो मोक्ष्यते तत्र चान्यः।
इत्येवं ते बन्धमोक्षव्यवस्थासंसिद्धिः स्यादापरात्मप्रबोधात्(परात्मत्वबोधात्)॥ १३१॥

अज्ञानं सकलभ्रमोद्भवनकृत्पिण्डेषु सामान्यवत् जीवानां प्रतिबिम्बकल्पवपुषां बिम्बोपमे ब्रह्मणि।
विद्वांसं पुरुषं जहाति भजते विद्याविहीनं नरं नष्टानष्टमिवात्मपिण्डमधुना जातिस्तथैके जगुः॥ १३२॥

अज्ञानानि बहून्यसङ्ख्यवपुषो जीवान्मुमुक्षूनपि ज्ञानाज्ञानसमाश्रयाननुयुगं तेषां च निःश्रेयसम्।
मायामीश्वरसंश्रयामनुगमात्संसारसंवर्तिनीं केचिद्दैवविघातनिघ्नमनसः स्वीचक्रुरल्पश्रुताः॥ १३३॥

आकाशे विहगोऽस्ति नास्ति च यथा तद्वत्परब्रह्मणि स्वच्छे चिद्वपुषि स्वभावविमलेऽसङ्गे शिवे शाश्वते।
निर्भेदेऽनुदयव्ययेऽनवयवेऽविद्या भवेन्नो भवेदित्येवं निरवद्यमाहुरपरे पक्षव्यवस्थार्थिनः॥ १३४॥

शुद्धे वस्तुनि यद्यपि प्रविशति ध्वान्तं मनः कारणं स्वीकृत्यैव तथाप्युपाधिमपरं ब्रह्मस्वरूपे विशेत्।
तच्चान्तःकरणं सुसूक्ष्मवपुषा तिष्ठद्बहिः सर्वदा चैतन्ये तमसो नियामकमिति स्वीचक्रुरन्ये पुनः॥ १३५॥

अज्ञानि ब्रह्म बुद्धेरनुसरति ततः स्थावरं जङ्गमं च स्वाज्ञानादेव भूत्वा क्वचिदवगतितो मुक्तमन्यत्र बद्धम्।
तच्चाज्ञानं विनष्टं स्थितमथ च तदेवांशभेदोपपत्तेरेवं सर्वव्यवस्था परमपुरुषगा जाघटीतीति केचित्॥ १३६॥

बाह्याध्यात्मिकवस्तुजातजननी माया हरेर्बन्धनी शक्तिर्दाशकजालवत्प्रसरनं प्राप्नोत्यविद्यावतः।
जीवान्सङ्कुचतीच्छया भगवतः सत्यास्तु मिथ्याथवा सङ्कोचश्च विलक्षणश्च भवतः स्वाभाविका-
वित्यपि॥ १३७॥

संस्कारभ्रमसन्ततिं प्रतिनरं भिन्नां परब्रह्मणि स्वीचक्रुर्विषये प्रवाहवपुषानादिं तमः केचन।
तामुच्छिद्य समुच्चयेन घटते मोक्षाय कश्चिन्नरः कश्चित्तद्विरहेण संसरति ना जीवाश्रया सेति च॥ १३८॥

अज्ञस्तावत्प्रत्यगात्माहमज्ञ इत्येवं नः सिध्यति स्वप्रकाशात्।
अज्ञातं तु ब्रह्म सिध्येत्कुतो वः सम्यग्ज्ञानाद्भ्रान्तितः स्वप्रकाशात्॥ १३९॥

सम्यग्ज्ञानाद्ब्रह्मणः सिद्धिपक्षे जाड्यं तस्य स्याद्घटादेर्यथैव।
सम्यग्ज्ञानाद्ब्रह्मणोऽज्ञानसिद्धौ तस्यापि स्यात्सत्यता तद्वदेव॥ १४०॥

भ्रान्तिज्ञानाद्ब्रह्मणः सिद्धिपक्षे तस्यापि स्यात्कल्पितत्वं तमोवत्।
अज्ञातं चेद्ब्रह्म नः स्वप्राक्शं मा भाषिष्ठा नानुभूतिस्तथा नः॥ १४१॥

अज्ञातत्वे यानवोचाम दोषान् मायावित्वे ब्रह्मणस्तानवेहि।
मिथ्याज्ञानात्स्वप्रकाशात्प्रमाणात् संसिद्धिः स्यात्तस्य तत्कथ्यतां नः॥ १४२॥

मिथ्याज्ञानाद्ब्रह्मणः सिद्धिपक्षे मायेव स्यात्कल्पितं तच्च तद्वत् (तावत्)।
मानादिष्टं ब्रह्म मायावि चेद्वो मायायाः स्यात्सत्यता जाड्यमस्य॥ १४३॥

तन्मायावि ब्रह्म चेत्स्वप्रकाशं मायापि स्याद्ब्रह्मवत्स्वप्रकाशा।
मायां पश्येद्ब्रह्म चेत्स्वप्रकाशं तत्रापि स्यात्स्वानुभूत्या विरोधः॥ १४४॥

आत्मा मूढः स्वप्रकाशो यथायं नैवं मायि ब्रह्म नः स्वप्रकाशम्।
अज्ञादन्यद्ब्रह्म चेत्स्वप्रकाशं द्वे विस्पष्टे स्वप्रकाशे स्फुरेताम्॥ १४५॥

ज्ञायन्ते चेद्ब्रह्मणा जीवभेदा जाड्यं तेषां कुड्यवन्निर्विवादम्।
न ज्ञायन्ते ब्रह्मणा चेत्तदानीं सर्वज्ञत्वव्याहतिर्दुर्निवारा॥ १४६॥

जीवा एते स्वप्रकाशस्वभावा निर्भासन्ते ब्रह्मणश्चेद्विभक्ताः।
तेषां भेदः स्वप्रकाशो न वा स्याद्दोषं ब्रूमो दुर्निवारं द्विधापि॥ १४७॥

तेषां भेदः स्वप्रकाशो यदीष्टः सत्यत्वं स्यात्तस्य तेषां तथैव।
वेद्योऽभीष्टस्तद्विभागो यदि स्यात्तानज्ञात्वा तद्विभागो न वेद्यः॥ १४८॥

जीवाः सर्वे त्वां प्रति प्रस्फुरन्तः सम्यग्ज्ञानात् प्रस्फुरन्ति स्वतो वा।
यद्वा मिथ्याज्ञानसामर्थ्यतोऽमी पक्षः कस्ते रोचते ब्रूहि तन्मे॥ १४९॥

सम्यग्ज्ञानाज्जीवभेदप्रसिद्धावद्वैतत्वं ब्रह्मणो न प्रसिध्येत्।
जीवाः सर्वे मां प्रति स्वप्रकाशा इत्युक्तिस्ते स्वानुभूत्या विरुद्धा॥ १५०॥

मिथ्याज्ञानाज्जीवभेदप्रसिद्धौ सम्यग्ज्ञानाद्बाध एवाभ्युपेयः।
मिथ्याज्ञानाद्रज्जुसर्पः प्रसिद्धः सम्यग्ज्ञानात्तस्य बाधोऽपि सिद्धः॥ १५१॥

एकोपाधावेकवस्तुप्रसिद्धौ भावाभावौ नेक्षितौ क्वापि लोके।
पक्ष्यादीनामस्तिता नास्तिता च व्योम्येकस्मिन्नप्यवच्छिन्न एव॥ १५२॥

सोऽवच्छेदोऽप्यस्ति नास्त्यम्बरे चेत्तत्रान्वेष्यः कोऽप्यवच्छिन्नभावः।
सोऽवच्छेदोऽप्यस्ति नास्त्यम्बरे चेद् बाढम् तस्मिन् सोऽप्यवच्छिन्न एव॥ १५३॥

नन्वेवं स्याद्दुर्निवारानवस्था बाढं का नो हानिरिष्टैव सापि।
कर्मोद्भूतं नः शरीरं शरीरात् कर्मोद्भूतिस्तत्र किन्नेष्यते सा॥ १५४॥

किञ्चाज्ञानं ब्रह्मणोऽप्यस्ति नास्तीत्येतत्कस्मात्त्वं विजानासि हेतोः।
मूढोऽस्मीति प्रत्ययादस्तिबुद्धिर्मुक्ते दाहान्मोहनास्तित्वबुद्धिः॥ १५५॥

मुक्तेऽज्ञानं दग्धमित्येतदेवं कस्माद्धेतोर्वेत्सि तत्कथ्यतां नः।
मिथ्याज्ञानात्स्वप्रकाशात्प्रमाणान्मुक्तेऽज्ञानं दग्धमित्यस्य सिद्धिः॥ १५६॥

सम्यग्ज्ञानान्मुक्तिसिद्धिर्यदीष्टा नूनं मुक्तः कुड्यवत्ते जडः स्यात्।
मिथ्याज्ञानान्मुक्तिसिद्धिर्यदीष्टा स्रक्सर्पादिप्रख्य एवैष मुक्तः॥ १५७॥

मुक्तो मह्यं स्वप्रकाशश्चकास्तीत्येषा वाणी स्वानुभूत्या विरुद्धा।
न ह्यश्रुत्वा शास्त्रमेतन्मनुष्यः कश्चिज्जानात्येष मुक्तः शुकादिः॥ १५८॥

ताटस्थ्येनोपाधिमादाय मोहश्चैतन्येऽस्मिन् स्वप्रकाशे प्रविष्टः।
तेनेह स्याद्बन्धमोक्षव्यवस्थेत्युक्तं यत्प्राग्दूषणं तस्य विद्धि॥ १५९॥

ताटस्थ्येनोपाधिरङ्गं यदि स्यान्मोहाविष्टे ब्रह्मणि स्वप्रकाशे।
अग्निक्षेपस्योल्मुकं यद्वदेवं मोहस्य स्यान्न प्रदेशस्थितत्वम्॥ १६०॥

अग्निः क्षिप्तो ह्युल्मुकेन प्रदेशमात्रव्याप्तिं वर्जयित्वा समस्तम्।
वेश्म व्याप्नोत्येवमेवेह कृत्स्नं ब्रह्म व्याप्नोत्याधिनास्तं तमोऽपि॥ १६१॥

तस्माद्ब्रह्माविद्यया जीवभावं प्राप्यासित्वा तावके तु स्वरूपे।
त्वच्चित्तेन स्पन्दितं जीवजातमाकाशादि क्ष्मावसानं च पश्येत्॥ १६२॥

स्वीयाविद्याकल्पिताचार्यवेदन्यायादिभ्यो जायते तस्य विद्या।
विद्याजन्मध्वस्तमोहस्य तस्य स्वीये रूपेऽवस्थितिः स्वप्रकाशे॥ १६३॥

अज्ञानि ब्रह्म जीवो भवति भवति च स्पष्टमज्ञानमस्य प्रागस्पष्टं सदन्तःकरणनिपतितज्योतिराभासयोगात्।
चैतन्येकप्रतिष्ठं स्फुरति न हि तमस्तादृशं यादृशं तद्बुद्धिस्थाभासनिष्ठं स्फुरति तदुचितं जीवमौढ्या-
भिधानम्॥ १६४॥

अज्ञानं जडशक्तिमात्रवपुषा जीवाद्बहिः सिध्यति जीवारूढमहं न जान इति तु ज्ञानापनोद्यात्मना।
संसिद्धिं प्रतिपद्यते तदुचितं जीवाज्ञाताभाषितं द्वैरूप्ये सति रूपमेकमनिशं भात्येवमन्यन्न हि॥ १६५॥

जडशक्तिमात्रवपुषा गगनश्वसनादिकार्यजननी भवति।
पुरुषोत्तमस्य वशवर्तितया प्रकृतिः परस्य जगदेकगुरोः॥ १६६॥

इयमेव सर्वजननी प्रकृतिर्वशिनी शरीरिणमिमं पुरुषम्।
अधिरुह्य जीवमहमज्ञ इति स्फुरणैकगोचरवपुः स्फुरति॥ १६७॥

चितिशक्तिबाधितवपुः परमं पुरुषं प्रति स्फुरति सा प्रकृतिः।
चितिशक्तिबाधकवपुः पुरुषं पुरवर्तिनं प्रति पुनः स्फुरति॥ १६८॥

दृश्यत्वजाड्यपरतन्त्रचिदाश्रयत्वैर्मायेश्वरस्य तमात्मतयानुमेया।
स्वप्नप्रपञ्चरजतभ्रमलिङ्गदेहदिक्चन्द्रविभ्रममरीचिजलोपमानैः॥ १६९॥

एकाज्ञानविकल्पितं सकलमेवाकाशपूर्वं जगद्बाध्यत्वादिह यद्यदीदृशमदस्तादृङ्मतं स्वप्नवत्।
बाध्यं चेदमभीप्सितं भवति वस्त्समादिदं तादृशं शुद्धं धूमवदेव साधनमिदं तत्पाञ्चरूप्यान्वयात्॥ १७०॥

अनुमानमागमविरुद्धं प्रतिवादिनो यदि मतं तदसत्।
न तमोऽतिरिच्य जगतो जनकप्रतिपादकं वचनमस्ति यतः॥ १७१॥

आत्मा - अविद्यायाः अधिष्ठानम्

विषयकरणदोषान्न भ्रमः संविदि स्यादपि तु भवति मोहात्केवलादेवमेव।
भगवति परमात्मन्यद्वितीये समस्तद्वयमतिरियमस्तु भ्रान्तिरज्ञानहेतुः॥ १७२॥

अज्ञानिनो भवति दुःखमनेन क्लृप्तं सर्वेश्वरस्य न खदृ प्रतिभासतोऽपि।
सर्वज्ञतादिगुणजातममुष्य नास्य संसारिणः स्फुरति मोहसमन्वितस्य॥ १७३॥

जीवन्मुक्तिगतो यदाह भगवान् सत्सम्प्रदायप्रभुर्जीवाज्ञानवचस्तदीदृगुचितं पूर्वापरालोचनात्।
अन्यत्रापि तथा बहुश्रुतवचः पूर्वापरालोचनान्नेतव्यं परिहृत्य मण्डनवचस्तद्यन्यथा प्रस्थितम्॥ १७४॥

जीवेश्वरयोः भेदः

जीवस्य कार्यकरणाधिपतेरविद्यादोषान्वितस्य तमसावृतमूढदृष्टेः(वृतमन्धदृष्टेः)।
ज्ञानं निरावरणमैश्वरमित्यपीदं भाष्याक्षरं कथितनीतिवशेन योज्यम्॥ १७५॥

स्पष्टं तमःस्फुरणमत्र न तत्र तद्वत् सर्वेश्वरे तदिति तत्र निषिध्यते तत्।
बिम्बे तमोनिपतिते प्रतिबिम्बके वा देहद्वयावरणवर्जितचित्स्वरूपे॥ १७६॥

किञ्चिज्ज्ञतास्य तमसावृतनित्यदृष्टेः सर्वज्ञता पुनरमुष्य परस्य पुंसः।
अज्ञानतज्जकरणादिविवर्जितत्वादित्येतदेवमुपपन्नतरं हि भाष्यम्॥ १७७॥

अज्ञोऽहमित्यवगतिर्न परस्य पुंसः सर्वज्ञतावगतिरात्मनि नास्य पुंसः।
अत्रापि कारणमहङ्कृतिवर्जितत्वं तद्वत्तया (तद्वद्धता) च परमेऽल्पतरे च पुंसि॥ १७८॥

बिम्बस्य नापि तमसि प्रतिबिम्बकस्य सङ्घट्टनं क्वचिदहङ्करणेन शक्यम्।
वक्तुं प्रभोः सकललोकहितावतारस्वेच्छाविनिर्मितवपुर्वरमन्तरेण॥ १७९॥

नाहङ्कृतिं च परिहृत्य तमास्विताधीः सम्भाव्यतेऽपहतपाप्मनि नित्यमुक्ते।
तामन्तरेण घटते न च मूढभावसम्भावनापि परमेशितरि प्रसन्ने॥ १८०॥

स्वेच्छाविनिर्मितवपुर्भजतोऽपि तस्य नाज्ञानितावगतिरस्ति वशित्वहेतोः।
वश्यत्वहेतुकमिदं स्फुरणं नराणां नाहं विजान इति नास्ति तदीश्वरस्य॥ १८१॥

सङ्कल्पपूर्वकमभूद्रघुनन्दनस्य नाहं विजान इति कञ्चन कालमेतत्।
ब्रह्मोपदेशमुपलभ्य निमित्तमात्रं तच्चोत्ससर्ज स कृते सति देवकार्ये॥ १८२॥

अज्ञानवर्जिततया परमेश्वरोऽसौ सर्वज्ञ व यदहङ्कृतिबन्धहीनः।
ज्ञानं निरावरणमिष्टममुष्य यस्माज्जीवस्य सावरणमेव यतोऽनभिज्ञः॥ १८३॥

सर्वप्रमाणफलभूतसमस्तसंविज्जातं (संविज्ज्ञानं) बिभर्ति परमः पुरुषो न जीवः।
ज्ञानं निरावरणमैश्वरमस्तु तमाज्जैवं च सावरणमस्य विशेषहेतोः॥ १८४॥

अज्ञानतज्जमखिलं जगदात्मभासा नित्यं प्रकाशयति सन्निहितः सदात्मा।
जीवस्तु नैवमिति सावरणं तदीयं ज्ञानं निरावरणमैश्वरमुच्यते हि॥ १८५॥

ज्ञानात्मकस्यामलसत्त्वराशेरपेतदोषस्य सदा स्फुटस्य।
किं वा जगत्यत्र समस्तपुंसां अज्ञातमस्यास्ति हृदि स्थितस्य॥ १८६॥

मायामसौ वितनुते विभुरेवमेनां सर्वेश्वरः सततमेव वशीकरोति।
इत्यादिवाक्यमुपपन्नतरं पुराणे स्वाज्ञानमस्य हि वशे चिदधीनभावात्॥ १८७॥

जीवाज्ञतावचनमेवमिदं समस्तं सर्वत्र योज्यमितरत्र च तन्निषेधः।
तस्मात्समञ्जसमिदं मतमस्मदीयमाचार्यवाक्यमुपपन्नतरं हि तत्र॥ १८८॥

चैतन्यमेव च तमस्वि तदप्रबुद्धं सर्वज्ञमेतदिह विश्वमिमं विभागम्।
जीवेश्वरौ च जगदित्यपि निर्मिमीत इत्येव वेदशिरसः प्रथितः प्रचरः॥ १८९॥

जीवेशानजगद्विभगजननी शक्तिर्जडा वैष्णवी मायेशानगता सती भवति सा जीवावधिर्मोहगीः।
जीवानीश्वर एव मोहयति ते जीवा विमुह्यन्त्यतः शश्वद्विश्वदृगीश्वरो भवति ते जीवा विमूढा मुहुः॥ १९०॥

अज्ञानिनो भवति मोहविजृम्भितं तु दुःखं जगज्जनकता परमेश्वरस्य।
मायामयी भवति तेन विलक्षणत्वमेकान्ततः श्रुतिशिरःसु तयोः प्रसिद्धम्॥ १९१॥

चैतन्यस्याज्ञानशक्तेरनादेर्जीवत्वं तु व्यञ्जकं कल्पयन्तः।
जीवारूढं व्यक्तमज्ञनमाहुर्जीवो मूढः कथ्यतेऽतो बहुज्ञैः॥ १९२॥

अत्रैव वस्तुनि दृढं व्यवतिष्ठमानः प्रौढिप्रदर्शनपरः पुनरन्यदन्यत्।
भाषापदं किमपि निक्षिपति स्फुटं तदस्माभिरेवमुपपादितमञ्जसैव॥ १९३॥

विस्पष्टमात्ममतमेव हि सर्वधर्मसूत्रेण सूत्रकृदिदं दृढमाचचक्षे।
सर्वज्ञतादिपरिपालनतत्परः संस्तत्रैव भाष्यकृदपीदमुवाच यत्नात्॥ १९४॥

अज्ञानित्वं ब्रह्मणो जीवता चेन्नाज्ञानित्वं तत्र जीवस्य युक्तम्।
अज्ञानित्वे चान्यदप्यभ्युपगमज्ञानित्वं यद्यहो कष्टपिष्टिः॥ १९५॥

अज्ञानित्वं ब्रह्मणश्चानभीष्टमस्मिन्पक्षे दुर्निवारं प्रसक्तम्।
अज्ञानित्वं ब्रह्मनश्चेदभीष्टमस्मत्पक्षस्त्यज्यते कस्य हेतोः॥ १९६॥

शुद्धत्वार्थं ब्रह्मणस्त्यज्यते चेदस्मत्पक्षेऽप्यस्ति शुद्धत्वमस्य।
अस्मत्पक्षे शुद्धता वास्तवी चेत् युष्मत्पक्षे कल्पिता शुद्धता किम्॥ १९७॥

कष्टः कष्टः कल्पितब्रह्मवादः श्रेयोमार्गाद्भ्रश्यतो भ्रान्तबुद्धेः।
त्यक्तव्यस्ते सज्जनैरस्मदीयः श्रेयोमार्गः श्रेयसे चाभ्युपेयः॥ १९८॥

एकोपाधावस्तिता नास्तिता च मूढत्वस्य स्वीकृता चेत्परस्मिन्।
व्योम्येकस्मिन्नस्तिता नास्तिता च पक्ष्यादीनां यद्वदिष्टा तथैव॥ १९९॥

नैतत्सारं सख्यमिष्टं (सत्त्वमिष्टं) यदि स्यादस्तित्वादेरिष्टहानिः प्रसक्ता।
एकोपाधावस्तिता नास्तिता चेत् स्यादित्येवं स्वीकृतेऽस्मिन् हि पक्षे॥ २००॥

धूमे सत्ता स्यादसत्ता च तस्मिन् धूमस्यैवं कारणं कल्प्यते किम्।
कादाचित्कं कारणं नान्तरेण स्यादित्येवं तस्य क्लृप्तिः कुतो वः॥ २०१॥

कादाचित्कात्कल्पनां कारणस्य प्रत्याचक्षीताविरोधं ब्रुवाणः।
एकोपाधावस्तिनास्तित्वयोर्हि तस्मादेषा कष्टक्लृप्तिर्न कार्या॥ २०२॥

ननु चैकरूपचितिवस्तुगतं स्फुरणं तदस्फुरणमेव च वः।
अविरुद्धमभ्युपगतं द्वितयं तदिवास्ति नास्ति युगलं भवतु॥ २०३॥

न तदात्मनः स्फुरणमेव निजं परतोऽप्रकाशनमबोधवशात्।
न च किञ्चिदन्यदनयोरुभयोरविरोधसिद्धिकृदुदाहरणम्॥ २०४॥

स्फुरणास्फुरणे च नात्मनः सदसद्भावतया मनीषिते।
स्फुरणं चितिरात्मवस्तुनस्तदविद्यास्फुरणं च कथ्यते॥ २०५॥

अज्ञानित्वं जीवभावो न तस्माज्जीवत्वादेः कारणं युक्तमेतत्।
प्राणोपाधेर्वाचको जीवशब्दश्चैतन्यस्य स्यात्प्रसिद्धो हि तत्र॥ २०६॥

अज्ञानजन्यकरणप्रतिबिम्बवाचि जीवाभिधानमिह वृद्धजनप्रसिद्धम्।
अत्रैव निर्वचनमस्ति च तस्य तस्माज्जीवो भवेत्करणपूगवशीकृता चित्॥ २०७॥

ब्रह्मैवाज्ञानि तस्मादिह भवितुमलं नापरं वस्तु किञ्चित्
तस्याज्ञानात्मकत्वान्न च तमसि तमस्तन्निवृत्तेरयोगात्।
नाज्ञानोत्थस्य विद्याजनिरिह घटते तां विना तन्न नश्ये-
न्न ह्यज्ञानं विनश्येदवगतिजनकज्ञानजनमान्तरेण॥ २०८॥

अज्ञानात्मकवस्तु नाश्रयतयाज्ञानस्य सम्भाव्यते नाज्ञानात्मकताबहिःकृतमिदं जीवत्वमङ्गीकृतम्।
नाज्ञानाश्रयमध्यपाति घटते जीवत्वमेतेन वश्चैतन्याश्रयमेतदस्तु घटते तत्रैव हीदं तमः॥ २०९॥

ननु चाद्वयाश्रयतमःस्फुरणं न कथञ्चिदत्र न हि तत्स्फुरति।
स्फुरदाश्रयस्य तमसः स्फुरणं घटते न चाद्वयमिह स्फुरति॥ २१०॥

नाज्ञानमद्वयसमाश्रयमिष्टमेवं नाद्वैतवस्तुविषयं निशितेक्षणानाम्।
नानन्दनित्यविषयाश्रयमिष्टमेतत् प्रत्यक्त्वमात्रविषयाश्रयतानुभूतेः॥ २११॥

प्रत्यक्त्वमात्रविषयाश्रयमोहहेतोः प्रत्यक्तिरोहित इति प्रतिपादयामः।
प्रत्यञ्चमेव खट्व वेद्मि न वेद्मि चेति प्रत्यक्षमस्ति ननु वेदनमस्य पुंसः॥ २१२॥

संवित्परिस्फुरति न स्फुरतीति तस्यां वैयात्यदूषितधियस्तु (वैजात्यदूषितधियस्त्व)विसंवदन्ते।
अज्ञानतस्तदपि तद्वदिहाद्वयतवं भादप्यभादिव विमूढधियो वहन्ति॥ २१३॥

अव्युत्पत्तिं बिभ्रती भाति संवित् तद्वद्ब्रह्मण्यद्वितीयस्वरूपम्।
अव्युत्पत्तिं नाशयद्भाति वेद्यं तस्मादेतच्चोद्यमस्मासु नास्ति॥ २१४॥

बन्धमोक्षयोर्विवेचनम्

नन्वेवं चेद्बन्धमोक्षव्यवस्थाशास्त्रं कुप्येन्नाप्रबोधात्प्रवृत्तेः।
बद्धो मुक्तो ज्ञानवानज्ञ इत्यप्येतत्सर्वं यावदज्ञानमिष्टम्॥ २१५॥

किं चैतत्किं बन्धमोक्षव्यवस्थाशास्त्रं यन्नात्तत्परं सत्प्रवृत्तम्।
किं चान्यस्मात्प्राप्तमेवानुभाष्य तस्या रूपं ब्रह्मतत्त्वं विदध्यात्॥ २१६॥

शास्त्रं तावत्तत्परं नेष्यते तदानर्थक्यात्तत्स्वरूपप्रतीतेः।
ब्रह्मात्मैक्यप्रत्ययेनार्थवत्त्वं वक्तुं युक्तं तच्च नोऽभीष्टमेव॥ २१७॥

नन्वन्यो मद्बन्धमोक्षादिभागी भूतो भावी वर्तते वा न कश्चित्।
इत्युक्तार्थं स्वानुभूत्या विरोधान्नाहं जातु प्रोत्सहे सङ्ग्रहीतुम्॥ २१८॥

किं द्वैतानुभवो विरोधपदभाक् किं वा परोऽस्मीत्ययं यद्वा कश्चिदिहापरोऽस्त्यनुभवो यस्ते विरोधावहः।
नाद्वैतानुभवः क्षतिं वितनुते तस्येति युक्तं वचो नापि द्वैतमुपोल्लिखन्ननुभवस्तेनास्य बाधो यतः॥ २१९॥

द्वैताद्वैतनिवेशिनोऽनुभवनाद्बाधोद्भवोऽस्येति चेत् तादृङ्नानुभवोऽस्ति कस्यचिदपि स्थानत्रये जीवतः।
भास्वच्छार्वरगोचरं ह्यनुभवं विभ्रज्जनो दृश्यते नास्मिन् संसृतिमण्डले स न भवेत्कस्मादयं चेद्भवेत्॥ २२०॥

यत एवमत्र न विरोधलवोऽप्युपढौकते कथितनीतिवशात्।
उपगृह्यतां मतमिदं सुदृढं गुरुसम्प्रदायवचनानुगतम्॥ २२१॥

तव गाढमूढतमसा रचितं जगदीशजीववपुषा सकलम्।
प्रतिभाति तावददृढं दृढवत् समुदेति यावदवबोधरविः॥ २२२॥

प्रभुरेष सर्वविदहं कृपणो जगदेतदद्भुतवितानमिति।
प्रतिपत्तयस्तिमिरदृ ष्टदृशो यदिहोद्भवन्ति न तदद्भुतकम्॥ २२३॥

अभयं सनातनमनातुरधीरवलोकयन्निजमनन्तसुखम्।
न मुनिः प्रपश्यति किमप्यसुखं सकलं जिघत्सति जगत्स्वचिता॥ २२४॥

अनिर्वचनीयवस्तु सत्यवस्तुं बोधयितुं शक्यम्

तव चित्तमात्मतमसा जनितं परिकल्प्यत्यखिलमेव जगत्।
तव कल्पनाविरचितः स गुरुस्तव रूपमद्वयमुदाहरति॥ २२५॥

न हि चित्तदृश्यमपि सत्यमिति प्रतिपन्नमस्ति भुवि किञ्चिदपि।
रशनाभुजङ्गसदृशं सकलं जगदिन्द्रजालमिति सिद्धमतः॥ २२६॥

परिकल्पितोऽपि सकलज्ञतया गुरुरेव पूर्णमवबोधयति।
परिकल्पितोऽपि मरणाय भवेदुरगो यथा न तु नभो मलिनम्॥ २२७॥

यदि सत्यमित्यवगतिं कुरुते घटते पटादपि हुताशनधीः।
यदि चानृतं न जनयेत्प्रमितिं ननु चोदनापि जनयेन्न धियम्॥ २२८॥

जनयत्यसाविह मृषावपुषा करणीयवस्तुनि मतिं सुदृढाम्।
ध्वनिधर्मभेदघटितो हि मृषा स्वरसेन सन्नपि तु वर्णगणः॥ २२९॥

मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्॥ २३०॥

न च वर्णपूगमपहाय भवेदिह चोदनेत्यभिमतं विदुषाम्।
यदि सत्यमेव गमकं भवति स्फुटमप्रमाणमियमप्युदिता॥ २३१॥

श्रवणेन्द्रियं च किल कर्णगतं परिकल्पनोपचरितं नभसः।
वलयं प्रकाशयति शब्दगणं परमार्थमित्यपि कणादमतम्॥ २३२॥

त्वमतः स्वमोहरचितं गहनं भवसागरं तर परावगतेः।
परिकल्पितद्वयनिबन्धनतः परमार्थसंविदुदये सति भोः॥ २३३॥

भ्रान्तं तथोपचरितं च यथाविभागमङ्गीकृतं कणभुगादिमुनीन्द्रमुख्यैः।
यन्नास्ति तत्फलनिबन्धनमस्मदीये तन्त्रे तमोविरचितं न फलाय कस्मात्॥ २३४॥

असदपि फलवत्तामश्नुते युष्मदिच्छामनुसरदथ कस्मान्मायया निर्मितं सत्।
न भवति फलवत्ताभाजनं चित्रमेतद्वयमिह न समर्था यूयमत्यन्तशक्ताः॥ २३५॥

परमेव तत्त्वमगृहीतमभूदखिलस्य कारणमनर्थकरम्।
परमेव तत्त्वमवबुद्धमतः परितृप्तये भवति पुष्कलतः॥ २३६॥

तव रूपमेव तव दुःखकरं यदि तन्न पश्यसि बहिर्मुखधीः।
तव रूपमेव तृप्तिकरं यदि तत्प्रपश्यसि निवर्त्य तमः॥ २३७॥

तव बोधमात्रमुपनेयमतस्तव मोहमात्रमपनेयमपि।
तव बोधमोहजनिहानिकरं वचनं त्रयीशिरसि तत्त्वमिति॥ २३८॥

तव बोधजन्मनि पुरा न पुनस्तव कश्चिदप्यतिशयो भवति।
तम एव पूर्वमभवन्न भवत्यवबोधजन्मनि ततो न परम्॥ २३९॥

न तमोऽपि पूर्वमभवन्न भवत्यवबोधजन्मनि तमोऽभिभवः।
तम एव केवलमिदं सकलं न तमो विनात्मनि किमप्यभवत्॥ २४०॥

न तमः परिहृत्य लभ्यते तमसो हानिगता निरूपणा।
इति सा तम इत्युदीरिता न निवृत्तिस्तमसस्तमोमयी॥ २४१॥

यज्ञादिविधिवाक्यानां विषयम्

विधयश्च कर्मविषयाः स्वतमःपटलावृते त्वयि बहिर्मनसि।
कुत एव सम्यगवबोधहते तमसि प्रवृत्तिरिति सम्भवति॥ २४२॥

विदिते पदे भगवतः परमे परिपुष्कले परमतृप्तिमतः।
तव तृष्णया विरहितस्य कथं विधिषु प्रवृत्तिरपवर्गवतः॥ २४३॥

अभिचारकर्मविधयो हि यथा फलभागबाधमनु बाधयुजः।
करणादिभागनिरुपाख्यतया विधयस्तथैव परमात्ममतेः॥ २४४॥

यदि भाव्यभागविलये न भवेत् फलभावना कथमिहोत्सहते।
करणादिभागविलये भवितुं विधिरन्तरेण घटते न च ताम्॥ २४५॥

अधिकारिणं च विषयं च विना न नियोगबुद्धिरुपपत्तिमती।
न विना तमस्तदुभयं घटते विदितात्मनश्च न तमो घटते॥ २४६॥

व्यवहारगोचरमतः सकलं विधिवाक्यमित्यवगतिं मनसि।
उपनीय वेदशिरसो विधिभिर्न विरोध इत्यपि समाकलय॥ २४७॥

एवं वेदान्तवाक्यैरवगतिपदवीमद्वये नीयमाने
प्रत्यक्तत्वे समस्तद्वयकृति तमसि क्षीयमाणे च सद्यः।
स्वाराज्यं त्वय्यवाप्ते परमसुखभुजि स्वच्छचैतन्यमात्रे
लेशो (शेषो)मानान्तरणामपि दुरवगमस्तत्र (दुरधिगमस्तत्र) दूरे विरोधः॥ २४८॥

इति द्वितीयोऽध्यायः

सङ्क्षेपशारीरकम्

तृतीयोऽध्यायः

आत्मज्ञानसाधनम्

श्रुत्वाऽविरोधमुपपन्नसमन्वयोत्थ(न्वयोऽथ)ब्रह्मात्मतामतिरयं पुनरप्युवाच।
ब्रह्मात्मताफलशिरस्कमतिं प्रसूते यत्साधनं तदखिलं प्रतिपित्समानः॥ १॥

ऐदम्पर्यमखण्डवस्तुविषयं वेदान्तवाक्यस्य यत् पूर्वं वर्णितमस्य भूदपहतिर्मा नाम मानान्तरैः।
किन्त्वस्याः परिनिष्ठितस्वविषयध्वान्तच्छिदो जन्मने विद्याया वचनादृते किमपरं कृत्यं भवेत्साधनम्॥ २॥

वैराग्यस्य दृढत्वमेकमपरं तत्त्वम्पदार्थज्ञता वाक्ये निर्गुणनिष्ठिते च सकले न्यायादियत्तामतिः।
सम्यग्ज्ञानसमीपदूरभवयोर्हेत्वोर्विवेकज्ञता वाक्यार्थप्रतिपत्तिसाधनमिदं यत्नेन कृत्यं यतेः॥ ३॥

संसारदोषमवधारयतो यथावद्वैराग्यमुद्भवति चेतसि निष्प्रकम्पम्।
वैराग्यजन्मनि दृढे च सति प्रवृत्तिस्तत्त्वम्पदार्थपरिशोधनकर्मणि स्यात्॥ ४॥

संसारः

संसाररूपमवगच्छ विविच्यमानं यस्मिन् श्रुते भवति ताद्विषया जुगुप्सा।
वेदः प्रकाशयति संसरणं यथास्य जीवस्य जन्ममरणे व्रजतः क्रमेण॥ ५॥

शुद्धः परो न खलु वाङ्मनसव्यतीतः संसारदुःखमतिदुःसहमश्नुवीत।
स्वाविद्यया हि पर एव स जीवभावमागत्य(मापद्य) संसरति लिङ्गसमागमेन॥ ६॥

ब्रह्मैव संसरति मुच्यत एतदेव दौवारिकं भवति संसरणं तु तस्य।
मुक्तिः पुनर्भवति चिद्वपुषैव तस्य स्वाज्ञानतः स्वमहिमप्रतिबोधतश्च॥ ७॥

स्वाज्ञानान्वयिनि चिदेव भवति स्वज्ञानमस्याः पुनः नास्त्यन्तःकरणोपरागशबलीभावं विना युक्तितः।
कूटस्थे न तमस्विता न घटते नो विक्रिया तत्र नस्तस्मादेष विशेष ईषदुचितः स्वीकर्तुमेते प्रति॥ ८॥

पुर्यष्टकं भवति तस्य परस्य मोहात्तेनान्वितस्य तु नभोमलवद्व्यलीकम्।
दुःखं त्रिधा भवति संसरणाभिधानं नान्यः परादधिकरूपभृदस्ति जीवः॥ ९॥

नांशः परस्य न च तस्य विकार एष नात्यन्तमेव च विभिन्नवपुः परस्मात्।
जीवोऽयमभ्युपगतः कुत एतदेवं ब्रह्मात्मतावचनजातविरोधहेतोः॥ १०॥

अपि च विश्वमनुप्रविवेश तत् परममेव पदं परात्मनः।
इति वदत्तु सुहृत्स्विव तत्परश्रुतिवचःसु कथं स ततोऽधिकः॥ ११॥

प्रच्यावि वस्तु यदिहास्ति निजस्वरूपादप्रच्युतैकरससंविदधीनमस्य।
प्रच्याविता(प्रच्याविनः)स्फुरणमित्यवगत्य(वगम्य) तत्र तत्कल्पितं सकलमाकलयानुमानात्॥ १२॥

चैतन्यवस्तुविषयाश्रय एव मोहो नाद्वैतवस्तुविषयाश्रयकोऽप्रतीतेः।
बुद्ध्यादिवेष्टितचितो न तमस्वितेति ब्रह्माश्रयत्वमुदितं तमसः पुरस्तात्॥ १३॥

ब्रह्माश्रयं नहि तमोऽनुभवेन लभ्यं नाप्यागमान्न च किमप्यपरं प्रमाणम्।
ब्रह्माश्रयत्वविषयं तमसस्ततश्च प्रत्यक्प्रकाशविषयाश्रयमेतदस्तु॥ १४॥

जीवत्वमेव तु तदाश्रयमध्यपाति नेच्छन्ति युक्तिकुशला नहि(न च) युज्यते तत्।
अज्ञानमेव खलु तन्न तमस्तमस्वि चैतन्यवस्तु पुनरस्तु न तद्विरोधः॥ १५॥

कर्मेन्द्रियाणि खलु पञ्च तथा पराणि बुद्धीन्द्रियाणि मन आदिचतुष्टयं च।
प्राणादिपञ्चकमथो वियदादिकं च कामश्च कर्म च तमः पुनरष्टमी पूः॥ १६॥

विद्या च विश्वविषयानुभवोत्थपूर्वपज्ञा च कर्मवचसैव तु सङ्गृहीते।
बन्धप्रयोजकतया सदृशत्वहेतोरेकत्र च श्रुतिवचस्युपसङ्ग्रहेण॥ १७॥

तं विद्येति हि वाक्यमेकमिह च स्पष्टं त्रयं कीर्तितं तस्मात्कर्मवचस्तयोरपि भवेत्सङ्ग्राहकं कारणात्।
विद्या चात्र चतुर्विधाप्यभिमतैवारम्भिका कर्मवत् संस्कारोऽपि तथा चतुर्विध इति ज्ञेयस्तथा
सम्भवात्॥ १८॥

पुर्यष्टकं तदिदमप्यभवद्धि लिङ्गं तेनोच्यते तदपि लिङ्गगिरा क्वचित्तु।
पुर्यष्टकं न खद्दृ लिङ्गगिरोऽभिधेयं मुख्यं तु सप्तदशकं प्रथितं हि लिङ्गम्॥ १९॥

इह तावदक्षदशकं मनसा सह बुद्धितत्त्वमथ वायुगुणः।
इति लिङ्गमेतदमुना पुरुषः खद्दृ सङ्गतो भवति जीव इति॥ २०॥

न पुराष्टकेन रहितस्य तव क्वचिदस्ति संसरणदुःखयुजा।
न पुराष्टकेन सहितस्य तथा क्वचिदस्ति दुःखविगमश्च तव॥ २१॥

तव नित्यमुक्तसुखचिद्वपुषो न कदाचिदस्ति पुरसङ्गमनम्।
तव मायया विरचितं सकलं पुरसङ्गतिप्रभृतिकं वितथम्॥ २२॥

मलिनं नभो नहि कदाचिदभूद्विमलं कदाचिदभवन्न नभः।
उभयं नभस्यभवदेवमिह त्वयि नित्यमुक्तचिति संसरणम्॥ २३॥

नहि कल्पनाविरचितं वितथं परमात्मवस्त्ववितथं स्पृशति।
परमात्मवस्तु च तथा तमसा परिकल्पितं न किमपि स्पृशति॥ २४॥

नहि भूमिरूषरवती मृगतृङ्गलवाहिनीं सरितमुद्वहति।
मृगवारिपूरपरिवारवती न नदी तथोषरभुवं स्पृशति॥ २५॥

न तव क्वचिद्गमनमस्ति विभोर्न पुराष्टकस्य जडरूपभृतः।
न च मध्यवर्ति जडचिद्वपुषोर्गमनक्षमं किमपि सम्भवति॥ २६॥

पुरवेष्टितं न खद्दृ (तव) चिद्वलयं परलोकमार्गमनुसर्तुमलम्।
घटवेष्टितं नहि नभोवलयं व्रजति व्रजत्यपि घटेऽवितते(घटे वितथे)॥ २७॥

घट एव गच्छति नभस्त्वचलं व्रजता घटेन तु ततश्च ततः।
परिवेष्टनेन घटखं क्रियते घटखानि तत्र सुबहूनि ततः॥ २८॥

पुरमेव गच्छति चितिस्त्वचला व्रजता पुरेण यदि सापि चितिः।
परिवेष्ट्यते तु सुबहूनि तदा वलयानि पूर्ववदुपाश्रयसे॥ २९॥

अकृतागमश्च कृतनिष्फलता फलतः समापतति कर्त्रगतेः(कर्तृगतेः)।
अपरस्य भोक्तुरुदयाच्च दिवि व्यसनस्य सन्ततिरहो विषमा॥ ३०॥

चलने ह्युपाध्यभिमतस्य भवेज्जनितस्य तेन विगमः सुदृढम्।
ननु कुण्डलापसरणे पुरुषादथ न प्रणश्यति न कुण्डलिता॥ ३१॥

न पुरान्वयश्च तव चिद्वपुषः परमार्थतो भवति तर्कसहः।
नभसो यथा घटसमागमनं न ततोऽपि लिङ्गघटितो व्रजसि॥ ३२॥

नभसः प्रदेशविरहान्नभसो न घटः प्रदेशपरिवेष्टनकृत्।
न नभः समस्तमपि वेष्ट्यते नभसोऽवशेषविरहापतनात्॥ ३३॥

परमात्मभागपरिवेष्टनकृन्न पुरं तथानवयवो हि परः।
न च कृत्स्नमेव परमं पुरुषं पुरवस्तु वेष्टयितुमुत्सहते॥ ३४॥

यदि कृत्स्न एव परमः पुरुषः पुरवेष्टितो भवति जीवतया।
न तदेश्वरो भवितुमुत्सहते न च जीवजातमपरं सकलम्॥ ३५॥

गुरुशिष्यसङ्गतिरतो न भवेन्न च बन्धमोक्षनियमो घटते।
विषयं विना सकलमापतति स्फुटमत्र वेदवचनं च वृथाम्॥ ३६॥

न पुरान्वयोऽत उपपत्तिसहः परमार्थतोऽस्ति परमात्मदृशेः।
वियतो घटान्वयवदेव ततः परिकल्पितं पुरसमागमनम्॥ ३७॥

यत एवमेतदुपपत्तिपथं न तव प्रयाति विरहय्य तमः।
परलोकमार्गगमनं स्वतमःपरिकल्पितं चलनवन्नभसः॥ ३८॥

पुरधर्ममात्मनि विकल्प्य तथा स्वचिदात्मतां च पुरधर्मतया।
स्वपुरं स्वयं च दृढमेकतया परिकल्पयन् व्रजसि मूढमतिः॥ ३९॥

परिपूर्णचिद्रसघनः सततं स्वमहिम्नि तिष्ठसि निरस्तमले।
न तथापि तत्त्वमिति वाक्यकृतां मतिमन्तरेण तव केवलता॥ ४०॥

न तव प्रतीचि करणानि बहिर्विषयाणि येन करणानि सदा।
सहजं च गाढमतिमूढतमं तम इत्यतः पुरमनु व्रजसि॥ ४१॥

स समान इत्युपनिषद्वचनं प्रतिपादयत्युदितमर्थमतः।
स्वमनीषिकेति न कदाचिदपि प्रतिपत्तिरत्र भवतो भवतु॥ ४२॥

पुरहेतुकं यदभवच्च विभोः परिकल्पितं किमपि चित्सदृशम्।
जलपात्रहेतुकमिव द्युमणेस्तदसन्ततं भवति तद्व्रजति॥ ४३॥

जडशक्तिरस्ति च परस्य विभोः परमात्मनस्तम इति प्रथिता।
पुरमष्टकं तव यथा भवति श्रुतितः प्रसिद्धमिदमप्यखिलम्॥ ४४॥

पुरहेतुकं तव यथा च वपुर्भवतीह जीववचसो विषयः।
जडशक्त्युपाधिकममुष्य तथा परमेश्वरत्व(परमेश्वरस्य वपु)वपुरुद्भवति॥ ४५॥

पुरहेतुरूपघटितस्य दृशेर्जडशक्त्युपाधिपरमेश्वरतः।
भयमुद्भवत्यनवबोधवशादिति च त्रयीशिरसि राजपथः॥ ४६॥

परमेश्वरेण विभुना रणयन् परिबृंहितः शकटवद्व्रजसि।
शकटं हि शाकटिकयोगवशाद्व्रजति स्वयं न परतन्त्रतया॥ ४७॥

पुरवेष्टितः पुरवशानुगतः पुरतन्त्रचिन्निभविभिन्नवपुः।
दिवि यातनाभुवि च कर्मफलान्यनुभूय भूय इह सम्भवति(सम्भवसि)॥ ४८॥

सुकृतदुष्कृतकर्मवशादयं दिवमथो यमसादनमेव वा।
अनुभवेन समाप्य पुनर्महीतलमबोधवशाद्वरोहति॥ ४९॥

यदि वा समुच्चयवशात्पुरुषः कमलासनं व्रजति कामुकधीः।
पुनरेव मानवमिमं तु विना परिवर्तमाव्रजति मूढमतिः॥ ५०॥

अथवा स तत्र परात्ममतिः परिमुच्यते सकलबन्धनतः।
क्रमयोगमुक्तिरुदिता श्रुतिषु प्रतिशाखमेवमुपपन्नतरा॥ ५१॥

देवयानपितृयानयोः पथोर्ज्ञानकर्मरहितत्वकारणात्।
नैकमप्यनुसरन्ति ये पुनः क्षुद्रजन्तव इहोद्भवन्ति ते॥५२॥

इति कामुकस्य तव संसरणं शतशो बभूव बत मूढमतेः(परिमूढमतेः)।
इह विप्रजन्मनि विरक्तमतिः कुरु साधनं यदपवर्गकरम्॥५३॥

मोक्षसाधनम्

श्रवणादिकं शमदमादिपरः परमात्मनः परमभागवतः।
कुरु तावता परममेव पदं परमात्मनस्त्वमवलोकयसि॥५४॥

यदि तन्न पश्यसि हरेः परमं पदमम्बुशीतलमिवेद्धशिराः।
न खद्दे प्रदीप्तशिरसोऽस्ति सुखं तव दुःखपावकशिखाभिरहो॥५५॥

एवं विज्ञाय तापत्रयमतिगहनं मोहमूलं परस्मिन् आत्मन्यात्मप्रकाशे त्वयि परमसुखे निष्कले निष्कलङ्के।
सत्ये नित्यस्वभावे परिहृतसकलद्वैतकूटानुषङ्गे सम्यग्ज्ञानानुरागं कुरु विषयगतं भिन्धि निर्बन्धमेनम्॥५६॥

तत्त्वम्पदविवेचनम्

इत्युक्त्वोपरते गुरौ पुनरयं जिज्ञासया प्रेरितस्तत्त्वंशब्दनिगद्यलक्ष्यविषयं शिष्यो गुरुं पृच्छति।
वैराग्येऽतिदृढीकृते सति यतः प्राज्ञो यतिर्मन्यते सन्दीप्तं शिरसीव पावकमिदं संसारदुःखं महत्॥५७॥

वैराग्यं विषयेषु पूर्वमपि मे जातं हरेरर्चनाद्यज्ञादिक्रियया निरस्तफलया किन्त्वद्य दार्ढ्यं गतम्।
संसारस्य निरूपणेन धिगिदं कर्मादिजन्यं फलं विश्वं नश्वरमम्बुबुद्बुदसमं पद्मासनान्तं जगत्॥५८॥

त्वम्पदलक्ष्यार्थम्

किन्तु त्वम्पदलक्ष्यमर्थमधुना कर्तृत्वभोक्तृत्वयोर्जाग्रद्भूगतयोरपोहमुखतो वाञ्छावगन्तुं मम।
कर्तृत्वादिकमस्य किं निजमभूत् स्वाभाविकं जाग्रतः किं वा तत्परतः कुतश्चिदभवच्चैतन्यधातोरिति॥५९॥

यावत्त्वम्पदलक्ष्यवस्तुविषयो बोधो न मे वर्तते तावन्मे बधिरेषु गीतमिव तच्छ्रौतं वचोऽनर्थकम्।
तस्मात्त्वम्पदलक्ष्यवस्तुविषयः कर्तृत्वभोक्तृत्वयोर्जाग्रद्भूगतयोरपोहमुखतो बोधो ममोत्पाद्यताम्॥६०॥

कर्त्रादेरवभासकत्वमगमः शुद्धः स्वयम्भास्वरश्चैतन्येन निजेन तेन भवतः कर्त्रादिबुद्धिर्भ्रमः।
कूटस्थस्य चिदात्मनस्तव कुतः कर्तृत्वभोक्तृत्वयोः शङ्का जागरितेऽपि कारकगणं कर्त्रादिकं पश्यतः॥६१

व्यापारं सकलस्य भासयति यो भास्वत्करो भास्करो नासौ कर्तृतया जनस्य विदितो भूमौ द्युलोकस्थितः।
एवं स्वे महिमन्यवस्थितवतः सङ्घातमुत्पश्यतः स्वव्यापारसमन्वितम् तव कुतः कर्तृत्वमुत्प्रेक्ष्यते॥६२॥

भूतानि पञ्च तव मोहसमुद्भवानि सङ्घातरूपपरिणामामुपागतानि।
कुर्वन्ति कर्म फलमश्नुवते च तेषां साक्षी त्वमन्तरविद्दृश्चिदेकरूपः॥६३॥

क्षीरस्य पूर्णे चषके निरस्तो मणिर्यथा मारकतो महार्हः।
क्षीरं समस्तं क्षणमात्रतस्तत्करोति तच्छायमनूनतेजाः॥६४॥

तथा तमः सम्भवमच्छमन्तर्बहिर्जडिम्नान्वितमन्तरात्मा।
जगच्चिदेकच्छवि चित्स्वरूपः करोति सान्निध्यवशेन विश्वम्॥६५॥

तान्येव कार्यकरणानि बहुप्रकारं भेदं च बिभ्रति भवानपि तत्र लग्नः।
भेदेन भाति जलपात्रनिविष्टमूर्तिर्मार्तण्डमण्डलवदन्वयमन्तरेण॥६६॥

अध्यात्ममेवमधिभूतमथाधिदैवं सूत्रं विराजमपि पश्यसि साक्षिभूतः।
साक्षित्वकारणमशेषजगन्निदानमज्ञानमात्मचिदवज्वलितं सदैव॥६७॥

देहव्यक्तिर्विप्रतीत्यास्पदत्वं याता सर्वा तावकी तावकीव।
देहव्यक्तिर्देहताकारणेन तस्मादात्मा सर्वभूतस्थ एकः॥६८॥

संविद्व्यक्तिर्विप्रतीत्यास्पदत्वं याता सर्वा तावकी तावकीव।
संविद्व्यक्तिः संविदात्मत्वहेतोस्तस्मादात्मा सर्वभूतस्थ एकः॥६९॥

बुद्धिव्यक्तिर्विप्रतीत्यास्पदत्वं याता सर्वा तावकी तावकीव।
बुद्धिव्यक्तिर्बुद्धिताकारणेन तस्मादात्मा सर्वभूतस्थ एकः॥७०॥

अक्षव्यक्तिर्विप्रतीत्यास्पदत्वं याता सर्वा तावकी तावकीव।
अक्षव्यक्तिस्त्वक्षताकारणेन तस्मादात्मा सर्वभूतस्थ एकः॥७१॥

ज्ञानव्यक्तिर्विप्रतीत्यास्पदत्वं याता सर्वा तावकी तावकीव।
ज्ञानव्यक्तिर्ज्ञानताकारणेन तस्मादात्मा सर्वभूतस्थ एकः॥७२॥

रागव्यक्तिर्विप्रतीत्यास्पदत्वं याता सर्वा तावकी तावकीव।
रागव्यक्ती रागताकारणेन तस्मादात्मा सर्वभूतस्थ एकः॥७३॥

द्वेषव्यक्तिर्विप्रतीत्यास्पदत्वं याता सर्वा तावकी तावकीव।
द्वेषव्यक्तिर्द्वेषताकारणेन तस्मादात्मा सर्वभूतस्थ एकः॥७४॥

एवं सतीदमविवेकनिबन्धनं ते कर्तृत्वमात्मनि विभाति न वस्तुभूतम्।
बालेन कल्पितमतीव विशुद्धरूपे व्योम्नीव भूम्नि मलिनत्वमबोधहेतोः॥७५॥

बाह्यैरसौ रविनिशाकरवह्निवाग्भिर्ज्योतिर्गणैरुपकृतोऽपि हि कर्मजातम्।
निर्वर्तयन्न खलु तावकमन्तरेण चैतन्यसन्निधिबलं पुरुषः करोति॥७६॥

ज्योतिर्द्वयान्तरित एव हि कर्मजातं सर्वं करोति पुरुषोऽन्नमयः सदैव।
कर्मादिकारणविनिर्मितमस्य बाह्यं ज्योतिस्त्वनित्यमनिमित्तकमान्तरं चित्॥७७॥

श्रोत्रादिजन्यमतिवृत्तिषु बाह्यशब्दाद्यर्थाकृतिर्विशति कर्मवशेन कर्तुः।
बोधाकृतिस्तु तव सन्निधिमात्रहेतुर्धीवृत्तिषु प्रविशति स्वरसेन नित्यम्॥७८॥

स्वाभाविकी हि वियदन्वितता घटादेः क्षीरादिवस्तुघटना पुनरन्यहेतुः।
एवं धियामपि चिदन्विततानिमित्ता शब्दादिवस्तुघटना खलु कर्महेतुः॥७९॥

संवेदनं यदिह मानफलं प्रसिद्धं तच्च प्रमातरि विकारिणि निष्ठितं नः।
तस्य प्रमातुरपि साक्षितयान्तरात्मा सर्वस्य तिष्ठति भवानविकाररूपः॥८०॥

कर्त्रादिसन्निधिबलेन तवापि कर्तृभोक्तृप्रमातृवपुरापतति भ्रमेण(क्रमेण)।
तद्बुद्धिसंश्रयमनात्मगतं प्रतीचि शुद्धेऽपि पश्यसि तमः पटलावृताक्षः॥८१॥

कर्तृत्वादि च दृश्यवर्गपतितं द्रष्टुः स्वभावः कथं सम्भाव्येत तव प्रसन्नविमलस्वच्छप्रकाशात्मनः।
यद्यद् दृश्यतया जगत्यभिमतं सर्वस्य तत्तद्भवेत् दूरं द्रष्टुरिति प्रसिद्धमखिलं भूभृत्समुद्रादिकम्॥८२॥

एतस्माच्च न जाग्रतस्तव भवेत्स्वाभाविकी कर्तृता यद्येषा स्वत एव किन्न भवति स्वप्नेऽपि ते तिष्ठतः।
यत् स्वप्ने परिपश्यसि त्वमखिलं तन्मायया निर्मितं कर्तृत्वादि न सत्यमत्र घटते कात्स्न्र्यानभि-
व्यक्तितः॥८३॥

कात्स्न्र्यं हीष्टमबाधनं न खलु तत्स्वप्नस्य जाग्रद्धिया बाधाद्बाधितमेव सत्यमिति चेन्नैवं विरोधान्मिथः।
सत्यत्वे न हि बाधितत्वघटना बाधे च सत्यं कुतः सत्यं बाधितमित्यतीव पदयोः सम्बन्धिता दुर्घटा॥८४॥

मायामेतां जागरे लोकसिद्धां उक्त्वा तद्वत् स्वप्नमायां विविच्य।
शक्तिव्याप्तौ तत्र सिद्धे गृहीत्वा मायासिद्धं जागरं साधयामः॥८५॥

लोके हि मायाविगता न माया तमोऽतिरिक्तास्ति निरूप्यमाणा।
व्याप्तिश्च शक्तिश्च निरूप्यमाणा भविष्यतीहैव तु नेतरत्र॥८६॥

मायाविनो न मणिमन्त्रमथौषधं वा मायेति शक्यमिह वर्णयितुं कुतश्चेत्।
सत्यस्य हि तत्सकलमिष्टमियं त्वसत्या माया ततोऽन्यदिह किञ्चन वर्णनीयम्॥८७॥

सामर्थ्यमस्य मणिमन्त्रनिमित्तमस्ति माया भविष्यति जनभ्रमहेतुरेषा।
इत्युच्यते यदि तदप्यतिफल्गु कस्मात् सामर्थ्यमप्यवितथं हि तदिष्टमस्य॥८८॥

न च शक्तिरस्य सहजा यदि वा जनितास्ति केनचिदिति ब्रुवतः।
परिपुष्कलं स्वमतनिर्वहणं भवितुं क्षमं तदनिरूपणतः॥८९॥

नच शुक्रशोणितसमागमने नच गर्भशायिन इयं विदिता।
नच मातृयोनिविवरादुदरादपसर्पतो बहिरियं घटते॥९०॥

मणिमन्त्रमौषधमितीदृशकं विरहय्य नापरमिहार्पयति।
पुरुषोऽपि कश्चिदत एवमियं परतोऽपि नास्य घटनामटति(घटना घटते)॥९१॥

अन्यस्य विभ्रमकरी पुरुषस्य शक्तिराकारमन्यमनपेक्ष्य मनीषता चेत्।
वाच्येह लौकिकजनव्यवहारभूमौ मायागिरस्तदपि दुर्घटमिष्टहानेः॥९२॥

मायामयत्ववचनादखिलं मृषेति यद्भाष्यकारवचनं तदसङ्गतं (तदकारणं) स्यात्।
प्रत्यक्षमुत्सृजसि कारणमन्यदन्यद्यत्किञ्चिदानयसि कष्टमतः किमन्यत्॥९३॥

अज्ञानमेव च भविष्यति शक्तिरेषा सर्वप्रपञ्चजननी परमेश्वरस्य।
माया श्रुतिस्मृतिवचोभिरुदीर्यमाणा शक्तिग्रहो हि परविभ्रमहेतुशक्तौ॥९४॥

नच प्रसिद्धार्थपदान्तराणां प्रयोगसान्निध्यवशेन शक्तिः।
ग्रहीष्यतेऽस्येति समञ्जसं स्यादलौकिके शब्द इदं हि युक्तम्॥९५॥

अयं तु मायेति न शब्द एवमलौकिको लौकिक एव तस्मात्।
यदर्थवाची जगति प्रसिद्धस्तमेव वेदेऽपि स वक्ष्यतीह॥९६॥

ननूद्भिदादेर्यदि नाम लोके प्रसिद्धमर्थान्तरवाचकत्वम्।
तथापि भावार्थनिपीडितस्य विजानते कर्मणि शक्तिमस्य॥९७॥

सत्यं न गत्यन्तरमस्ति तत्र ततस्तथा निश्चितमत्र नैवम्।
मायागिरोऽज्ञाननिवेदनेऽपि न काचिदत्रानुपपत्तिरस्ति॥९८॥

अज्ञानं जडशक्तिमात्रवपुषा सर्वेश्वरस्येष्यते सर्वज्ञत्वविरोधि तन्न च भवेदुक्तप्रकारेण नः।
सर्वज्ञेश्वरसंश्रया भवति सैवाज्ञानमाया श्रुतौ तमादुद्भिदिवेति वर्णनमिदं वैषम्यदुष्टं तव॥९९॥

मायानिर्वचनीयमेव तु तमो मायाविनो गीयते द्रष्टृणां भ्रमकारणं विषयता मायाविता तस्य तु।
तं हस्त्यादिविकल्पनाघटितवन्मूढाशया जन्तवो रज्जुं सर्पतयेव (सर्पधियेव) तद्विरहितं जानन्त्य-
बुद्धत्वतः(जानन्त्यबुद्धत्ववत्)॥१००॥

सम्यग्ज्ञानबलेन तं विरहितं हस्त्यदिभिर्यत्क्षणे जानीयुस्तदनन्तरं न स भवेद्धस्त्यादियुक्तः पुमान्।
तेनास्मत्तम एव तत्र विषये मायास्तु मायाविनः सोऽज्ञातो वयमज्ञकोटिपतिता मायी स तेनोच्यते॥१०१॥

नन्वेवं सति रज्जुखण्डलमप्यज्ञातमज्ञानिभिः मायावीति गिरोच्यतां न तु तथा लोके प्रसिद्धिः क्वचित्।
तेनाज्ञातविलक्षणत्वमुचितं मायाविनो लौकिका मायावीति पुमांसमेव निपुणं येनाहुरत्यादरात्॥१०२॥

नैवं भ्रान्तिनिमित्तकारणमयं सङ्गृह्य सर्वक्षणे (पूर्वक्षणे) मन्त्रादि प्रचुर(प्रचुरं)प्रयत्नजनितं तज्जीवनो (तज्जीवने) वर्तते।
तेनात्रैव तु लोकरूढिरभवन्मायावितागोचरा यद्वद्ब्राह्मणताप्रसिद्धिरभवन्मुक्त्वा परिव्राजकान्॥ १०३॥

एवं तावल्लोकसिद्धा न माया मिथ्याज्ञानाद्विद्यतेऽतश्च तत्र।
शक्तिव्याप्तिप्रत्ययौ वर्णयित्वा वेदाल्लिङ्गाचान्यमायात्वसिद्धिः॥ १०४॥

जाग्रद्भूमौ या प्रसिद्धेह माया निर्णीता सा तावदज्ञानमेव।
तस्यां शक्तिव्याप्तिविज्ञानसिद्धेर्विज्ञातव्या सैव वेदानुमानात्॥ १०५॥

स्वप्नेऽप्येवं स्वप्नदृङ्मोहमात्रादन्या काचिन्न प्रसिद्धास्ति माया।
तत्रैवायं सूत्रकारस्य तस्मान्मायशब्दो वर्तते नापरत्र॥ १०६॥

शक्तिव्याप्तिप्रत्ययौ कारयिष्यन् स्वप्ने स्थित्वा प्रत्यगज्ञानमात्रे।
मायावाचा लोकवत्सूत्रकारो वेदे लिङ्गं चोपनेतुं प्रवृत्तः॥ १०७॥

अज्ञानमावरणमावरणं च माया सर्वेश्वरेण हरिणा दृढमभ्यधायि।
चैतन्यवस्तुन इति प्रतिपद्यमानास्तत्त्वं तदेकमिति निश्चयतः प्रतीमः॥ १०८॥

ज्ञानं निवर्तकमपि द्वितयस्य तस्य गीतागतः करुणया भगवानुवाच।
तेनापि तत्त्वमिदमेकमिति प्रतीतिरानीयते कथितलक्षणतुल्यभावात्॥ १०९॥

नाहं प्रकाश इति तावदनेन मायाऽज्ञानेन चावृतमितीतरदप्यभाणि।
मामेव ये तु परमं पुरुषं प्रपन्ना ज्ञानेन तु प्रभृतिना च धिया निवृत्तिः॥ ११०॥

ज्ञानस्य प्रागभावादपरमभिहितं प्रत्यगज्ञानमेतत् संसारव्याधिबीजं कथितनयवशादेव बुध्यस्व बुद्ध्या।
ज्ञानेनाज्ञाननाशं कथयति भगवानेष गीतागतः सन् न ज्ञानात्प्रागभावक्षय इति घटते तत्क्षये तत्प्रसूतेः॥ १११॥

मायामात्रमतः समस्तमभवत्स्वप्ने प्रसिद्धं दृशः कर्तृत्वादि तमोमयं वितथमेवाज्ञानमात्रं यतः।
तस्माज्जागरितेऽपि चैतदभवत्स्वाभाविकं यत्पुनस्तादृक्षं तव सर्वदैव तु भवेत्स्वप्नेऽपि चैतन्यवत्॥ ११२॥

सत्यप्यद्दृशचिति यत्त्वयि नास्ति कर्तृभोक्तृप्रमातृमुखमन्यदपीह किञ्चित्।
जाग्रद्दृशावगतमप्यखिलं न तत्ते स्वाभाविकं भवितुमुत्सहते विरोधात्॥ ११३॥

स्वाभाविकी हुतभुजः खद्दृ नोष्णता तं जातु प्रमुञ्चति न तामपि जातवेदाः।
एवं भवन्तमपि जागरितोपलब्धं स्वप्ने भवानपि च जागरितं न मुञ्चेत्॥ ११४॥

स्वप्ने न जागरितमस्ति मृषात्वहेतोः स्वप्नस्य सत्यमिति जागरितं वदन्ति।
स्वप्नस्य बाधनबलादनृतत्वमुक्तं तस्माच्चिदेव तव रूपमतोऽन्यदार्तम्॥ ११५॥

स्वप्नोपलब्धमखिलं वितथं तथापि तत्सूचयत्यवितथं परमार्थवस्तु।
जाग्रद्दृशावगतमप्यनृतं तथापि तद्वत्तदप्यवगतिक्षममेव भूम्नः॥ ११६॥

स्वप्नभ्रमोऽपि सुकृतादिनिबन्धनत्वात् तावत्परिस्फुरति यावददृष्टमस्ति।
क्षीणे तु तत्र लयमेति जगन्निदाने गाढे तमस्यनुभवावगते प्रतीचः॥ ११७॥

निष्पादिता सकलकारकवर्गसाध्या सर्वेण कारकगणेन सहैव तावत्।
तिष्ठेत्क्रिया परमसूक्ष्मतयेक्ष्यमाणा सर्वेश्वरेण पुरुषः फलमेति यावत्॥ ११८॥

स्वप्नश्च जागरितमप्युभयं तवैव मोहप्रसूतमपि कर्मफलं विभाति।
कर्मक्षये तदखिलं परमात्ममायामाश्रित्य सूक्ष्ममवतिष्ठत एव लीनम्॥ ११९॥

उत्थानलिङ्गकृतकल्पनयैतदेवं विज्ञायते न तु तथावगतं तदानीम्।
अज्ञानलीनमखिलं जगदस्ति सूक्ष्मं तत्रैव नानुभवनादवगम्यते हि॥ १२०॥

अज्ञानमेव तु तदावगतं त्वदीयं येनोत्थितो वदसि नावगतं मयाद्य।
सुप्तेन किञ्चिदपि गाढतमस्यभूवं क्षिप्तः समस्तविषयावगमासमर्थः॥ १२१॥

अज्ञानमत्र यदि नानुभवात्प्रसिद्धं नाज्ञासिषं त्विति कुतस्तव निश्चयोऽभूत्।
अज्ञानमस्त्यवगतं च सुषुप्तिकाले तेनेति निश्चिनु तवानुभवप्रमाणात्॥ १२२॥

स्पष्टानुभूतिविषयो न तमस्तदानीं आसीदहङ्करणहीनतयाधुना तु।
निष्पाद्य कार्यमिदमंशमहं न जाने मूढोऽस्मि चेत्यवतेर्विषयत्वमागात् ॥ १२३॥

एतावता तव तमोऽपि सुषुप्तिकाले नास्तीति बुद्धिरुदितं गुरुभिश्च कैश्चित्।
स्थाने क्वचित् क्वचिदतो द्वयमुच्यमानं ग्राह्यं विविच्य भवता विषयं विभज्य॥ १२४॥

नाज्ञानमस्ति सुषुप्तिगतस्य पुंसो गाढे तमस्ययमभूत्पुरुषः सुषुप्तः।
इत्युच्यमानमविरुद्धतया विचिन्त्य ग्राह्यं त्वयानुभवयुक्तिनिरूपणेन॥ १२५॥

एवं तमोऽपि न बभूव सुषुप्तिकाले भाषान्तरेण पुरुषः पर एव जीवः।
निर्बीजतामुपगतः स निरन्वयेन न स्पष्टमत्र तमसोऽनुभवोऽस्ति यमात्॥ १२६॥

अज्ञानतज्जमतिहीनतया सुषुप्ते शुद्धः परोऽसि भगवानसि नित्यमुक्तः।
कामश्च कर्म सकलं च तदा कुतस्त्यं चित्सागरेऽनवकरे त्वयि तायमाने॥ १२७॥

आसीदहङ्करणमात्मतमोनिमित्तं तज्जाग्रतश्च भवतः स्वपतश्च दुःखम्।
आनीय दर्शयति तन्न सुषुप्तिकाले बीजक्षयादिति भवानतिनिर्मलोऽभूत्॥ १२८॥

सद्रूपमावरणतानुभवादभीष्टमज्ञानमात्मचिति नैशतमोवदेतत्।
ज्ञानं दिवाकरवदस्य जडप्रकशरूपं निवर्तकमिति प्रवदन्ति धीराः॥ १२९॥

प्रावादुकैरपि तथैव तदेषितव्यं संवेदनेऽस्फुरणमभ्युपयद्भिरग्रे।
संवेदने न खद्दृ संविदभावरूपमज्ञानमभ्युपगतं न च बुद्ध्यभावः॥ १३०॥

तस्मदशेषजगदेकनिदानभूतमज्ञानमात्मविषयं न विरुद्धमूचुः।
वेदावसानवचनानि मुनीश्वराश्च स्थानेषु भूरिषु ततोऽवकरो न कश्चित्॥ १३१॥

साक्षित्वमात्मतमसा मतिकञ्चुकेन मातृत्वमेतदपि नेह सुषुप्तिकाले।
यद्धेतुकं भवति यन्न हि तद्विना तत् सम्भाव्यते न च तदत्र सुषुप्तिकाले॥ १३२॥

अज्ञानस्मस्ति सकलं च सुषुप्तिकाले तत्र प्रलीनमिति यद्यपि नास्ति पुंसः।
स्पष्टानुभूतिरपवर्गविलक्षणत्वादेष्टव्यमेव तु सुषुप्तिभुवस्तथात्वम्॥ १३३॥

एवं सतीह तमसो न विविच्य वस्तु साक्षान्निवेदयितुमस्ति निदर्शनं चेत्।
नैतत्परागवगतेर्विषयो विभाति गाढं तमो न तु तथावगतिः प्रतीचि॥ १३४॥

प्रत्यग्परार्ग्विषयवस्तुविवेचनाय क्लेशो न सम्भवति कस्यचिदत्र जन्तोः।
दृश्यं तमो घटपटादिवदेष तस्य द्रष्टा सुषुप्तिभुवि चिद्घनविग्रहोऽभूत्॥ १३५॥

तिस्रोऽपि चिद्घनतनोस्तव दृश्यभूता दूरे चकासति मतेर्बहिरेव तावत्।
आविस्तरोभवनधर्मतया ह्यवस्थाः कः सङ्करो विमलचिद्वपुषस्तवाभिः॥ १३६॥

त्वय्येव कल्पितमहङ्करणं बिभर्ति तिस्रोऽपि ताः सहितमेव तु तच्च ताभिः।
त्वच्चित्प्रकाशविषयत्वमुपेत्य भाति स्वाज्ञानवत्तव न रूपमतश्चतुष्कम्॥ १३७॥

नान्वेति तत्तव चिता व्यतिरेकिता च दूरे न सम्भवति तस्य चतुष्टयस्य।
नाभावरूपभजनाय समर्थमेतदेवं चिदेव तु चतुष्टयमेतदासीत्॥ १३८॥

जाग्रत्स्वप्नसुषुप्तिमूर्छिततनूनिष्क्रान्त्यवस्थासु यच्चैतन्यं व्यभिचरिणीष्वनुगतं तत्सत्यमेवात्मनः।
यत्किञ्चिद्व्यभिचारि तन्ननु मृषा स्रक्सर्पदण्डादिवत् नानुस्यूतचिदात्मवस्तु वदितुं शक्यं मृषा रज्जुवत्॥ १३९॥

जाग्रत्स्वप्नसुषुप्तिधर्मकमिदं चित्तं त्वदज्ञानतः प्रादुर्भूतमतस्त्वमेव सततं त्वत्तो न तद्भिद्यते।
स्वाज्ञानं च तवानुभूतिबलतः सिद्धं मृषा तत्त्वतो नासीदस्ति भविष्यतीति भवतः पूर्णा चितिः
शिष्यते॥ १४०॥

ज्योतिर्ब्राह्मणवक्ष्यमानबलतः सम्पूर्णरूपा चितिर्जाग्रत्स्वप्नसुषुप्तिधर्मरहिता मोक्षाय निश्चीयते।
तस्मादस्मदुदीरितं स्वकवपुः श्रद्धत्स्व मानं विना नास्माभिः प्रतिपादिता चितिरियं वाक्यार्थ-
सम्बन्धिनी॥ १४१॥

एवं (एतत्)त्वम्पदलक्ष्यवस्तु भवता यत्पृष्टमासीत्पुरा तन्निर्णीतमतोऽन्यदस्ति यदि ते चित्तस्थितं पृच्छ तत्।
बुद्धिस्थं कुरु पूर्वमुक्तमखिलं यद्वक्ष्यमाणं च तद् बोद्धुं धारय ते मनः स्थिरतरं श्रद्धाधनाद्याश्रयः॥ १४२॥

तत्पदलक्ष्यार्थम्

इत्युक्ते गुरुणा स पृच्छति पुनस्त्वंशब्दलक्ष्यं मम ज्ञातं न्यायबलेन पूर्वमुदितावस्थात्रयापोहनात्।
तच्छब्देन तु लक्ष्यमर्थमधुना बोद्धुं मनो मामकं धावत्याशु तमप्यपोह्य सकलद्वैतप्रपञ्चं वद॥ १४३॥

किं सप्रपञ्चमिदमस्त्वथवा समस्तद्वैतप्रपञ्चरहितं परिपूर्णरूपम्।
यद्वोभयात्मकमिदं परमार्थतोऽस्तु विष्णोः परं पदमितीह विचारणीयम्॥ १४४॥

वेदान्त्वाक्यगतिरत्र बहुप्रकारा काचित् कथञ्चिदिति संशय उत्थितो मे।
तत्त्वं प्रकाशय निवर्तय मोहमूलं मत्संशयं मम हिताय भव प्रसीद॥ १४५॥

न स्थानतोऽप्यस्ति परस्य कश्चिद्विशेषयोगः परमार्थरूपः।
स्वतः पुनर्दूरनिरस्त एव परस्य तत्त्वस्य विशेषयोगः॥ १४६॥

स्वभावतश्चिद्घनविग्रहस्य मृषा ह्युपाधिप्रभवा विशेषाः।
यथा जपापुष्पनिबन्धनः स्यान्मृषा मणेर्लोहितिमा तथैत॥ १४७॥

मायोपाधेरद्वयस्येश्वरत्वं कार्योपाधेर्जीवता च प्रतीचः।
मिथ्यैव स्याद्वन्ध्युजीवप्रसूनसम्पर्कोत्था रक्ततेवाभ्रकादेः॥ १४८॥

भल्लातकादिरसयोगनिबन्धनं च वस्त्रे कलङ्कितमनेन पथा निरस्तम्।
तस्यापि पक्षपतितत्वमभीष्टमेव तस्मदसौ न भवति व्यभिचारभूमिः॥ १४९॥

यथा ह्ययं ज्योतिरात्मा विवस्वानपि भिन्ना बहुधैकोऽनुगच्छन्।
उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोऽयमत्मा॥ १५०॥

ऐश्वर्यमस्य परमात्मन उक्तमन्यैः साक्षात्स्वरूपमवबोधसुखादितुल्यम्।
तेनेशते किल यथायथमीशितव्यान् भृत्यान् प्रतीश्वरतया जगतीभृतोऽपि॥ १५१॥

नित्यं प्रियादिषु सुखं प्रतिबिम्बितं सल्लोके वदन्ति विषयेन्द्रियसम्प्रयोगात्।
उत्पन्नमन्यदिति तद्वदिहेश्वरत्वं मायातदुत्थमतिषु प्रतिबिम्बितं सत्॥ १५२॥

मायानिविष्टवपुरीश्वरबोध एष सर्वेश्वरो भवति सर्वमपेक्षमाणः।
बुद्धिप्रविष्टपुरेष तथेश्वरः स्यादात्मीयभृत्यजनवर्गमपेक्षमाणः॥ १५३॥

सम्यग्ज्ञानध्वस्तसर्वप्रपञ्चः स्वीये रूपे निर्गुणे निर्विशेषे।
पूर्णैश्वर्ये स्वप्रकाशस्वभावे स्वाराज्येऽस्मिन् स स्वराडेव तिष्ठेत्॥ १५४॥

ज्ञात्वा देवं सर्वपाशापहानिः क्षीणैः क्लेशैर्जन्ममृत्युप्रहाणिः।
तस्याभिध्यानात्तृतीयं देहभेदे विश्वैश्वर्यं केवल आप्तकामः॥ १५५॥

स स्वराडिति च विद्यते श्रुतिर्वर्णितेश्वरवपुःप्रकाशिनी।
तेन सत्यसुखबोधवद्भवेदीश्वरत्वमिति केचिदूचिरे॥ १५६॥

तन्न भाति चतुरस्रमुच्चकैस्तत्प्रमाणविरहादिह श्रुतौ।
सत्यबोधसुखवन्न तत्परा सत्युवाच यत ईश्वरश्रुतिः॥ १५७॥

तत्परश्रुतिवचः प्रमाणकं सत्यबोधसुखविग्रहं परम्।
ब्रह्म तद्वदिह नेश्वरत्वभाक् तत्परश्रुतिवचःप्रमाणकम्॥ १५८॥

या फलश्रुतिरिहोपवर्णिता सा न तत्परतयावगम्यते।
तत्त्वमस्यादिवचनं हि तत्परं तत्परा न तु फलश्रुतिः क्वचित्॥ १५९॥

सामगनमपि तत्स्वरूपतां जक्षणं च जगतश्च सर्जनम्।
अश्नुवीत फलवाक्यतः श्रुतं तत्स्वरूपमिति यद्युपेयते॥ १६०॥

अर्थवादगतमभ्युपेयते न प्रमान्तरविरोधि यन्मतम्।
सामगानमथ जक्षणादि वा तत्परश्रुतिविरुद्धमिष्यते॥ १६१॥

ईश्वरत्वमपि तत्परश्रुतिर्नेति नेति परिदुःखिता सती।
वारयत्यवशिनष्टि केवलं चित्स्वरूपमनवद्यविग्रहम्॥ १६२॥

सोपाधीश्वरतानिषेधनपरा सा नेति नेति श्रुतिः साक्षाद्भागवतं निरस्तनिखिलोपाधिस्वरूपं पुनः।
विश्वैश्वर्यमिहोच्यमानमधुना मोक्षे ततस्तत्परैर्वाक्यैरस्य विरुद्धतानवसरो मुख्यं ततो गृह्यताम्॥ १६३॥

सामगानमथ जक्षणं जगत्सर्जनं च निरुपाधि गृह्यताम्।
नेति नेति वचसा निषिध्यते जक्षणादिकमुपाधिसंश्रयम्॥ १६४॥

सामगानमथ जक्षणं जगत्सर्जनं च न खद्दृ द्विधेष्यते।
तत्प्रमाणविरहादिहेति चेदीश्वरत्वमपि न द्विधा भवेत्॥ १६५॥

ज्ञानमस्ति खद्दृ बाह्यगोचरं निर्विशेषमविनाशि च द्विधा।
बाह्यगोचरमपोह्य केवला स्वापमोक्षसमये चितिः स्थिता॥ १६६॥

पश्यन्न पश्यतिगिरा कथयाम्बभूव साक्षादनश्वरविनश्वरचिद्विभागम्।
तात्पर्यतः श्रुतिवचः स्फुटमेव नैवमैश्वर्यवस्तुनि विभागवचःश्रुतिर्नः॥ १६७॥

एवं न वा अर इति श्रुतमेव तावत् पुत्राद्युपाधि पुरुषस्य सुखं विनाशि।
नित्यं निरन्तरमनन्तमपारमुक्तं ब्राह्मं सुखं वचनकोटिशतैश्च यत्नात्॥ १६८॥

ऐश्वर्यवर्णनमिह द्विविधं न वेदे नित्यं क्वचित्क्वचिदनित्यमिति प्रतीमः।
ऐश्वर्यमात्रकथनं पुनरस्ति मोक्षादर्वाक्षु मोक्षसमये च न तत्परं तत्॥ १६९॥

प्रियशिरस्त्वकथा खद्दृ यादृशी भवति तादृशमेव तदीरणम्।
तदनु नेति च नेति वचः श्रुतेर्यदपि मोक्षगतं स्तुतये हि तत्॥ १७०॥

स्वातन्त्र्यमीश्वरगिरा गुणमार्गवृत्तिमाश्रित्य पूर्वगुरवः प्रतिपादयन्ति।
सिंहस्य शौर्यगुणवत् परमेश्वरस्य स्वतन्त्र्यलक्षणगुणोऽव्यभिचारिरूपः॥ १७१॥

ऐश्वर्यवस्तु परिगृह्य तदप्यनन्ते सामर्थ्यसिद्धिमुपपादयितुं क्वचिच्च।
सर्वेश्वरश्रुतिवचः समुदाहरन्ति स्वातन्त्र्यलक्षणगुणस्य तमस्वितायाम्॥ १७२॥

सिंहश्रुतिर्न घटते यदि शूरतास्य न स्यात्तथैव परमेश्वरताश्रुतिश्च।
नैश्वर्यलक्षणगुणः परमात्मनश्चेदित्यर्थलब्धिमभिसन्दधते महान्तः॥ १७३॥

श्रौतार्थवृत्तिबललभ्यमपीह वस्तु श्रौतं वदन्ति निकटत्वमनुस्मरन्तः।
आसन्नवृष्टिमपि देवमुदीरयन्ति वर्षन्तमेव हि जना भुवि तादृगेतत्॥ १७४॥

ऐश्वर्यमज्ञानतिरोहितं सद् ध्यानादभिव्यज्यत इत्यवोचत्।
शरीरिणः सूत्रकृदस्य यत्तु तदभ्युपेत्योदितमुक्तहेतोः॥ १७५॥

अथ वा चितिवत्प्रतीयतां पुरुषस्येश्वरतापि वास्तवी।
यदि किञ्चन कारणं भवेन्न विना सा तदिहाभ्युपेयते॥ १७६॥

कामादि तत्र च भवेदितरत्र चेति यत्सूत्रकारवचनं तदुदीक्षमाणाः।
कामादिकेन दहरस्थगुणेन तुल्यं सर्वेश्वरादिगुणजातमिति प्रतीमः॥ १७७॥

दहरस्थगुणोपसंहृतेः स्तुतिमात्रं विरहय्य नापरम्।
फलमस्ति परात्मनिष्ठिते वचने वाजिभिरादृते महत्॥ १७८॥

दहरादुपसंहृतैर्गुणैः सदृशाश्चेद्वशितादिलक्षणाः।
न तदा परमात्मरूपतां प्रतिपत्तुं कलयापि शक्नुयुः(शक्नुमः)॥ १७९॥

परमेश्वरतागुणोऽप्यतः स्तुतये तस्य परस्य वस्तुनः।
परिकीर्तित इत्युपेयतां अविशेषाद्वशितादिलक्षणैः॥ १८०॥

कारणत्वमपि चित्सुखादिवत्तत्स्वरूपमिति किन्न गृह्यते।
ईश्वर्त्वविषये विपश्चितां पक्षपातकरणे न कारणम्॥ १८१॥

साक्षितापि परमात्मनो भवेदीश्वरत्ववदियं न संशयः।
नित्यसिद्धनिजबोधरूपवद्रूपमेव निरुपाधिकं विभोः॥ १८२॥

एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा।
कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च॥ १८३॥

न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते।
परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च॥ १८४॥

न तस्य कश्चित्पतिरस्ति लोके न चेशिता नैव च तस्य लिङ्गम्।
स कारणं वै करणाधिपाधिपो न चास्य कश्चिज्जनिता न जाधिपः॥ १८५॥

इति श्रुतिः कारणसाक्षिभावमैश्वर्यवद्वक्ति परस्य पुंसः।
अतत्परत्वान्न तदिष्यते चेद्वयं तृतीयं न तथैषितव्यम्॥ १८६॥

अतत्परत्वं श्रवणस्य तुल्यं त्रिषु त्रयं तेन विवर्जनीयम्।
अथेष्टमेकं त्रयमेषितव्यं विशेषहेतोरनिरूपणेन॥ १८७॥

ईशितव्यमनपेक्ष्य नेश्वरो नेशितव्यमपि तद्वदीश्वरम्।
अन्तरेण घटते ततो मृषा मोहमात्रपरिकल्पनं द्वयम्॥ १८८॥

कार्यवस्तु विरहय्य कारणं न क्वचिद्घटयितुं क्षमेमहि।
नापि कारणमपोह्य केवलं कार्यवस्तु परिकल्पयेमहि॥ १८९॥

साक्ष्यवस्तु परिहृत्य साक्षिता साक्षिणं च परिहृत्य साक्ष्यता।
नेष्यते न घटते च तेन तत् सव्यपेक्षमुभयं परस्परम्॥ १९०॥

न प्रमेयमपहाय मातृता नापि मातृविरहे प्रमेयता।
मातृमेयरहिता न च प्रमा न प्रमाणरहितं प्रमाफलम्॥ १९१॥

कर्तृ कर्म परिहृत्य नेष्यते कर्म कर्तृरहितं न च क्वचित्।
कर्तृकर्मरहिता न च क्रिया न क्रियाविरहितं क्रियाफलम्॥ १९२॥

सामान्यं न विशेषवस्तुविरहे तस्माद्विना तन्न च स्वातन्त्र्येण घटामुपाञ्चति ततः सापेक्षमेतद्वयम्।
यत्सापेक्षमिहेक्षितं भवति तन्मायामयं स्वप्नवत् तस्मादीश्वरतादि कल्पितवपुः स्वीकुर्महे न्यायतः॥ १९३॥

अभिन्नता भिन्नतया विरुद्धा विभिन्नता भिन्नतया तथैव।
उपाधिभेदे परिकल्पितेऽपि विना पुनस्तं किमुदीरणीयम्॥ १९४॥

स्वभावतो यन्मिथुनं विरुद्धं न तन्निमित्तान्तरतः कदाचित्।
उपैति सख्यं परमार्थवृत्त्या भ्रमादलभ्यं न च किञ्चिदस्ति॥ १९५॥

न रविशार्वरसख्यकृदीक्ष्यते जगति कश्चिदुपाधिरमोहतः।
यदि भवेत्स भवेद्भवतो मतः स न भवेद्यदि सोऽपि न सम्भवेत्॥ १९६॥

खमपि खादति खण्डितमीक्षते निजशिरो नयनेन करार्पितम्।
किमपि दुर्घटमस्य न विद्यते यदि विमूढमतिर्भवति स्वयम्॥ १९७॥

इतश्च निर्भेदकमात्मतत्त्वं निरूपणे कारणकार्यतादेः।
अनादिमायैकनिबन्धनत्वादसम्भवादस्य तु वस्तुवृत्त्या॥ १९८॥

असन्न कार्यं गगनप्रसूनवन्ध्यासुतादेः करणाप्रसिद्धेः
न प्रागसत्कार्यमिति प्रवादः प्रशस्यते तस्य विरोधहेतोः॥ १९९॥

विशेषणानामसति प्रवृत्तिर्न दृश्यते क्वापि न युज्यते च।
युधिष्ठिरात्प्रागभवन्नरेन्द्रो वन्ध्यासुतः शूर इतीह यद्वत्॥ २००॥

उत्पत्तिरप्यस्य निरूप्यमाणा न काचिदागच्छति युक्तिमार्गम्।
स्वसत्तया स्वैः समवायिकारणैरपीह या स्यात्समवायितास्य॥ २०१॥

असज्जनिः सेत्युपवर्ण्यमानं सुदुर्घटं न ह्यसतो युजैभिः।
सदेव सद्भिः सह सर्ववस्तु सङ्गच्छते न त्वसदेव सद्भिः॥ २०२॥

सतीह सत्तास्य पतस्य दृष्टा तथैव सन्तः पटतन्तवोऽपि।
तया (तथा) च तैश्चास्य कथं पटस्य सम्बन्धिता स्यादसतो वदैतत्॥ २०३॥

स्वकरणैस्तन्तुभिरेवमस्य स्वसत्तया चान्वयव एव जन्म।
तवेष्टमेवं सति जन्म तस्य न शक्यते वर्णयितुं पटस्य॥ २०४॥

तदन्वयात्प्रागसतः कथं स्यत्तदन्वयो न ह्यसदन्वयाय।
सता समर्थं न हि वन्ध्यया तत्पुत्रः समन्वेति कदाचिदत्र॥ २०५॥

न च किञ्चिदन्यदसतो वदितुं पटवस्तुनोऽत्र शकनीयमितः।
जनिशब्दवाच्यमनवद्यतया तदयुक्तमेवमसदुद्भवनम्॥ २०६॥

न च वर्णितादपरमत्र भवाननुमन्यते जनिवचोऽर्थमितः(वचोऽर्थमतः)।
यदि वर्ण्यते किमपि तत्र भवेत्स्वमतप्रहाणमलिनीकरणम्॥२०७॥

समवायिकारणगणेन तथा सह सत्तया च पटवस्त्विह यत्।
समवैति तत्कणभुगिच्छति तज्जनिशब्दवाच्यमिति नान्यदितः॥२०८॥

न तदत्र सम्भवति युक्तिवशादुपवर्णितं तदतिविस्तरतः।
न च किञ्चिदन्यदुचितं भवतो वदितुं स्वपक्षमपरित्यजतः॥२०९॥

निरूपणायां न यतोऽस्ति कश्चिदुत्पत्तिशब्दार्थ इह त्वदीये।
पक्षे ततो दुर्घटता(दुर्घटिता)प्रसिद्धिरसज्जनेरुक्तनयेन तावत्॥२१०॥

सतोऽपि कार्यत्वमयुक्तमेव निरूपणे कारणकृत्यहानः।
न कारणव्यापृतिरत्र शक्या ततः स्वरूपे वदितुं फलाय॥२११॥

गुणं क्षिपत्कारणमर्थवत्वं(वत्ता) लभेत चेन्नात्र गुणस्य भावात्।
न चेद्गुणोऽसत्करणं प्रसक्तं निरर्थकं कारणकर्म तस्मात्॥२१२॥

मलं निरस्यार्थवदिष्यते चेन्मलोऽपि सन्नैव निरस्य इष्टः।
सतो विनाशादसतोऽजनेश्च वृथा ततः कारणमत्र पक्षे॥२१३॥

तस्मादभिव्यक्तिकरी न हेतुप्रवृत्तिरत्रार्थवती घटेत।
न चानभिव्यक्तिनिराससृत्त्या तस्मान्न सत्कार्यवचः प्रशस्तम्॥२१४॥

नित्या च कारकगणस्य (कारणगणस्य) सती प्रवृत्तिर्नित्यं व्यनक्ति सकलं फलमित्यवश्यम्।
वक्तव्यमत्र न लयो न सुषुप्तिमूर्छे नो चेन्न सृष्टिरिति कष्टमुपस्थितं वः॥२१५॥

वेदान्तवादिसमयेऽपि समानमेतत् चोद्यं परैर्न खद्दे वाच्यमिहाप्रसक्तेः।
अस्मन्मते (अस्मिन्मते) न खद्दे संव्यवहारमात्रे मायामये किमपि दूषणमस्ति यस्मात्॥२१६॥

आत्रेयवाक्यमपि संव्यवहारमात्रं कार्यं समस्तमिति नः कथयाम्बभूव।
सत्कार्यवादविषयो न हि दोषराशिर्मायामये भवितुमुत्सहते विरोधात्॥२१७॥

काणाददर्शनसमाश्रयदोषराशिर्दूरान्निरस्त इह संव्यवहारमात्रे।
वेदान्तभूमिकुशलो मुनिरत्रिवंश्यस्तेनाह कार्यमिह संव्यवहारमात्रम्॥२१८॥

षष्ठप्रपाठकनिबद्धमुदीरितं यत् तत्सत्यमेव खद्दे सत्यसमाश्रयत्वात्।
अत्रैव (तत्रैव) यत्पुनरुवाच समुद्रफेनदृष्टान्तपूर्वकमदो व्यवहारदृष्ट्या॥२१९॥

पूर्वं विकारमुपवर्ण्य शनैः शनैस्तद्दृष्टिं विसृज्य निकटं परिगृह्य तस्मात्।
सर्वं विकारमथ संव्यवहारमात्रमद्वैतमेव परिरक्षति वाक्यकारः॥२२०॥

अन्तर्गुणा भगवती परदेवतेति प्रत्यग्गुणेति भगवानपि भाष्यकारः।
आह स्म यत्तदिह निर्गुणवस्तुवादे सङ्गच्छते न तु पुनः सगुणप्रवादे॥२२१॥

न खद्दे कारणकार्यसमन्वयो भवतु जातुचिदत्र विभिन्नयोः।
किमिह सागरसह्यसमाश्रयो भवति कारणकार्यसमाश्रयः॥२२२॥

न च तथायमभिन्नसमाश्रयो भवितुमुत्सहतेऽनभिवीक्षणात्।
न हि घटो विदधाति घटं क्वचिन्न च पटः पटमित्थमनीक्षणात्॥२२३॥

कुर्वत्कारणपक्षमाश्रितवतः कुर्वच्च कुर्वत्कृतं तत्कुर्वच्च तथाविधान्यकृतमित्येषानवस्था भवेत्।
कुर्वद्रूपमकार्यमिष्टमिति चेन्नित्यं जगज्जायतां नित्यं मा जनि वा विशेषविरहादेतत्समस्तं जगत्॥२२४॥

सर्वं सर्वसमुद्भवाय घटते कुर्वन्न चेत्कारणं न ह्यस्मिन् क्वचिदस्ति कस्यचिदपि व्यापारवत्ता यतः।
तस्मात्कारणकार्यतादि सकलं मायामयं तत्त्वतो नासीदस्ति भविष्यतीति सकलं चैतन्यशेषं जगत् (महत्)
॥२२५॥

सकलशक्तिविकल्पनयान्वये सकलशक्त्यविकल्पनयान्वयः।
सकलशक्त्यविकल्पनयान्वये सकलशक्तिविकल्पनयान्वयः॥२२६॥

इति परस्परसंश्रयता यदा वद कथं जगतः परमार्थता।
यदि पुनर्जगतोऽपरमार्थता परममस्ति पदं परमात्मनः॥२२७॥

चिच्छक्तिः परमेश्वरस्य विमला चैतन्यमेवोच्यते सत्यैवास्य जडा परा भगवतः शक्तिस्त्वविद्योच्यते।
संसर्गाच्च मिथस्तयोर्भगवतः शक्त्योर्जगज्जायतेऽसच्छक्त्या सविकारया भगवतश्चिच्छक्तिरुद्रिच्यते॥२२८॥

इत्येवं कथयन्ति केचिदपरे श्रद्धालवस्तत्पुनः कस्यांश्चिद्भुवि सम्मतं च विदुषां नेष्टं तु भूम्यन्तरे।
कर्मोपास्तिविधानभूमिषु तथा तत्सम्मतं निर्गुणे तत्त्वे तत्परवेदवाक्यविषये त्वालोचिते नेष्यते॥२२९॥

मूर्तामूर्ततदुत्थलिङ्गपुरुषव्यामिश्रभूता चितिर्वीप्सापूर्वकनेतिनेतिवचनप्रध्वस्तसर्वद्वया।
सम्पूर्णे परमे सुखे परिहृताशेषा शिवे (शेषेऽशिवे) शाश्वते सत्ये शुद्धमहिम्नि तायिनि परे भूम्यक्षरे
तिष्ठति॥२३०॥

जगन्महिम्ना न जगत्प्रसिद्धिर्न चिन्महिम्नापि जगत्प्रसिद्धिः।
न च प्रमाणाज्जगतः प्रसिद्धिस्ततोऽस्य मायामयताप्रसिद्धिः॥२३१॥

जडत्वहेतोर्न जगन्महिम्ना न चिन्महिम्ना तदसङ्गभावात्।
न च प्रमाणात्तदकारकत्वात् कृतस्य जाड्यादजडाजनेश्च॥२३२॥

न सङ्करो नापि च संयुतिस्तयोर्नचास्ति तद्वत्समवायसम्भवः।
ततो न चिच्चेत्यसमन्वयं प्रति प्रतीयते काचन मूलसङ्गतिः॥२३३॥

न योग्यतामात्रनिबन्धनो भवेज्जडात्मनोरत्र विवक्षितोऽन्वयः।
तदा हि तस्या अनपायि(अनपाय)रूपतः सदात्मनः (सदात्मनि) स्यादनपायि(नपाय)संसृतिः॥२३४॥

ततो (अतो) वियन्मुख्यमदो जगज्जडं चिदात्मनोऽस्यैव विवर्त इष्यताम्।
अनाद्यविद्यापटसंवृतात्मनस्तदोपलभ्यत्वममुष्य कल्प्यते (कल्पते)॥२३५॥

संवित्तिभेदतदभावतदीयजन्मनाशादयो न खद्दृ मानबलेन लभ्याः।
न ह्यस्ति मानमिह किञ्चन तद्यदस्या धर्मस्वरूपविषयीकरणे समर्थम्॥२३६॥

तस्मान्न मानफलता निरुपाधिकस्य संवेदनस्य घटतेऽविषयत्वहेतोः।
एवं च मानफलसिद्धिसमन्वयेन सिद्धिर्जडस्य जगतो न कदाचिदस्ति॥२३७॥

इतरेतराध्यसनमस्त्वनयोरुभयोरतो दृगदृशोरनिशम्।
अपरस्परव्यतिकरानुभवदिह शुक्तिकारजतविभ्रमवत्॥२३८॥

संसिद्धा सविलासमोहविषये वस्तुन्यधिष्ठानगीर्नाधारेऽध्यसनस्य वस्तुनि ततोऽस्थाने महान्सम्भ्रमः।
केषाञ्चिन्महतामनूनतमसां पाण्डित्यगर्वादयमन्योंयाध्यसने निरास्पदमिदं शून्यं जगत्स्यादिति॥२३९॥

कृपणमध्यमपक्वधियां नृणां मतिविलासविधात्रितयं क्रमात्।
परिणतिर्बहुजीवतमस्विता परमपुंसि तमः परिकल्पना॥२४०॥

श्रुतिवचांसि मुनिस्मरणानि च द्वयविशारदगीरपि सर्वशः।
त्रयमपेक्ष्य विधात्रितयं विना न हि घटामुपयान्ति कदाचन॥२४१॥

पुरुषमेकमपेक्ष्य च भूमिकात्रितयमस्ति पुरोदितमेव तत्।
तदनुसारवशादखिलश्रुतिस्मृतिवचांसि वयं घटयामहे॥ २४२॥

परिणतिं च विवर्तदशाद्वयं स्थितमनुक्रमतः श्रुतिशासने।
अनुशशास मुनिप्रवरः सुधीः पुरुषबुद्धिमपेक्ष्य यथाक्रमम्॥ २४३॥

श्रुतिप्रमाणता

यदि परिणतिरेषा(रेषां) चिद्विवर्तोऽथ वा स्याद्भवति ननु तदानीं वेदशास्त्रे विरोधः।
नहि खद्दृ कृतकत्वेऽपौरुषेयत्वहेतोर्भवितुमलमियं नो मानता स्वप्रयुक्ता॥ २४४॥

कणभुगभिमतिर्वा कल्पनीया तदानीं सुरगुरुमतमेवोपास्यमाहोस्विदुच्चैः।
इति निपतति चोद्यं ब्रह्मणो विश्वसृष्टिर्यदि भवति न चेद्वो नित्यमायाति विश्वम्॥ २४५॥

ननु सदृशमिदं वश्चोद्यमस्मासु कस्माद्विनिहितमुभयेषां पूर्वमीमांसकानाम्।
अवगतिकृतमेतद्वाचकत्वं पदानामवगतिरियमिष्टा नश्वरी तत्क्षणेन॥ २४६॥

अवगतिगतमेवापेक्ष्य पूर्वापरत्वप्रतिनियममियं वो वेदता वेदराशेः।
क्षणिकमभवदित्थं वेदशास्त्रं समस्तं कथमिव तदिदानीं वेदशास्त्रं प्रमाणम्॥ २४७॥

पुरुषमतिनिवेशो नास्ति वेदप्रमेये विषय इति यदीष्टा मानत स्वप्रयुक्ता।
सदृशमिदमिदानीं कारणं मानतायां परमपुरुषसृष्टे वेदशास्त्रेऽप्यभीष्टम्(भीष्टे)॥ २४८॥

न हि खद्दृ मतिपूर्वा ब्रह्मणः सृष्टिरिष्टा निगदितुरिव सृष्टिर्वेदविद्यासु नित्त्यम्।
भवति तु पुनरेषा तस्य निश्वासकल्पा श्रुतिवचनमपीदं वस्तु वक्ति स्फुटं नः॥ २४९॥

अपि च पुरुषकर्मोद्भूतिकानीन्द्रियाणि स्फुटमवगमयन्ति स्वं स्वमान्यानपेक्षम्।
विषयमिति हि दृष्टं तद्वदिष्टं च तस्मादिह किमपि न चोद्यं वाच्यमेतद्भवद्भिः॥ २५०॥

श्रुतिवचनमनेकं वक्ति तस्येक्षितृत्वं मतिमदिति ततस्तन्नेष्यते कस्य हेतोः।
इति यदि मनुषे तन्मैव मंस्थाः कुतश्चेत्सकलकरणहीनं ब्रह्म नः शास्ति शास्त्रम्॥ २५१॥

चितिगतजडशक्तेराद्य इष्टो विवर्तश्चितिनिकटनिवेशाल्लब्धदीप्तिर्जडोऽपि।
श्रुतिशिरसि निषण्णैरीक्षणं कथ्यते तन्न तु परमपदस्यापीक्षणं बुद्धिवृत्तिः॥ २५२॥

ननु च डित्थडवित्थपदादिवत्सकलमेव सामयिकं पदम्।
अनुमिमीमहि पूर्वनिदर्शनादनुमितिर्भवतीति किमद्भुतम्॥ २५३॥

अनादिवृद्धव्यवहारलक्षणे कथं प्रमाणे परिपन्थिनि स्थिते।
गवादिशब्दे समयोऽनुमास्यते डवित्थशब्दादिवदेतदुच्यताम्॥ २५४॥

सतः प्रमाणाभिमतेषु पञ्चसु प्रमणमक्षादिषु किञ्चिदीक्ष्यते।
न हीह सम्बन्धरि तेन तस्य वः खपुष्पकल्पत्वमभावमानतः॥ २५५॥

पुरोपलब्धो विषयो न दृश्यते यदा प्रमाणैरिह भावगोचरैः।
तदा तु तत्रानुपलब्धिकारणं किमप्यभावादपरं हि मृग्यते॥ २५६॥

अत्यन्तानुपलब्धवस्तुनि पुनर्यः पञ्चकानुद्भवस्तस्याभावनिमित्तकः स न पुनस्तत्रापरं कारणम्।
अन्विच्छन्ति मनीषिणो न हि शशेऽदृष्टे विषाणोऽस्तितां (शशेऽदृष्ट्वा विषणास्तितां) तत्रादर्शनकारणान्तर-
परा हेत्वन्तरान्वेषिणः॥ २५७॥

विषमदुर्गमदेशसहस्रगः कथमिवैष नरः समयक्रियाम्।
सकलशब्दतदर्थनिवेशिनीं वद विधातुमलं स्वयमेकलः॥२५८॥

अपि च किञ्चिदपि प्रतिपादकं न हि यदा पदमस्ति जगन्मुखे।
अनभिधाय पदेन तदा (पदं न तदा) कथं समयमेष करिष्यति शङ्करः॥२५९॥

अभिनयेन करिष्यति चेदयं समयमेतदतीव हि दुर्घटम्।
न हि पदार्थसहस्रविमिश्रिते गवि तदाभिनयात्समयो भवेत्॥२६०॥

अपि च लौकिकमानबलाश्रयादधिगते विषये समयो भवेत्।
अनुपलब्धसतत्त्वकदेवताप्रभृतिकार्थगतः समयः कुतः॥२६१॥

अपि च कर्तुरनुस्मरणं भवेद्यदि चकार पुमान् समयं गिराम्।
न खद्दृ कर्तृग(कर्तृक)बुद्धिबलं विना व्यवहृतिर्भवति व्यवहर्तरि॥२६२॥

न खद्दृ पाणिनिपिङ्गलसंज्ञया व्यवहरन्ति तयोः स्मरणं विना।
पदपदार्थपरस्परसङ्गतिं निरमिमीत ततो न जगद्गुरुः॥२६३॥

मतिमतां प्रवरो वृषभध्वजः कणभुगादिमुनिप्रवरः प्रभुः।
ननु धरादिजगद्रचनाबलादनुमितोऽनवखण्डितशक्तिकः॥२६४॥

अपि तु (च) वैदिकवाङ्मनसातिगानुदितद्दृ स्रचिदेकरसात्प्रभोः।
अभवदानकदुन्दुभिनन्दनादमतिपूर्वमिदं सकलं जगत्॥२६५॥

ननु लौकिकवचसां नरमतिपूर्वकरचना परिदृश्यत इति वैदिकवचसामनुमिनुमः।
वचनं श्रुतिशिरसामपि नरधीकृतरचनं वचनत्वत इव लौकिकजननिर्मितवचनम्॥२६६॥

न च मादृशजनधीकृतरचनं श्रुतिवचनं भवितुं क्षममिति वैदिकरचनाबलमिषतः।
अनुमीयत इह शूलभृदिति चेदिदमशुभं न हि वैदिकवचसामभिभवनास्पदमनुमा॥२६७॥

ब्रह्म स्वयम्भु परमात्मपदस्य वेदो निश्वासकल्प इति चापरमामनन्ति।
वाक्यं तदस्य मतिपूर्वकतानुमानं सद्यो निरस्यति न चेदपबाधितं स्यात्॥२६८॥

सृजति रक्षति संहरति प्रभुः सकलमेव निविश्य नियच्छति।
अमतिपूर्वमिति श्रुतिशासने वद कथं मतिपूर्वकतानुमा॥२६९॥

आप्तोक्तत्वप्रत्यये मानभावो वेदस्यास्य ज्ञायते मानभावे।
विज्ञाते सत्याप्तपूर्वत्वसिद्धिरित्यन्योन्यापाश्रयत्वप्रसङ्गः॥२७०॥

तस्मादेषा स्वप्रयुक्तप्रमाणभावज्ञाना वेदविद्याभ्युपेया।
प्रामाण्यं स्यात् स्वप्रयुक्तं च तस्या वस्तुस्थित्याज्ञप्तिवन्नान्यतस्तत्॥२७१॥

ज्ञप्त्युत्पत्त्योर्यद्वदेव प्रवृत्तावस्या युक्ता मानता स्वप्रयुक्ता।
वेदित्थाया बुद्धिवृत्तेर्न हीयमुत्पाद्यान्यत्संविदे काङ्क्षतीति॥२७२॥

विश्वं विष्णोरुत्थितं नामरूपं निश्वासादिप्रख्यमित्याह वेदः।
यत्तत्तथ्यं वर्त्मना वर्णितेन तस्मान्मिथ्या पौरुषेयानुमानम्॥२७३॥

परिणामविवर्तयोरतः परिक्लृप्तावपि वेदगोचरः।
न च चोद्यलवोऽपि (नहि दोषलवोऽपि) विद्यते कथितेनैव पथानपेक्षितः(पेक्षणात्)॥२७४॥

उपाधिमौपाधिकमान्तरं चिदाभासनं चित्प्रतिबिम्बकं च।
चिद्बिम्बमेवं चतुरः पदार्थान्विविच्य जानीहि तदर्थभाजः॥२७५॥

तथा त्वमर्थेऽपि चतुष्टयं तद्विवेचनीयं निपुणेन भूत्वा।
मतिश्चिदाभासनमेवमस्यां बिम्बं तदीयं प्रतिबिम्बकं च॥२७६॥

उपाधिरज्ञानमनादिसिद्धमस्मिंश्चिदाभासनमीश्वरत्वम्।
तदन्विता चित्प्रतिबिम्बकं स्यादुदीर्यते शुद्धचिदेव बिम्बम्॥२७७॥

उपाधिरन्तःकरणं त्वमर्थे जीवत्वमाभासनमत्र तद्वत्।
तदन्विता चित्प्रतिबिम्बमेवमनन्वितां तामिह बिम्बमाहुः॥२७८॥

उपाधिना सार्धमुपाधिजन्यमौपाधिकं सर्वमवेहि मिथ्या।
भागं मृषा चित्प्रतिबिम्बकेऽपि बिम्बं पुनः सत्यमशेषमेव॥२७९॥

अप्यात्रमप्यात्रगतत्वमेवमप्यात्रगोऽप्यात्रगताद्बहिश्च(गतात्परश्च)।
दिवाकरो दिव्यवतिष्ठमानो न शक्यतेऽपोहितुमिद्धतेजाः॥२८०॥

पुरं पुरःस्थत्वमतो पुरःस्थं पुराद्बहिः शुद्धमवस्थितं च।
तथा परं ब्रह्म सुसूक्ष्मयापि धिया निराकर्तुमशक्यमेव॥२८१॥

न स्थानतोऽप्यस्ति परस्य कश्चिद्विशेषयोगः परमार्थरूपः।
स्वतः पुनर्दूरनिरस्त एव परस्य तत्त्वस्य विशेषयोगः॥२८२॥

श्रुतेश्च तात्पर्यमखण्डरूपे परे पुरस्तादुपपादितं च।
ततोऽपि तस्याद्वयरूपतोऽन्यद्रूपान्तरं कल्पयितुं न शक्यम्॥२८३॥

भेदश्रुतिस्त्वन्यपरा समस्ता समस्तवेदेषु न तत्परासौ।
अतत्परा तत्परवेदवाक्यैर्विरुध्यमाना गुणवाद एव॥२८४॥

न ह्यर्थवादा विधिभिर्विरुद्धा विध्यर्थसङ्कोचकरा भवन्ति।
किन्तु प्रधानानुगुणं यदेषां आलम्बनं तत्खद्दे कल्पनीयम्॥२८५॥

यथा ह्यजक्षीरविधेः समीपे यज्जर्तिलादेः परिकीर्तनं तत्।
प्रधानसङ्कोचभयादपास्य स्वमर्थमासीद्गुणवाद एव॥२८६॥

एवं सतीहापि विरुध्यमानं वचो यदद्वैतपरैर्वचोभिः।
तदस्तु गौणं यदि वा परस्य मायाप्रसूतद्वयवादिमुख्यम्॥२८७॥

भेदश्रुतिः कल्पितमेव भेदमालम्ब्य मुख्यार्थवती भवित्री।
अतत्परा तत्परवाक्यभङ्गस्त्वितो(भङ्गं त्वितो)ऽन्यथा याति विना निमित्तम्॥२८८॥

यदपि किञ्चिदुपासननिष्ठिताद्वचनतः प्रतिभाति परात्मनः।
सकलगन्धरसादिमयं वपुस्तदपि कल्पितभेदसमाश्रयम्॥२८९॥

न खद्दे निर्गुणवस्तुपरं वचः सगुणवाक्यविरोधनिमित्ततः।
स्वविषयादपसारयितुं बलादतिबलिष्ठपदान्वयमिष्यते॥२९०॥

तस्मात्तत्परवेदवाक्यगतिभिर्नायेन चात्मप्रभं सर्वद्वैतविवर्जितं विगलितध्वान्तं शिवं शाश्वतम्।
प्रत्यग्रूपमरूपगन्धरसकं तच्छब्दवाच्यस्थितं वाक्यार्थान्वयि लक्षितं भगवतो विष्णोः पदं गृह्यताम्॥२९१॥

अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च यत्।
अनाद्यनन्तं महतः परं ध्रुवं निचायनीयं पदमीदृशं हरेः॥२९२॥

भोक्ता भोग्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्म मे तत् (चैतत्)।
जीवेशानौ सृज्यमानं जगच्च शुद्धं ब्रह्मेत्याह वेदान्तवाक्यम्॥२९३॥

पदार्थबोधेन कृतार्थता न ते मतिः परोक्षा हि पदार्थगोचरा।
अतो (ततो) महावाक्यनिबन्धनैव धीरबोधविच्छेदकरी भविष्यति॥२९४॥

स्वाध्यायधर्मपठितं निजवेदशाखावेदान्तभूमिगतमादरपालितं च।
सन्न्यासिना परदृशा गुरुणोपदिष्टं साक्षान्महावचनमेव विमुक्तिहेतुः॥२९५॥

नावेदविद्धि मनुते पुरुषं बृहन्तमित्याह वेदवचनं कथमन्यथैतत्।
वाक्यान्तरं च कथमाह पुमांसमेनं साटोपमौपनिषदत्वविशेषणेन॥२९६॥

उपनिषदिति वेद इत्यपीदं समभिवदन्ति महावचो महान्तः।
फलवदवगतिः स्यादन्तरेणैतदेकं वचनमिति न शक्यं वक्तुमित्यादरोऽस्मिन्॥२९७॥

उपनिषदिति शब्दो वेदशब्दश्च तस्मात् श्रुतिशिरसि निविष्टो योज्यतामत्र वाक्ये।
अपरमखिलमस्यैवाङ्गभूतत्वहेतोरिह समभिनिविष्टं तद्विरो वाच्यमासीत्॥२९८॥

पित्रा तत्त्वमसीति बोधनमनु स्पष्टं विजज्ञाविति छान्दोग्ये यदवोचदेतदिह नो लिङ्गं भवेज्ज्ञापकम्।
सर्वत्रैव महागिरामुपनिषच्छब्दो भवेद्ग्राहको वेदश्चायमतोऽन्यदस्य निकटं तेनात्र वेदादिगीः॥२९९॥

उपनिषद्वचसा परमात्मधीः सहजशक्तिवशेन निगद्यते।
तदुपचर्य (तदुपचरय्य) महागिरि वर्तते निकटभावमपेक्ष्य तु मुख्यगीः॥३००॥

उपनिषद्वचसाभिहितात्मधीः (चनाभिहिता सती) निकटवर्तिमहागिरि मुख्यवत्।
उपनिषद्वचनं तदवान्तरे वचसि गौणवदत्र विवक्ष्यते॥३०१॥

यतो महावाक्यत एव पुत्रो विजज्ञिवानस्य पितुः सकाशात्।
इति श्रुतं तेन स एव वेदस्तथैव सैवोपनिषच्च सिद्धा॥३०२॥

विना महावाक्यमतो न कश्चित् पुमांसमद्वैतमवैति जन्तुः।
ततः पदार्थावगमान्न मुक्तिर्घटिष्यते तस्य परोक्षभावात्॥३०३॥

पदार्थबोधं परिहृत्य वाक्यं न शक्तमात्मानुभवावसानाम्।
धियं समानेतुमपेक्षितत्वादतः स यत्नेन निरूपितोऽभूत्॥३०४॥

तच्छब्दादवगतमद्वितीयमासीत् प्रत्यक्तत्वं समधिगतं त्वमित्यनेन।
प्रत्यक्तत्वं न खलु विनाद्वितीयमेवं नाद्वैतं भवितुमलं विना प्रतीचा॥३०५॥

तर्कप्रतीतिसमयेऽपि तदद्वितीयं प्रत्यक्परिस्फुरति तत्प्रतिबिम्बितं सत्।
वेदान्तवाक्यजनिताद्वयबुद्धिभूमिनिष्ठं पुनः स्फुटतरं भवतीति भेदः॥३०६॥

अधममध्यमशुद्धिनि दर्पणे परमशुद्धिनि चाननमात्मनः।
तरतमक्रमतः प्रतिभासते तदिव तत्त्वमिह प्रतिपत्तिषु॥३०७॥

एकदेशमुपलभ्य धर्मिणश्चैकदेशमपरं विजानते।
धर्मिधीव्यवधिकारणादतो नानुमा ह्यनुभवाय वस्तुनः॥३०८॥

एवं तावत्तत्त्वमर्थौ विशुद्धौ बोद्धव्यं चेदन्यदप्यस्ति पृच्छ।
यद्यद्बुद्धं तत्तदादाय तिष्ठेर्यच्चाबुद्धं तत्र चाधत्स्व चेतः॥३०९॥

अवान्तर उपनिषद्वाक्यानां परिमाणः

बुद्ध्वा तत्त्वम्पदार्थावनुभवविषयं कर्तुकामस्तदैक्यं
वाक्याद्वाक्यार्थनिष्ठाच्छ्रुतिशिरसि गतादञ्जसा तत्त्वमादेः।
तच्छेषापन्नमस्मिन् श्रुतिशिरसि वचोजातमन्यद्यदस्ति
तस्येयत्तावुभुत्साकुलितनिजमतिः पृच्छति स्मैष भूयः॥ ३१०॥

अद्याप्यवान्तरवचः परिमाणबोधवैकल्यमस्ति मम तेन महावचोऽपि।
वाक्यार्थबुद्धिमनुभूतिफलावसानां नोत्पादयत्यहरहः श्रुतमप्यशक्तेः॥ ३११॥

विधिमुखेन परस्य निवेदकं वचनजातमवान्तरसंज्ञितम्।
यदपि भेदनिषेधमुखेन तत्परमितिं प्रतिपादय मे प्रभो॥ ३१२॥

सकलवेदशिरःसु परात्मधीपरवचःसु परापरबोधतः।
अपुनरुक्तपदान्युपसंहरन् परिमितिं स्वयमेव तु वेत्स्यसि (ज्ञास्यसि)॥ ३१३॥

अपुनरुक्तपदानि विना यतो न परिपुष्कलबुद्धिसमुद्भवः।
अपुनरुक्तपदानि ततस्ततस्त्वमुपसंहर तत्त्वबुभुत्सया॥ ३१४॥

कुरु परापरवाक्यविवेचनं तदनु शब्दसमाहरणं कुरु।
प्रियशिरःप्रभृतीनि च यत्नवानुपचितापचितानि परित्यज॥ ३१५॥

उपचितापचितानि न निर्गुणे प्रियशिरःप्रभृतीनि कदाचन।
निपुणधीरपि कश्चन योजयेदपि तु कोशगुणाः कथिता ह्यमी॥ ३१६॥

इति वचःपरिमाणमुदीरितं विधिवचःसु निषेधगिरां शृणु।
बहु निषेध्यममूष्वपि तेन तास्वपि समाहर पूर्ववदेव तत्॥ ३१७॥

अपुनरुक्तनिषेध्यनिषेधकृद्बहुपदाहरणं कुरु तास्वपि।
यदि पुनर्न समाहरणं भवेत् परिमितप्रतिषेधनमापतेत्॥ ३१८॥

विधिवचस्युभयं तु पदे पदे भवति सङ्ग्रहवर्जनरूपकम्।
स्वकवपुः परिकल्पितरूपयोर्न तु निषेधवचःसु तथा मतम्॥ ३१९॥

यदिह किञ्चिदबोधामुद्भवं तदखिलं प्रतिषेधति केवलम्।
न तु किमप्युपगृह्य परे पदे भगवतो निविशेत निषेधगीः॥ ३२०॥

इति विशेष इह प्रतिपादितो विधिनिषेधगिरोरुभयोरपि।
अपुनरुक्तपदाहरणं पुनर्विधिनिषेधवचःस्वविशेषितम् (स्वविशेषतः - स्वविशेषितः)॥ ३२१॥

श्रुत(श्रुति)पदैरुपसंहृतिशालिभिर्यदवशिष्टनिषेधनम्।
तदपि पूर्य(पूर्व)मिहाभिमतं श्रुतेः श्रुत(श्रुति)पदान्युपलक्षणमेव हि॥ ३२२॥

समुपसंहृतशब्दसमन्वितैः श्रुतिपदैर्विधिवाक्यगतैः पुनः।
समुपलक्ष्यतया न परात्मनः किमपि रूपमिहाभ्यधिकं मतम्॥ ३२३॥

न खद्द संश्रुतसंहृतशब्दयोरविषयः परमात्मन इष्यते।
किमपि रूपममुत्र हि नास्ति नः किमपि मानमतो न तदस्ति नः॥ ३२४॥

गुणतया हि पदानि परात्मनो विधिनिषेधवचःस्ववतस्थिरे।
गुणगणो गुणितन्त्रतया गुणी भवति यत्र हि तत्र भवत्यसौ॥ ३२५॥

विधिनिषेधवचः परिमाणतस्तव मया कथितं नयवर्त्मना।
यदपरं तव वस्तु बुभुत्सितं तदिह नः पुरतः प्रकटीकुरु॥ ३२६॥

ज्ञानस्य अन्तरङ्गबहिरङ्गसाधने

अन्तरङ्गबहिरङ्गसाधने भेदतः कथय तद्बुभुत्सितम्।
ज्ञानजन्मत इदं जिघृक्षितं हेयमेतदिति चोपपत्तिभिः॥ ३२७॥

अन्तरङ्गमपवर्गकाङ्क्षिभिः कार्यमेव यतिभिः प्रयत्नतः।
त्याज्यमेव बहिरङ्गसाधनं यत्नतः पतनभीरुभिर्भवेत्॥ ३२८॥

उच्यते शृणु विविच्य साधनं ज्ञानजन्मनि यदूचिवान् गुरुः।
अन्तरङ्गबहिरङ्गभेदतः शब्दशक्तिमनुसृत्य वैदिकीम्। ३२९॥

यच्छ्रुतं विविदिषोदयाय तत् सर्वमेव बहिरङ्गसाधनम्।
अन्तरङ्गमवगच्छ तत्पुनर्यत्परावगतिसाधनं श्रुतम्॥ ३३०॥

यद्धि कारकतयावगम्यते दूरतस्तदिह साधनं धियः।
अन्तरङ्गमखिलं तु तत्पुनर्व्यञ्जकं भवति यत्परात्मनः॥ ३३१॥

कारकस्य करणेन तत्क्षणाद्भिक्षुरेव पतितो भवेद्यथा।
व्यञ्जकस्य परिवर्जनात्तथा सद्य एव पतितो भवेदसौ॥ ३३२॥

प्रत्ययार्थविषयं हि कर्मणामुच्यते विविदिषेयुरित्यतः।
न प्रकृत्यभिहितार्थवेदने वेदवाचि(वाद - वादि) विनियोगशासनम्॥ ३३३॥

न प्रधानमपहाय वेदनेनान्वयं व्रजति कर्मसाधनम्।
सङ्गतिर्भवति वेदनेच्छया वेदनेन न तु कर्मणां क्वचित्॥ ३३४॥

न प्रधानमिह वेदनं भवेत्प्रत्ययार्थविषयां प्रधानताम्।
उत्ससर्ज भगवान्निरङ्कुशं येन पाणिनिरलङ्घ्यशासनः॥ ३३५॥

प्रत्यये सनि न चापवादकं किञ्चिदप्युदितवानसौ मुनिः।
येन तत्र गुणभावमुद्वहेत् प्रत्ययाभिहितमर्थवस्तुनः॥ ३३६॥

धातोः कर्मण इत्युवाच भगवान् यत्पाणिनिस्तत्पुनर्धात्वर्थस्य न वेदयत्यभिमतं प्राधान्यमायुष्मतः।
किं त्वार्थं न तु शब्दगम्यमवदत्तेनापि तद्योक्ष्यते नोत्सर्गस्य विना निमित्तमपरं सङ्कोचनं युज्यते॥ ३३७॥

धातोः कर्मण इत्युदीरणमिदं साधारणं दृश्यते शब्दार्थत्वविशेषसूचकतया न ह्यत्र सूत्रे पदम्।
धात्वर्थस्य तु कर्मतावचनमत्रोच्चारितं केवलं तत्त्वार्थेऽप्युपपद्यमानमधुना नोत्सर्गपीडाकरम्॥ ३३८॥

इच्छायामिति सूत्रकारवचनं प्राधान्यपक्षे भवेदिच्छार्थस्य समञ्जसं न खद्दृ तत्सन्प्रत्ययार्थे गुणे।
धात्वर्थे ननु सन् भवेदिति वदेदिच्छा गुणश्चेद्भवेदिच्छायामिति वक्ति तेन वदति प्राधान्यमिच्छा-
गतम्॥ ३३९॥

तस्मात्कर्म समस्तमेव तु भवेदिच्छाजनेः साधनं शास्त्रेणोक्तमतः समस्तमपि तद्यत्नेन हेयं यतः।
द्रष्टव्यत्वमनूद्य साधनतया यत्तत्प्रतीचः श्रुतं वेदान्तश्रवणादिकं भवति तत्कर्तव्यमावश्यकम्॥ ३४०॥

वेदान्तवाक्यमिह कारणमात्मबोधे हेत्वन्तराणि परिपन्थिनिबर्हणानि।
यज्ञादिकानि दुरितं क्षपयन्ति बुद्धेस्तत्त्वम्पदार्थविषयं तम उत्तराणि॥ ३४१॥

तत्त्वम्पदार्थविषयं तम इत्यपीदमर्वागवस्थजनदृष्टिमपेक्ष्य गीतम्।
अज्ञानमुत्तमदृशां पुनरेकमेव संसारमूलमपवर्गफला च विद्या॥ ३४२॥

अज्ञानसंशयविपर्ययरूपकाणि ब्रह्मात्मबुद्धिजननप्रतिबन्धकानि।
तत्त्वम्पदार्थविषयाणि निवर्तयन्ति ह्यावृत्तिमन्ति मननश्रवणादिकानि॥ ३४३॥

शब्दशक्तिविषयं निरूपणं युक्तितः श्रवणमुच्यते बुधैः।
वस्तुवृत्तविषयं निरूपणं युक्तितो मननमित्युदीर्यते॥ ३४४॥

चेतसस्तु चितिमात्रशेषता ध्यानमित्यभिवदन्ति वैदिकाः।
अन्तरङ्गमिदमित्थमीरितं तत्कुरुष्व परमात्मबुद्धये॥ ३४५॥

श्रवणमननबुद्ध्योर्जातयोर्यत्फलं तत् निपुणमतिभिरुच्चैरुच्यते दर्शनाय।
अनुभवनविहीना यैवमेवेति बुद्धिः श्रुतमननसमाप्तौ तन्निदिध्यासनं हि॥ ३४६॥

पूर्वाण्यदृष्टपरिपन्थिनिबर्हणनि दृष्टं हरन्ति च विरोधिनमुत्तराणि।
वाक्यं निरस्तसकलप्रतिबन्धकं सदात्मानमद्वयमखण्डमबुद्धमाह॥ ३४७॥

यज्ञादिक्षपितसमस्तकल्मषाणां पुत्रादित्रयगतसङ्गवर्जितानाम्।
संशुद्धे पदयुगलार्थतत्त्वमार्गे प्रायेणोद्भवति हि जन्मनीह विद्या॥ ३४८॥

अत्रैव जन्मनि भवेदपवर्गदायि वाक्यप्रसूतमनुभूतिफलावसानम्।
ज्ञानं निवारकनिमित्तवशादमुष्मिञ्जन्मन्यपीति वचनादवगम्यते हि॥ ३४९॥

ज्ञानोत्पत्तिं वामदेवस्य गर्भे श्रुत्वा विद्मः साधनं प्राच्यमस्य।
योगभ्रष्टस्येत्यवष्टम्भतोऽपि विज्ञातव्यं साधनं प्राच्यमस्य॥ ३५०॥

चित्रादिवद्भवति साधनजातमस्य ज्ञानप्रसूतिकरमित्यवगच्छ सर्वम्।
अभ्यग्रशुष्यदखिलौषधिक्स्य पुंसो वृष्टिप्रदेष्टिरधिकारवशादिहैव॥ ३५१॥

बहिरङ्गसाधनमशेषगुरोः परमेश्वरस्य चरणाम्बुजयोः।
नियमात्समर्पितमशेषमघं विनिहन्ति बुद्धिनिलयं महत्॥ ३५२॥

न तथान्तरङ्गमुपलब्धिजनेरुपकारकं शमदमप्रभृति।
तदनुष्ठितं परमहंसजनैः परमात्मतत्त्वमुपलम्भयति॥ ३५३॥

भगवाननादिनिधनः कृपया हरिरेतदाह जगदेकहितः।
सकलं समर्प्य मयि युक्तमनाः कुरु कर्म शुद्धिकरमित्यसकृत्॥ ३५४॥

न तथान्तरङ्गफलसन्न्यसनं क्वचिदूचिवानत इदं विदितम्।
अनपेक्ष्य तत्फलपरित्यजनं परमात्मनिश्चयफलं तदिति॥ ३५५॥

अपि च बन्धनहेतुतया श्रुतं समस(सकल)मीक्षणकौशलशालिनः।
भवति (भवतु) शुद्धिकरं न च बन्धकृद्भवति(कृद्भवतु) कर्म तथा घटते हि तत्॥ ३५६॥

यदिह साधनमात्मधियः श्रुतं न च फलान्तरहेतुतया श्रुतम्।
शमदमादिकमत्र तु कौशलं किमपि काङ्क्षितमस्ति न सिद्धये॥ ३५७॥

उक्तं साधनजातमत्र सकलं विद्यासमुत्पत्तये यस्मिन्कर्मणि वैदिकेन विधिना नुन्नः परिव्राजकः।
कर्तृत्वाद्युपमर्दनेन भवता विद्यानुकूलात्मना कर्तव्यं तदशेषतस्तदनु ते विद्या विपाकं व्रजेत्॥ ३५८॥

वानप्रस्थगृहस्थनैष्ठिकजनैरन्यैश्च वर्णाश्रमैः कर्मव्यध्वनिषेवितं भवति वै जन्मान्तरे पाचकम्।
विद्यायाः श्रवणादिलक्षणमिदं न ह्येतदेषां क्वचित् शास्त्रेण प्रतिषिद्धमीक्षितमिदं शूद्रस्य दृष्टं यथा॥ ३५९॥

सर्वश्रुतिस्मृतिवचोभिरयं परिव्राण्मुण्डः शुचिः परमहंस इति प्रसिद्धः।
ज्ञानाय साधनधनेषु(गणेषु) नियुज्यमानः प्रायेण बुद्धिपरिपाकमवाप्स्यतीह॥ ३६०॥

जन्मान्तरेषु यदि साधनजातमासीत् सन्न्यासपूर्वकमिदं श्रवणादिरूपम्।
विद्यामवाप्स्यति जनः सकलोऽपि यत्र तत्राश्रमादिषु वसन्न निवारयामः॥ ३६१॥

वेदान्तविज्ञानसुनिश्चितार्थाः सन्न्यासयोगाद्यतयः शुद्धसत्त्वाः।
ते ब्रह्मलोकेषु परान्तकाले परामृताः परिमुच्यन्ति सर्वे॥ ३६२॥

कर्मसन्न्यासम् - मोक्षस्य अन्तरङ्गसाधनम्

नैतादृशं ब्राह्मणस्यास्ति वित्तं यथैकता समत सत्यता च।
शीलं स्थितिर्दण्डनिधानमार्जवं ततस्ततश्चोपरमः क्रियाभ्यः॥ ३६३॥

यतो यतो निवर्तते ततस्ततो विमुच्यते।
निवर्तनाद्धि सर्वतो न वेत्ति दुःखमणवपि॥ ३६४॥

किं ते धनेन किमु बन्धुभिरेव वा ते किं ते दारैर्ब्राह्मण यो मरिष्यसि।
आत्मानमन्विच्छ गुहां प्रविष्टं पितामहास्ते क्व गताः पिता च॥ ३६५॥

अर्थस्य मूलं निकृतिः क्षमा च कामस्य रूपं च वयो वपुश्च।
धर्मस्य यागादि दया दमश्च मोक्षस्य सर्वोपरमः क्रियाभ्यः॥ ३६६॥

इति तृतीयोऽध्यायः

सङ्क्षेपशारीरकम्

चतुर्थोऽध्यायः

आत्मज्ञानफलविषयकप्रश्नः

उक्तसाधनसमुद्भवा सती किं प्रयच्छति फलं मुमुक्षवे।
प्रत्यगात्ममतिरत्र मे मनस्यर्थिता समुपजायतेऽधुना॥ १॥

किं निरस्तसहकारिकारणा केवलैव फलमर्पयेन्मतिः।
बाह्यसाधनसहायसम्पदा वान्विता फलविधायिनी भवेत्॥ २॥

एतदप्यहमवैतुमुत्सहे निर्णयं कुरु कृपाविधेयधीः।
एतदेव हि दयाद्द लक्षणं यद्विनेयजनबुद्धिवर्धनम्॥ ३॥

आत्मज्ञानफलम्

उच्यते न तमसो निवृत्तितः किञ्चिदस्ति परमात्मधीफलम्।
अन्यदल्पमपि साधनान्तरं न व्यपेक्ष्य फलदायिनी च धीः॥ ४॥

शुक्तिकाविषयबुद्धिजन्मनः शुक्तिकागततमोनिवृत्तितः।
नापरं किमपि दृश्यते फलं नापरं च सहकारिकारणम्॥ ५॥

एवमात्मनि तमोनिवृत्तितो नान्यदस्ति परमात्मधीफलम्।
नाप्यपेक्ष्य सहकारिकारणं किञ्चिदात्ममतिरर्पयेत्फलम्॥ ६॥

ब्रह्मज्ञानं प्रमाणं भवति दृढमिदं नात्र कश्चिद्विवादः ब्रह्मात्मा चैकरूपो न च बहुरसकस्तत्परत्वाच्छ्रुतीनाम्।
एवं सत्यद्वयात्मप्रमितिफलमिह द्वैतमुलापनुत्तिर्न ह्यज्ञानापनुत्तेरधिकमपि फलं किञ्चिदस्ति प्रमाणात्॥ ७॥

निरभिसन्धि समर्पितमच्युते विहितमिष्टफलदपि निर्गतम्।
यदपि कर्म तदप्यवधीरितं यदि धिया न तया परमर्थ्यते॥ ८॥

ज्ञानकर्मसमुच्चयवादनिराकरणम्

समविषमसमुच्चयो न युक्तो न हि जगदस्ति धियः प्रसूतिकाले।
क्व नु बत विहितक्रियासमूहः कथमिव तत्र समुच्चयोपपत्तिः॥ ९॥

अपि च परमहंसस्त्यक्तसर्वैषणः सन् अनुभवफलविद्यां साधनैर्यद्यवाप(वापः)।
कथमिव पुनरत्र(रस्य – रस्यां) प्राप्तिरस्ति क्रियाया (क्रियायां) भवतु तदपवर्गो विद्ययैवैकयास्य॥ १०॥

यस्य प्रयोगविधिरस्ति परिग्रहीता द्वारैदमर्थ्यविनिवेदकमस्य सर्वम्।
श्रुत्यादिमानमिह नास्ति तदात्मबुद्धौ तस्मादियं भवतु नः पुरुषार्थभूता॥ ११॥

अविद्यानिवारकस्वरूपम्

सदसत्सदसद्विकल्पितप्रतिपक्षैकवपुर्निवर्तनम्।
तमसोऽभ्युपगम्यतेऽन्यथानुपपत्त्यापतनैकहेतुतः॥ १२॥

सदसत्सदसद्विकल्पितप्रतिबद्धा न भवन्ति वर्णिते।
परमात्मतमोनिवर्तनेऽनुपपत्तिप्रतिभासवत्तयः॥ १३॥

चितिभेदमभेदमेव वा द्वयरूपत्वमथो मृषात्मताम्।
परिहृत्य तमोनिवर्तनं प्रथयन्ते खद्दृ मुक्तिकोविदाः॥१४॥

अथवा चितिरेव केवला वचनोत्पादितबुद्धिवर्त्मना।
परमात्मतमोनिवृत्तिगीर्विषयत्वं समुपैत्युपाधिना॥ १५॥

शुक्तिकाविषयबुद्धिजन्मना प्रत्यगात्मचितिरेव केवला।
शुक्तिकागततमोनिवृत्तिरित्युच्यते दृतिहरिः पशुर्यथा॥१६॥

वाचको हरणकर्तुरिष्यते शब्द एष हि दृतेर्मनीषिभिः।
केवलं तु पशुता निमित्ततां बाह्यतः स्थितवती व्रजेदियम्॥१७॥

एवमेव तु तमोनिवृत्तिगीः शुक्तिकाविषयबुद्धिजन्मना।
बाह्यतः स्थितवतैव हेतुना प्रत्यगात्मचिति वर्ततेऽञ्जसा॥ १८॥

उत्पन्नशुक्तिमतिरात्मचितिर्यथैव शुक्तेस्तमोहतिरिति प्रतिपन्नमेवम्(मेव)।
आत्मापि जातनिजबुद्धिरबोधहानिरित्युच्यतेऽमल(हानिरुच्यते केवल)चिदेकरसो न पूर्वम्(पूर्वः)॥ १९॥

दृतिहरणकरत्वं पुंसि चान्यत्र (वान्यत्र) चेदं दृतिहरिरिति लोके नोच्यते वर्तमानम्।
अनधिकविकलं सत् कथ्यते तत्पशुस्थं दृतिहरिरिति शिष्टै(शब्दै)र्बाह्यहेतोः पशुत्वात्॥ २०॥

अयमपि परमात्मा प्रत्यगात्मस्वभावो वचनजनितबुद्धेः प्राक्स्वरूपे स्थितोऽपि।
न खद्दृ विषयभावं ध्वान्तविच्छेदवाचो व्रजति हि तदुपाधेर्बुद्धिवृत्तेरभावात्॥२१॥

अज्ञानदाह इति नैकपदं समासात् पूर्वोत्तरे खद्दृ पदे पदतामुपेतः।
ज्ञानोदयं तटगतं समुपाददानस्तस्मात्तमोहतिरवोऽत्र चिति प्रवृत्तः॥२२॥

अत्राप्यसौ दृतिहरिः पशुरित्यखण्डः शब्दो न खल्वभिमतोऽवयवार्थयोगात्।
धातुश्च वाचकतया हरतिः प्रसिद्धो हीन्प्रत्ययश्च हरतेः परतः प्रसिद्धः॥२३॥

उद्यन्निरस्यति तमश्च तदुद्भवं च वेदावसानवचनादथ वोदितः (चोदितः) सन्।
ऐकात्म्यवस्तुविषयोऽनुभवोऽत एव कञ्चित्सहायमनपेक्ष्य निवर्तकोऽसौ॥ २४॥

दीपस्तमस्तिरयतीह भवन्नुतस्वि(भवन्कुतश्चि)द्भूत्वा क्षणव्यवधिमात्रमपेक्ष्य नात्र।
कश्चिद्विवादपदवीमुपयाति वादी तद्वत्प्रतीच्यवगतौ तमसोऽपहन्त्र्याम्॥ २५॥

उत्पत्तिरेव हि धिया स्वफलं प्रदातुमाकाङ्क्षिता न च ततोऽपरमर्थनीयम्।
यत्कारकं तदिह काङ्क्षति जन्ममात्रादन्यन्न धीः किमपि काङ्क्षति जन्म लब्ध्वा॥ २६॥

प्रत्यक्षसूत्र इदमेव निवेदयिष्यन् (निरूपयिष्यन्) न्यायेन जैमिनिरुवाच विदग्धबुद्धिः।
सत्सम्प्रयोग इति तत्र हि बुद्धिजन्मशब्दस्य नान्यदिह किञ्चन कृत्यमस्ति॥ २७॥

वेदान्तवाक्यजनिता मतिवृत्तिरेवमुत्पत्तितः सकलमेव भवार्णवाम्बु।
पीत्वा स्वयं च खद्दे शाम्यति दग्धलोहपीतं यथाम्बु चितिमेव तु शेषयित्वा॥ २८॥

मोक्षआत्मन तादात्म्यम्

कूटस्थनित्यैव तु मुक्तिरेषा विद्याफलत्वादिह यद्यदेवम्।
तत्तत्तथा दृष्टमशेषमेव यथा हि शुक्त्यादिपदार्थ(निविष्ट)संवित्॥२९॥

जन्मादिषड्भावविकारहीना शुक्त्यादिवस्तूपनिविष्ट(वस्तुन्यविशिष्ट)संवित्।
न प्रागभावाद्यनुभूतिरस्याः स्वतः प्रमाणादपि युज्यते हि॥ ३०॥

अबुध्यमानो नहि संविदं तत्सम्बन्धि किञ्चित्प्रतिपत्तुमीशः।
न बुध्यमानोऽपि तथा तदा हि न संविदेषा विषयत्वहेतोः॥ ३१॥

जन्या न मुक्तिर्घटते कुतश्चिद्विद्याफलत्वादिति पूर्वहेतोः।
यद्यद्धि जन्यं जगति प्रसिद्धं तत्तन्न विद्याफलमम्बरादि (मध्वरादि)॥३२॥

मोक्षस्वरूपो(स्वरूपे) विफलक्रियोऽसौ विद्याफलत्वादिह यद्यदेवम्।
तत्तत्तथा दृष्टमशेषमेव यथैव रज्वादितमोनिवृत्तिः॥ ३३॥

सायुज्यादि विवादगोचरपदं निःश्रेयसं नो भवेत् कार्यत्वादिह यद्यदीदृशमदो निःश्रेयसं नेक्षितम्।
यद्वत्कुड्यघटादि तादृशमिदं तस्मादिदं तादृशं युक्तं कल्पयितुं न तद्विसदृशं तादृङ्न दृष्टं यतः॥ ३४॥

सदसदुद्भवनं न विमुक्तता सदसदुद्भवनानुपपत्तितः।
सदसतोर्नशनं न विमुक्तता सदसतोर्नशनानुपपत्तितः॥ ३५॥

न च तमोमयजन्म विमुक्तता नहि तदिष्टमनिष्टतरं हि तत्।
न खद्दे कल्पितजन्म विमुक्ततां समुपगच्छति तद्वितथं यतः॥ ३६॥

अथ तमोमयविश्वविकल्पना विलयनात्मकमभ्युपगम्यते।
सकलदूषणजातविवर्जितं तदिह मोक्षपदं न निवार्यते॥ ३७॥

जीवन्मुक्तिः

सम्यग्ज्ञानविभावसुः सकलमेवाज्ञानतत्सम्भवं सद्यो वस्तुबलप्रवर्तनमरुद्व्यापारसन्दीपितः।
निर्लेपेन हि दन्दहीति न मनागप्यस्य रूपान्तरं संसारस्य शिनष्टि तेन विदुषः सद्यो विमुक्तिर्ध्रुवा॥ ३८॥

जीवन्मुक्तिप्रत्ययं शास्त्रजातं जीवन्मुक्ते कल्पिते योजनीयम्।
तावन्मात्रेणार्थवत्त्वोपपत्तेः सद्यो मुक्तिः सम्यगेतस्य हेतोः॥ ३९॥

यद्वा विद्वद्गोचरं योजनीयं तस्याविद्यालेशवत्त्वोपपत्तेः।
तस्याभीष्टा निर्निमित्ता निवृत्तिर्यद्वा विद्यासन्ततिर्हेतुलेशम्(लेशः)॥ ४०॥

जीवन्मुक्ति(क्त)व्यापृतेः प्रापको यस्तस्याविद्यालेशगन्धादिभाषा।
नाविद्याया नापि भागस्य तस्यास्तस्मिन् पक्षे दुर्घटत्वाद्विमुक्तेः॥ ४१॥

गन्धच्छायालेशसंस्कारभाषा विज्ञातव्या भाष्यकारीयतन्त्रे।
स्वाविद्याया बाधितायाः प्रतीतिः (प्रतीतेः) पौर्वापर्येणार्थमालोच्य बुद्ध्या॥ ४२॥

जीवन्मुतिस्तावदस्ति प्रतीतेर्द्वैतच्छाया तत्र चास्ति प्रतीतेः(चास्ति लेशप्रतीतेः)।
द्वैतच्छायारक्षणायास्ति लेशस्तस्मिन्नर्थे स्वानुभूतिः प्रमाणम्॥ ४३॥

ब्रह्मात्मत्वं सान्तरायं पुरस्तात् बोधोत्पत्तौ ध्वस्तमोहान्तरायम्।
यद्यप्येवं द्वैतलेशानुवृत्तेः प्रत्यक्षत्वान्मोहलेशोऽभ्युपेयः॥ ४४॥

तस्माज्जीवन्मुक्तरूपेण विद्वानारब्धानां कर्मणां भोगसिद्धै।
स्थित्वा भोगं ध्वान्तगन्धप्रसूतं भुक्त्वात्यन्तं याति कैवल्यमन्ते॥ ४५॥

क्षरं प्रधानममृताक्षरं हरः क्षरात्मानावीशते देव एकः।
तस्याभिध्यानाद्योजनात्तत्त्वभावात् भूयश्चान्ते विश्वमायानिवृत्तिः॥ ४६॥

पितृयानं देवयानं च न मुक्तस्य गती

ब्रह्मादीनामस्ति मुक्तिः श्रुतिभ्यस्तेषामेषा(मेषां) नार्चिराद्या गतिर्वः।
तस्मादस्या निर्गुणब्रह्मविद्यासम्बन्धित्वं नैषितव्यं भवद्भिः॥ ४७॥

प्राणोत्क्रान्तिर्नास्ति मूर्धन्ययैषां नाड्या तस्माद्यत्र यत्रैव विद्या।
तत्रैव स्यान्मुक्तिरित्यभ्युपेयं गत्युत्क्रान्ती तेन विद्यान्तरेषु॥ ४८॥

परम्परया मोक्षस्य साधनम् कर्मा

देवादीनां नास्ति कर्माधिकारो विद्या तेषां केवला मुक्तिहेतुः।
पारम्पर्यात् कर्मणामुक्त(मस्य) हेतोर्विद्याङ्गत्वं सर्ववर्णाश्रमाणाम्॥ ४९॥

पारम्पर्यं शुद्धिहेतुत्वहेतोर्यज्ञादीनां श्रूयते स्मर्यते च।
साक्षादेषां मोक्षहेतुत्वमेवमन्विच्छन्तोऽप्यागमान्न प्रतीमः॥ ५०॥

इति बहुश्रुतभाषितमुच्चकैः श्रुतिशिरोवचनानुगतं महत्।
समुपदिष्टमिदं कृपया मया प्रियमतीव हितं च मुमुक्षवे॥ ५१॥

आत्मज्ञानप्रशंसा

एवं समन्वयविरोधनिरासविद्यानिष्पत्तिसाधनफलानि गुरोः क्रमेण।
विज्ञाय वेदफलमात्मनि सर्वमेव पश्यन्नुवाच कृतकृत्यमतिः स शिष्यः॥ ५२॥

विद्याविग्रहमग्रहेण पिहितं प्रत्यञ्चमुच्चैस्तरामुत्कृष्योत्तमपूरुषं मुनिधिया मुञ्जादिषीकामिव।
कोशात्कारणकार्यरूपविकृतात् पश्यामि निःसंशयं क्वासीदिति भविष्यति क्व नु गतः संसारदुःखोदधिः
॥ ५३॥

पश्यामि चित्रमिव सर्वमिदं द्वितीयं तिष्ठामि निष्कल(पुष्कल)चिदेकवपुष्यनन्ते।
आत्मानमद्वयमनन्तसुखैकरूपं पश्यामि दग्धरशनामिव च प्रपञ्चम्॥ ५४॥

अद्वैतमप्यनुभवामि करस्थबिल्वतुल्यं शरीरमहिनिर्ल्वयनीव(दीक्षे) वीक्षे।
एवं च जीवनमिव प्रतिभासमानं (प्रतिभासनं च) निःश्रेयसाधिगमनं च मम प्रसिद्धम्॥ ५५॥

अद्वैतबाधकमभून्मम यद् द्वितीयमद्वैतमस्य बत बाधकमद्य(बाधकमेव) जातम्।
मोहाद् द्वितीयमपबाधकमस्य विद्यासामर्थ्यतो द्वयनिबर्हणमद्वितीयम्॥ ५६॥

आश्चर्यमद्य मम भाति कथं द्वितीयं नित्ये निरस्तनिखिला(सकला)शिवचित्प्रकाशे।
आसीत्पुरेति किमिमाः श्रुतयो न पूर्वं येन द्वितीयमभवत्तिमिरप्रसूतम्॥ ५७॥

त्वत्पादपङ्कजसमाश्रयणं विना मे सन्नप्यसन्निव परः पुरुषः पुरासीत्।
त्वत्पादपद्मयुगलाश्रयणादिदानीं नासीन्न चास्ति न भविष्यति भेदबुद्धिः॥ ५८॥

यस्मात्कृपापरवशो मम दुश्चिकित्सं संसाररोगमपनेतुमसि प्रवृत्तः।
त्वत्पादपङ्कजरजःशिरसा दधानस्त्वामशरीरपतनादहमभ्युपासे॥ ५९॥

अस्य ग्रन्थस्य उद्देश्यम्

सङ्क्षेपशारीरकमेवमेतत् कृतं परिव्राजकमुक्तिहेतुः।
गुरुप्रसादात्परिलभ्य तत्त्वं त्रयीशिरस्तत्त्वनिवेदनाय॥ ६०॥

ईश्वरार्पणम् - मङ्गलाशासनम्

अविरलपदपङ्क्तिः पद्मनाभस्य पुण्या चरणकमलधूलिग्राहिणी भारतीयम्।
घनतरमुपघातं श्रेयसः श्रोतृसङ्घात् सुरसरिदिव सद्यो मार्ष्टु माङ्गल्यहेतुः॥ ६१॥

श्रीदेवेश्वरपादपङ्कजरजःसम्पर्कपूताशयः सर्वज्ञात्मगिराङ्कितो मुनिवरः सङ्क्षेपशारीरकम्।
चक्रे सज्जनबुद्धिवर्धनमिदं राजन्यवंश्ये नृपे श्रीमत्यक्षतशासने मनुकुलादित्ये भुवं शासति॥ ६२॥

भुजङ्गमाङ्गशायिने विहङ्गमाङ्गगामिने।
तुरङ्गमाङ्गभेदिने नमो रथाङ्गधारिणे॥ ६३॥

इति चतुर्थोऽध्यायः

इति सङ्क्षेपशारीरकम् समाप्तम्